नं. ९/९

ॐ

रावसाहेब मल्लप्पा बसप्पा वारद यांच्या उदार आश्रयाखालीं प्रसिद्ध होणारी वीरशैव-लिंगिब्राह्मणधर्मग्रंथमाला.

ग्रंथ १६ वा.

सिद्धांतशिखामणि.

भाग १ ला.

हा

(महाराष्ट्र तात्पर्यासह)

वेदमूर्ति, मणूर मठाध्यक्ष मल्लिकार्जुनशास्त्री

यांनीं मुंबई येथील

'निर्णयसागर' छापखान्यांत छापवून प्रसिद्ध केला.

आवृत्ति १ ली. प्रती १०००.

शके १८२७, सन १९०५.

(हा ग्रंथ प्रसिद्धिकर्त्यानें सर्व हक्कांसह रावसाहेब मल्लप्पा बसप्पा वारद यांस अर्पण केला आहे.)

किंमत १८८

प्रस्तावना.

कलिकालमानाला अनुसरून वीरशैवमतानुयायी वीरशैवलिंगिब्राह्मणाच्या धर्मास ग्लानि जी आली आहे, ही मोठी शोचनीय गोष्ट आहे. कारण ब्रह्मचर्य, गार्हस्थ्य, वानप्रस्थ, संन्यास या आश्रमांमध्यें राहणाऱ्या ब्राह्मणांचें मुख्य जीवित धर्माचरण हेंच होय. त्याच धर्माचा लोप झाला असतां वर्णसंकरादि महादोष उपस्थित होऊन प्राणी ऐहिक पारत्रिक सुखाला मुकतो ही गोष्ट निर्विवाद आहे. तर वीरशैवधर्माभिमानी ब्राह्मणांनीं इकडे अवश्य लक्ष्य दिलें पाहिजे. याचें कर्तव्य ह्मणजे वीरशैवलिंगिब्राह्मणांमध्यें जे थोडेबहुत शास्त्री वैदिक असतील त्यांनीं आपल्या शिष्यवर्गाला अध्ययन उपदेश व्याख्यान वगैरे उपायांनीं धर्म जागृति करावी, व जे गृहस्थ संपन्न असतील त्यांनीं कानाकोपऱ्यांत पडून राहिलेले आपले दुर्मिळ ग्रंथ बाहेर काढून त्यांचें सुगम भाषांतर करवून छापवून प्रसिद्धी करणें हा दुसरा धर्मोज्जीवनाचा उपाय होय. असो. सांप्रत या दुसऱ्या उपायाचें अवलंबन करून श्रीमंत रावसाहेब अप्पासाहेब वारद यांच्या आश्रयाखालीं १५ धर्म ग्रंथ छापवून प्रसिद्ध केले आहेत, त्यांपैकींच हा सिद्धांतशिखामणि नांवाचा १६ वा ग्रंथ होय. यामध्यें वीरशैवांस ज्या आवश्यक गोष्टी पाहिजेत, त्या आहेत. उदाहरणार्थ वीरशैवसिद्धांताचें आधिक्यप्रतिपादन, सिद्धांतग्रंथप्रामाण्यकथन, वीरशैवपदनिर्वचन, पिंडादिभक्तांतस्थलनिरूपण, अवांतरस्थलसहित एकोत्तरशतस्थलनिरूपण वगैरे विषय आहेत, या सर्व विषयांचें एक पुस्तक केलें तर मोठें पुस्तक होईल ह्मणून दोन भाग केले आहेत. त्यांत या पहिल्या भागांत प्रसादिस्थलापर्यंत ७४ विषय आहेत, व अकरा परिच्छेद आहेत. अशा या अमोलिक ग्रंथाचा उपयोग वीरशैवलिंगिब्राह्मण करून घेतील अशी पूर्ण आशा करितों.

प्रसिद्धिकर्ता.

विनंति.

उपयुक्त अशा वीरशैवलिंगिब्राह्मणग्रंथांपैकीं कोणत्याही पूर्ण अगर अपूर्ण ग्रंथाच्या हस्तलिखितप्रती कोणाजवळ असल्यास त्यांनीं त्या आह्मांकडे अगर रावसाहेब मल्लप्पा बसप्पा वारद यांचेकडे पाठवून देण्याची मेहरबानी करावी; ह्मणजे धर्मग्रंथ छापण्याचे कामीं त्यांचा चांगला उपयोग होईल, व धर्मोन्नतीच्या कामीं यथाशक्ति हातभार लावण्याचें श्रेयही मिळेल. त्या ग्रंथाचें काम संपतांच त्यांची मूळप्रत परत करूं व दोन छापील प्रतीही देऊं. आपली मूळप्रत मिळेल किंवा नाहीं याची शंका वाटल्यास, त्यांनीं आपली मूळप्रत परत मिळण्याविषयीं खात्री पटवून घेऊन मग आमचेकडे ग्रंथ पाठविण्याचें करावें.

प्रसिद्धिकर्ता.

छापत असलेले ग्रंथ.

१ बसवेश्वरपुराण (व्यासकृत) भाग २

२ सिद्धांतशिखामणि. भाग २

३ वीरशैवाचारप्रदीपिका.

४ शिवपुराण वायवीयसंहिता.

हे चार ग्रंथ मराठी अर्थासह लौकरच तयार होतील.

विक्रीस तयार असलेले १६ ग्रंथ सार्वजनिकसंस्थांमध्यें सर्व वर्गास हे आमचे ग्रंथ वाचण्यास मिळावे अशा हेतूनें ग्रंथाची किंमत निम्मी ठेविली आहे. लायब्ररीच्या सेक्रेटरींनीं किंवा मठाच्या अधिकाऱ्यांनीं पुस्तकाची मागणी करावयाची झाल्यास वरील संस्थांना पाहिजे आहे. निम्या किंमतीनें पाठवा असा खुलासा पत्रांत करावा.

विषयानुक्रमणिका.

पान.

परिच्छेद १

शिवपार्वतीनमस्काररूप मंगलाचरणाचें कथन. १

शिवयोगिवंशानुगत आचार्यांचें प्रकटन. ५

ग्रंथ कर्त्याच्या नामाच्या प्रशंसापूर्वक या ग्रंथाच्या अवतारक्रमाचें निरूपण. ७

परिच्छेद २

पार्वतीपरमेश्वरनमस्काररूप मंगलकथन. ११

जगाच्या सृष्टीचा क्रम उपपादन करावयासाठीं प्रथम परवस्तूच्या स्वरूपाचें कथन करणें.... ... ,,

जगत्सृष्टिप्रकारकथन. १२

जगाची सृष्टि करावयासाठीं आधीं ब्रह्मदेवास उत्पन्न करून त्याला शंकरानें सर्व विद्यांचा उपदेश केला. १५

जगत्सृष्टि करण्याचा उपाय मला सांग असा प्रश्न ब्रह्मदेवानें शंकरास केला. १६

जगत्सृष्टि करण्याचा उपाय ब्रह्मदेवास शंकरानें सांगितला. ... ... ,,

सृष्टि करण्याचा तो उपाय न समजल्यामुळें सृष्टि प्रत्यक्ष करून दाखीव, मग मी सृष्टि करतों, असें ब्रह्मदेवानें विचारिल्यावरून परमेश्वरानें प्रमथांची सृष्टि करून दाखविली. ... ... ,,

पान.

प्रमथांच्या सृष्टीमध्यें रेणुक दारुकांची उत्पत्ति सांगून त्यांच्या महात्म्याचें वर्णन केलें. १८

परिच्छेद ३

शिवयोगी अशा रेणुकाचार्याचें भूलोकावतरण सांगावयाकरितां प्रथम कैलासाचें वर्णन करणें. ... २०

सिंहासनावर बसलेल्या परमेश्वराचें वर्णन. २२

परमेश्वराच्या वामांकीं असलेल्या पार्वतीचें वर्णन. २५

देवांनीं केलेल्या शिवसेवेचें वर्णन. २९

प्रमथगणांचें वर्णन. ३१

वसिष्ठादिमुनींनीं केलेल्या शिवसेवेचें वर्णन. ३३

परमेश्वराच्या राजव्यापाराचें दर्शन. ,,

श्रीरेणुकगणेश्वरास शिवभक्तीचें महत्व सांगितलें.... ... ... ३५

दारुकगणेश्वराचा अपमान केल्यामुळें त्या दोषाचा उपभोग कर, असें श्रीरेणुकगणेश्वरास सांगितलें. ... ३७

जन्म घेण्यासाठीं भ्यालेल्या श्रीरेणुकानें शिवाची प्रार्थना केली. ... ,,

स्तोत्र करीत असलेल्या श्रीरेणुकगणेश्वरास समाधानपर वाक्य कथन केलें. ३८

परिच्छेद ४

श्रीरेणुकगणेश्वराच्या स्वरूपाचें निरूपण. ४०

	पान.
मर्त्य लोकास आलेल्या श्रीरेणुकास 'तूं कोण आहेस' असा प्रश्न लोकांनीं केला, नंतर त्यांना उत्तर देत देत रेणुकानें मलयाचलाला प्रयाण केलें.	४२
मलयपर्वताचें वर्णन.	४३
अगस्त्याश्रमाचें वर्णन.	,,
अगस्त्यमुनीचें वर्णन.	४५
आपल्या आश्रमांत आलेल्या रेणुकाची पूजा अगस्त्यानें केली. ...	४७
कुशलप्रश्नपूर्वक अगस्त्याचें वर्णन श्रीरेणुकानें केलें.	४८
श्रीरेणुकाचार्याच्या दर्शनानें प्राप्त झालेल्या आपल्या सौभाग्याचें वर्णन अगस्त्यानें केलें. ...	५०
वेदालाही संमत असलेला शैवसिद्धांत आह्मास सांग, अशी प्रार्थना अगस्त्यानें श्रीरेणुकास केली.	५१

परिच्छेद ५

प्रथम मंगलाचरण करून शैवसिद्धांत अगस्त्यास सांगावयास श्रीरेणुकानें आरंभ केला.	५३
शैवसिद्धांताचें आधिक्य प्रतिपादन करण्यासाठीं इतर सिद्धांत पुष्कळ आहेत, असें सांगणें.	,,
सिद्धांतग्रंथांच्या नामाचें प्रतिपादन करून त्या ग्रंथाला प्रामाण्य सिद्ध करून दाखविलें.	५४
शिवानें सांगितलेलें सिद्धांत नांवाचें शैवतंत्र वेदाप्रमाणें प्रमाणभूत आहे, असें सांगणें.	५५
सिद्धांताख्य शिवागमांमध्यें वीरशैव मत श्रेष्ठ आहे असें सांगणें. ...	५७

	पान.
वीरशैवपदाचें निर्वचन.	५७
वीरमाहेश्वर शब्दाचें निर्वचन. ...	५८
वीरशैव वीरमाहेश्वर शब्दाचें निर्वचन	,,
वीरशैवभेदनिरूपण.	६०
स्थलक्रमनिरूपण.	,,
भक्तस्थलाचें व त्याच्या अवांतरस्थलाचें निरूपण.	६१
पिंडादि भक्तस्थल व अवांतर स्थल मिळून १५ आहेत, असें वर्णन करणें.	,,
एकोत्तरशतस्थलांमध्यें मुख्य अशा पिंडस्थलाचें निरूपण.	६२
पिंडज्ञानस्थलनिरूपण.	७३
संसारहेयस्थलनिरूपण.	७६

परिच्छेद ६

दीक्षालक्षण व गुरुकारुण्यस्थलनिरूपण.	८२
लिंगधारणस्थलनिरूपण.	८८

परिच्छेद ७

विभूतिस्थलाचें निरूपण.	१०१
भस्मधारणस्थलनिरूपण.	१०५
रुद्राक्षधारणस्थलाचें निरूपण ...	११३

परिच्छेद ८

पंचाक्षरीजपस्थलाचें निरूपण. ...	१२०

परिच्छेद ९

भक्तमार्गक्रियास्थलाचें निरूपण. ...	१३८
उभय (गुरुलिंगोभय) स्थलाचें निरूपण.	१५३
त्रिविध (गुरु लिंग जंगम) संपत्तिस्थलाचें निरूपण.	१५५
चतुर्विधसारायस्थलाचें निरूपण. ...	१५८
उपाधिमाटस्थलाचें निरूपण. ...	१६१
दानत्रयस्थलाचें निरूपण.	,,

पान.

परिच्छेद १०

भक्तस्थलाचें निरूपण झाल्यानंतर
माहेश्वरस्थलाचें निरूपण. ... १६७
लिंगनिष्ठास्थलाचें निरूपण. ... १७२
पूर्वाश्रयनिरसनस्थलाचें निरूपण. ... १७५
सर्वाद्वैतनिरसनस्थलाचें निरूपण. १७८
शिवलिंगामध्यें शिवाह्वाननिरसन
स्थलाचें निरूपण. १८०
अष्टमूर्तिनिरसनस्थलाचें निरूपण. १८१
सर्वगत्वनिरसनस्थलाचें निरूपण. १८४

पान.

शिवजगन्मयस्थलाचें निरूपण. ... १८६
भक्तदेहिक लिंगस्थलाचें निरूपण. १९०

परिच्छेद ११

प्रसादिस्थलाचें निरूपण. १९३
गुरुमाहात्म्यस्थलाचें निरूपण. ... १९८
लिंगमाहात्म्यस्थलाचें निरूपण. ... २००
जंगममाहात्म्यस्थलाचें निरूपण. ... २०३
भक्तमाहात्म्यस्थलाचें निरूपण. ... २०६
शरणमहत्वस्थलाचें निरूपण. ... २१०
प्रसादमहत्वस्थलाचें निरूपण. ... २१३

संस्कृतशुद्धिपत्रिका.

पृ.	पं.	अशुद्ध	शुद्ध
२	१०	समुलेख	समुल्लेख
३७	१	रणुकाय	रेणुकाय
४७	२५	तस्या	तस्य
५३	१२	प्रवण	प्रणव
६५	२९	नामारूपिणी	नानारूपिणी
६६	१३	बहिः योगीव	बहिः ॥ योगीव
,,	१९	समान सत्ताका	समानसत्ताका
,,	२१	लक्षणा	लक्षणा ॥
,,	२२	स्वरूपिणी	स्वरूपिणी ॥
६७	१४	तथाप्यशे	तथाप्यंशे
,,	२२	जीवेशयोर्भिदा	जीवेशयोर्भिदा ॥
,,	,,	मनादयः	मनादयः ॥
,,	३१	व्यतिरेकी दृष्टांतस्यापि	व्यतिरेकिदृष्टांतस्यापि
७०	३०	ज्ञानर्जिताः	ज्ञानवर्जिताः
७४	७	दनुभूस्मृतेरपि	दनुभूतस्मृतेरपि
८९	,,	मूलपचाक्षरी	मूलपंचाक्षरी
९४	४	विभावयेतू	विभावयेत्
९६	५	ल्लिगं	ल्लिंगं
१००	१४	श्रीमत्पद	इति श्रीमत्पद
११३	५	घारी	धारी
११६	१५	शिवशक्त्वात्मक	शिवशक्त्यात्मक
१२२	३१	वितत्शव	शिवतत्व
,,	३०	इकारस्यैच्छा	इकारस्येच्छा
१२७	२	स्मृतः	स्मृतः ॥
१४२	२४	कायिकी	कायकी
,,	२७	कायिकी	कायकी
१४६	१६	तदा भृप्रति	तदाप्रभृति
१६४	४	विद्यानिधिगुरुः	विद्यानिधिर्गुरुः
१७०	१४	भगवानेक एक एव	भगवानेक एव
१८५	३०	अघोरा पापकाशीति	अघोराऽपापकाशीति

पृ.	पं.	अशुद्ध.	शुद्ध.
१९१	१६	अघोरा पाप	अघोराऽपाप
१९२	२१	वियतांतरात्मा	नियतांतरात्मा
१९५	२२	प्रचपं	प्रपंच

मराठी शुद्धिपत्रिका.

पृ.	पं.	अशुद्ध	शुद्ध
१	२०	एकशे एक	एकशें एक
९	१९	एकोत्तर शतस्थल	एकोत्तरशतस्थल
,,	३१	पुन्हां	पुनः
१४	१३	अनंत महिम्याचें	अनंत महिमांचें
१६	४	सर्व लोक (जग)	सर्व जग
१८	२३	कार्मिक मलापासून	कार्मिकमल यांपासून
२४	२७	हलाहल	हालाहल
३४	१८	बोलाऊन	बोलावून
४१	१४	अद्वैत शास्त्र	अद्वैतशास्त्र
४८	९	पुथ्वीवर	पृथ्वीवर
५०	२६	मूर्च्छित	मूर्छित
६२	१०	त्यांनीं	त्यांचीं
७१	११	चौऱ्यांशी	चौऱ्याऐंशी
८४	७	वाडवडलापासून	वाडवडिलापासून
१०३	११	मुखापखूना	मुखापासून

पान १४६ ओळी ३।४।५।

अर्थ–॥ २६ ॥ शिवभक्ताची पूजा केली तर पूजा करणाऱ्याला उत्तम गति मिळते, परंतु शिवभक्ताचा अपमान केला तर अपमान करणारा प्राणी भयंकर नरकाला जातो.

पान १५१ ओळी १२।१३।१४

अर्थ–॥ ४५ ॥ ज्या घरांत शिवपूजा करीत असताना स्त्री बाळंतीण होते, त्या घराला जननाशौचाचा दोष मुळींच नाहीं असें समजावें. कारण तेथें शिवपादोदक पडत असल्यामुळें सर्व पातकें त्या उदकस्पर्शानें नाहींशीं होतात.

१६२	४	सर्व प्रकारचें	सर्व प्रकारचे
१९३	१७	आपाप	आपोआप

॥ श्रीनंदिकेश्वराय नमः ॥

श्रीसिद्धान्तशिखामण्याख्यं वीरशैवमतबोधकं शास्त्रं.

प्रथमपरिच्छेदप्रारंभः ।

श्लोकः–श्रीनाथः सोममूर्तिर्जयति परशिवस्त्र्यंबकस्ताररूपः
स्वच्छश्रीब्रह्मरन्ध्रस्थितसितजलजप्रोद्यदब्जत्रिकोणे ॥
इच्छाज्ञानक्रियाख्ये त्रिविधलिपिमये हक्षलार्णाग्रपार्श्वे
कृत्स्नार्णौन्मुख्यबिंदौ चिदचिदुदयकृद्दृक्क्रियांघ्रिद्वयाढ्यः ॥ १ ॥
अनेकविधसिद्धान्तशिखामणिमनामयं ॥
श्रीवीरशैवसिद्धान्तमेकोत्तरशतस्थलं ॥ २ ॥
रेणुकागस्त्यसंवादं निगमागमविश्रुतं ॥
प्रदीपयति गुप्तार्थमुद्धृत्य शिवयोगिराट् ॥ ३ ॥

अर्थ–॥ १ ॥ श्रीस्वामी सोमेश्वर ह्याचा जय असो, त्याचें चंद्रासारखें तेज आहे, हा श्रेष्ठ शिव आहे, ह्याचें तार रूप आहे, निर्मल ब्रह्मरंध्रांत असणाऱ्या पांढऱ्या कमलाप्रमाणें सुशोभित कमलाचे तीन कोपरे असणाऱ्या, इच्छा ज्ञान आणि क्रिया नांवाच्या, तीन प्रकारच्या लिपि असणाऱ्या ह क्ष ल हे वर्ण पुढेंमागें असणाऱ्या परिपूर्ण मुख्य बिंदूमध्यें तो राहतो? चित् आणि अचित् ह्या दोहोंचा तो उदय करणारा असून दृष्टि आणि क्रिया हे त्याचे दोन बळकट पाय आहेत. ॥ २ ॥ हा सिद्धांतशिखामणिग्रंथ अनेक प्रकारच्या सिद्धांतशास्त्रांच्या ग्रंथांत श्रेष्ठ आहे, ह्यास कोणताही दोष नाहीं. ह्यांत वीरशैवांच्या मतांचा निर्णय केलेला असून ह्यांत एकशें एक स्थलांचें वर्णन आहे. ॥ ३ ॥ ह्यांत रेणुकाचें आणि आणि अगस्त्याचें संभाषण आहे. हा सिद्धांतशिखामणिग्रंथ वेद आणि शिवागम ह्यांस संमत आहे, त्याचा अर्थ फार खोल आहे, तो शिवयोगीश्वरानें सुलभ रीतीनें कळेल असा केला.—

अवतरणिका–अत्र कलिकालप्रवेशानंतरं लोकहितार्थं रेणुकगणेश्वर इति प्रसिद्धः रेवणसिद्धेश्वरः कुंभसंभवाय वीरशैवशा-

स्त्रमुपदेष्टवान् तदनंतरं रेवणसिद्धेश्वरदृष्टिगर्भसंभूतसिद्धरामेश्वरसंप्रदायप्रसिद्धः सकलनिगमागमपारगः शिवयोगीश्वर इत्यभिधानवान् कश्चिन्माहेश्वरः तद्रेणुकागस्त्यसंवादं निर्विघ्नेन स्वशिष्यान्बोधयितुं स्वमनसि कृतसकलसिद्धान्तश्रेष्ठनिगमागमैक्यगर्भीकारलक्षणस्वेष्टदेवतानमस्काररूपमंगलं शिष्यशिक्षार्थं सप्तभिः श्लोकैर्निबध्नाति—

श्लोकः—त्रैलोक्यसम्पदालेख्यसमुल्लेखनभित्तये ॥
सच्चिदानंदरूपाय शिवाय ब्रह्मणे नमः ॥ १ ॥

व्याख्यानं—जगद्रूपमायिकसम्पच्चित्रसमुलेखनाधारभित्तिरूपाय सच्चिदानंदस्वरूपाय जडजीवविलक्षणाय ब्रह्मणे वेदान्तप्रतिपाद्याय शिवाय शिवसिद्धांतप्रसिद्धपरमशिवाय नम इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ त्रैलोक्यांतील संपत्तिरूप चित्र काढण्याची मूर्तिमंत भिंत, अशा सच्चिदानंदस्वरूप शिवपरब्रह्माला नमस्कार असो.

श्लोकः—ब्रह्मेति व्यपदेशस्य विषयं यं प्रचक्षते ॥
वेदान्तिनो जगन्मूलं तन्नमामि परं शिवं ॥ २ ॥

व्याख्यानं—ब्रह्मेति व्यपदेशस्य परब्रह्मेति शब्दस्य वेदान्तिनो यं परमात्मानं विषयमर्थं प्रचक्षते तं जगत्कारणं परशिवं शिवसिद्धान्तप्रसिद्धपरमशिवं नमामीत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ वेदान्ती लोक ज्याला ब्रह्म असें नांव देण्यास योग्य आहे असें मानतात व जो सर्व जगाचें मूलकारण आहे अशा त्या श्रेष्ठ शिवाला नमस्कार असो.

श्लोकः—यस्योर्मिबुद्बुदाभासः षट्त्रिंशत्तत्वसंचयः ॥
निर्मलं शिवनामानं तं वंदे चिन्महोदधिं ॥ ३ ॥

व्याख्यानं—शिवादिक्षित्यन्तषट्त्रिंशत्तत्वसमूहः यस्य परशिवाख्यचित्समुद्रस्य ऊर्मिबुद्बुदाभासः घृतकाठिन्यन्यायेनैकदेशे तरंगादिवदाभाति निर्मलं मलचयरहितं शिवनामानं तं चिन्महोदधिं वंदे नमस्करोमीत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ शंकर हा चैतन्यमहासमुद्र आहे, छत्तीस तत्वांचा समुदाय हा त्या चैतन्यसमुद्राच्या लाटांवरील बुडबुड्यांचा आभास आहे, व तो निर्मल आहे, त्या शंकराला माझा नमस्कार असो.

श्लोकः–यद्भासा भासते विश्वं यत्सुखेनानुमोदते ॥
नमस्तस्मै गुणातीतविभवाय परात्मने ॥ ४ ॥

व्याख्यानं—"तस्य भासा सर्वमिदं विभाति" इति श्रुतेः विश्वं यस्य परब्रह्मणः प्रकाशेन प्रकाशते "अस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः यत्परब्रह्मसुखेनानुमोदते तस्मै मायिकसत्वरजस्तमोगुणातीतविभवाय परमात्मने शिवाय नम इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ ज्या शंकराच्या तेजानें सर्व विश्व प्रकाशित होतें, ज्या शंकराच्या सुखानें सर्व जग सुखी असतें, तो शंकर अमर्याद ऐश्वर्यवान् आहे, व परमेश्वर आहे, त्याला माझा नमस्कार असो.

श्लोकः–सदाशिवमुखाशेषतत्वोन्मेषविधायिने ॥
निष्कलंकस्वभावाय नमः शान्ताय शंभवे ॥ ५ ॥

व्याख्यानं—मयूराण्डरसन्यायेन स्वविमर्शशक्तिसामरस्यापन्नसदाशिवादिभूम्यन्तषट्त्रिंशतत्वविकासकारिणे विश्वदोषरहितस्वरूपाय सुखभोक्त्रे सुखधात्रे शंभवे नम इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ सदाशिवाच्या मुखांतील सर्व तत्वांचा विस्तार करणाऱ्या, निर्दोष स्वभाव असणाऱ्या त्या शांतस्वभावाच्या शंभूला नमस्कार असो.

श्लोकः–स्वेच्छाविग्रहयुक्ताय स्वेच्छावर्तनवर्तिने ॥
स्वेच्छाकृतत्रिलोकाय नमः सांबाय शंभवे ॥ ६ ॥

व्याख्यानं—"स्थिरेभिरंगैः पुरुरूप उग्रः" इति श्रुतेः भक्तानुग्रहार्थं स्वेच्छाकल्पितदिव्यमंगलविग्रहयुक्ताय स्वच्छंदचारिणे स्वेच्छाशक्तिनिर्मितलोकत्रयाय पार्वतीपतये परशिवाय नम इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ ज्यानें आपल्या इच्छेनें शरीर धारण केलें आहे, जो आपल्या इच्छेप्रमाणें वर्तन करितो, ज्यानें आपल्या इच्छेनें त्रैलोक्य निर्माण केलें आहे. त्या पार्वतीसह असणाऱ्या शिवास नमस्कार असो.

श्लोकः–यत्र विश्राम्यतीशत्वं स्वाभाविकमनुत्तमं ॥
नमस्तस्मै महेशाय महादेवाय शूलिने ॥ ७ ॥

व्याख्यानं—यत्र वेदागमप्रसिद्धपरब्रह्माख्यपरशिवे अनुत्तमं विश्वतः श्रेष्ठं स्वाभाविकममायीयमीशत्वमुमामहेश्वरत्वं विश्राम्यति ॥ "घृतकाठिन्यवन्मूर्तिः सच्चिदानंदलक्षणा ॥ शिवाभिधेन सैवास्ति शिव एव हि सा सदा ॥" इति सूतगीतोक्तेस्तादात्म्यं भजते तस्मै महेश्वराय "तमीश्वराणां परमं महेश्वरं" इति श्रुतेः ब्रह्मादिकारणेश्व-

राय महादेवाय अपरमितप्रकाशरूपाय शूलिने इच्छाज्ञानक्रियाशक्तिमयत्रिशूलिने परमशिवाय नम इत्यर्थः। अनेनायं सिद्धान्तो निर्विशेषब्रह्माद्वैतलक्षण इत्यनुसंधेयः, एवंविधश्लोकसप्तकप्रतिपादितं वस्तु तत्परं ब्रह्म स एकः स एको रुद्रः स ईशानः स भगवान्स महेश्वरः स महादेव इत्यथर्वशिरोपनिषदुक्तप्रकारेणैकमेवेति शिवाद्वैतशास्त्रप्रवीणैरवगन्तव्यं ॥ ७ ॥

अर्थ-॥ ७ ॥ ज्याला स्वाभाविक व अनुपमेय असा ईश्वर हा शब्द योग्य रीतीनें लागू पडतो, त्या शूल धारण करणाऱ्या, सर्व देवांच्या देवाला, महादेवाला नमस्कार असो.

अवतरणिका-एवं वेदागमसम्मत्या सप्तभिः श्लोकैः शिवं नमस्कृत्य तथैव वेदागमादिप्रसिद्धनित्यसमवेतशिवशक्तिं पंचभिः श्लोकैः प्रस्तौति—

श्लोकः-यामाहुः सर्वलोकानां प्रकृतिं शास्त्रपारगाः ॥
तां धर्मचारिणीं शंभोः प्रणमामि परां शिवां ॥ ८ ॥

व्याख्यानं—वेदागमादिशास्त्रपारंगताः शिवज्ञानिनः यां परशिवसमवेतशक्तिं सर्वलोकानां प्रकृतिं मूलकारणीभूतज्ञानक्रियासामरस्यात्मिकामाहुः तां शम्भोर्धर्मचारिणीं धर्मस्वरूपां परां सर्वोत्कृष्टां शिवां भवानीं प्रणमामीत्यर्थः ॥ ८ ॥

अर्थ-॥ ८ ॥ शास्त्र जाणते लोक जिला सर्व लोकांची प्रकृति असें ह्मणतात त्या शंकराच्या पत्नीला श्रेष्ठ पार्वतीला मी नमस्कार करितों.

श्लोकः-यया महेश्वरः शंभुर्नामरूपादिसंयुतः ॥
तस्यै मायास्वरूपायै नमः परमशक्तये ॥ ९ ॥

व्याख्यानं—यया स्वसमवेतशक्त्या महेश्वरः ब्रह्मादिसर्वकारणेश्वरः शंभुः शिवः शक्तो यया स शंभुर्भुक्तौ मुक्तौ च पशुगणस्यास्येति तत्वप्रकाशवाक्यानुसारेण नामरूपक्रियाविशिष्टः जीवानां भुक्तिमुक्तिप्रदः स्यात्तस्यै मायास्वरूपायै ॥ "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुतेः प्रतिस्फुरणगत्या जगदुपादानकारणीभूतसत्वरजस्तमोगुणात्ममायाख्यमूलप्रकृत्यै परमशक्त्यै परमशिवसमवेतनित्यशक्त्यै नम इत्यर्थः ॥ ९ ॥

अर्थ-॥ ९ ॥ जिच्यामुळें त्रैलोक्यपति शंकर देहधारी बनला, त्या मायास्वरूप श्रेष्ठशक्ति पार्वतीला नमस्कार असो.

श्लोकः-शिवाद्यादिसमुत्पन्नशांत्यतीतपरोत्तरां ॥
मातरं तां समस्तानां वंदे शिवकरीं शिवां ॥ १० ॥

व्याख्यानं—शिवात्परशिवादाद्यादिपटगतशुक्लत्ववत्पूर्वं समुत्पन्ननिवृत्तिप्रतिष्ठाविद्याशांतिशान्त्यतीतकलापरकुण्डलिनीशक्त्यपेक्षया उत्तरां श्रेष्ठां समस्तानां मातरं शिवकरीं मंगलकरीं तां शिवां सर्वमंगलां नमामीत्यर्थः ॥ १० ॥

अर्थ–॥ १० ॥ ज्याप्रमाणें वस्त्र अगोदर उत्पन्न झालें किंवा वस्त्रांतील पांढरेपणा अगोदर उत्पन्न झाला हें सांगतां येत नाहीं, त्याप्रमाणेंच शिव अगोदर उत्पन्न झाला किंवा पार्वती अगोदर उत्पन्न झाली, ह्याचा निश्चय करितां येत नाहीं अशी, जी पार्वती परकुंडलिनी आदिकरून सात शक्तींहून श्रेष्ठ आहे, सर्व जगाची माता आहे व कल्याणकारक आहे, तिला हा नमस्कार असो.

श्लोकः–इच्छाज्ञानादिरूपेण या शंभोर्विश्वभाविनी ॥
वंदे तां परमानंदप्रबोधलहरीं शिवां ॥ ११ ॥

व्याख्यानं—शंभोः परमेश्वरस्य या समवेतशक्तिः इच्छाज्ञानादिरूपेण "परास्य शक्तिर्विमला वितर्का स्वाभाविकी रुद्रसमानधर्मिणी ॥ ज्ञानक्रियेच्छादिसहस्ररूपा तन्मे मनः शिवसंकल्पमस्तु" इति श्रुतेः इच्छादिरूपेण विश्वभाविनी विश्वप्रकाशिनी तां परमानंदप्रबोधलहरीं चिदानंदोल्बणां शिवां वंदे इत्यर्थः ॥ ११ ॥

अर्थ–॥ ११ ॥ इच्छा ज्ञान वगैरे रूपांनीं जी शंकराची विश्व निर्माण करण्याचे कामांत बरोबरी करिते, व अतिशय आनंद आणि ज्ञान ह्यांची जी मूर्ति आहे अशा पार्वतीला नमस्कार असो.

श्लोकः–अमृतार्थं प्रपन्नानां या सुविद्याप्रदायिनी ॥
अहर्निशमहं वंदे तामीशानमनोरमां ॥ १२ ॥

व्याख्यानं—अमृतार्थं मुक्त्यर्थं प्रपन्नानां शरणागतानां या शिवसमवेतशक्तिः सुविद्याप्रदायिनी "वेदान्तवाक्यजा विद्या" इति सूतसंहितोक्तेः तत्वमस्यादिवेदान्तमहावाक्यप्रकाशितशिवजीवैक्यविद्याप्रदायिनी तां शिवप्राणकांतां अहर्निशं वंदे नमस्करोमीत्यर्थः "अनन्या स्याच्छिवा सैव वस्तुतो मूर्तिरैश्वरी" इति पौष्करवचनात् एतत्पंचसूत्रप्रतिपादितां शक्तिं शिवाभेदेनैव परामृशेदिति ॥ १२ ॥

अर्थ–॥ १२ ॥ मोक्षप्राप्ति आपणास व्हावी, अशी इच्छा करणाऱ्यास जी पार्वती चांगली विद्या शिकविते, (देते,) त्या महादेवाच्या स्त्रियेला (पार्वतीला) मी नेहमीं नमस्कार करितों.

अवतरणिका–एवं संग्रहेण पार्वतीपरमेश्वरौ नमस्कृत्वाऽनंतरमष्टभिः श्लोकैः शिवयोगिवंशानुगताचार्यान्प्रकटयति—

श्लोकः–कश्चिदाचारसिद्धानामग्रणीः शिवयोगिनां ॥
शिवयोगीति विख्यातः शिवज्ञानमहोदधिः ॥ १३ ॥

व्याख्यानं—शिवयोगिनां मध्ये अग्रणीः श्रेष्ठः शिवज्ञानमहोदधिः शिवज्ञानस्य समुद्रः कश्चिद्देवणसिद्धेश्वरदृष्टिगर्भसंभूतसिद्धरामेश्वरः आचारसिद्धानां सदाचारसंपन्नानां वंशे शिवयोगीति विख्यातः आसीदित्यर्थः ॥ १३ ॥

अर्थ—॥ १३ ॥ आचारामुळें सिद्धपणा पावलेल्या शिवयोग्यांचा प्रमुख कोणी शिवयोगी नांवाचा प्रसिद्ध विद्वान् होता, तो शिवज्ञानाचा समुद्रच होता.

श्लोकः–शिवभक्तिसुधासिंधुजृंभणामलचंद्रिका ॥
भारती यस्य विदधे प्रायः कुवलयोत्सवं ॥ १४ ॥

व्याख्यानं—यस्य शिवयोगीति प्रसिद्धस्य सिद्धरामेश्वरस्य भारती वाक् शिवभक्तिसुधासमुद्रवर्धनस्यामलचंद्रिकाप्रायः आधिक्येन कुवलयोत्सवं भूमण्डलाख्यनीलोत्पलस्योत्सवं विदधे कृतवतीत्यर्थः ॥ १४ ॥

अर्थ–॥ १४ ॥ त्या शिवयोग्याची वाचा शिवभक्तिरूप अमृतसमुद्रास भरती आणणारें स्वच्छ चांदणेंच होतें, व त्यामुळें सर्व पृथ्वीस बहुधा संतोष होत होता.

अवतरणिका–तदेव विवृणोति––

श्लोकः–तस्य वंशे समुत्पन्नो मुक्तामणिरिवामलः ॥
मुद्ददेवाभिधाचार्यो मूर्धन्यः शिवयोगिनां ॥ १५ ॥

व्याख्यानं—तस्य सिद्धरामेश्वरस्य वंशे शिववेदिनां शिवज्ञानिनां मध्ये मूर्धन्यः श्रेष्ठः मुद्दवाख्यार्यः निर्मलमुक्तामणिरिव समुत्पन्नः उद्भूतवानित्यर्थः ॥ १५ ॥

अर्थ–॥ १५ ॥ त्याच्या वंशांत मोत्यांप्रमाणें स्वच्छ असा मुद्ददेव नांवाचा आचार्य जन्मला, तो सर्व शिवयोग्यांत श्रेष्ठ होता.

श्लोकः–मुद्दानात्सर्वजन्तूनां प्रणतानां प्रबोधतः ॥
मुद्ददेवेति विख्यातसमाख्या यस्य विश्रुता ॥ १६ ॥

व्याख्यानं—सर्वप्राणिनां संतोषदानात्प्रणतानां प्रबोधनात् मुद्ददेवेति यस्यान्वर्थरूढिभ्यां विख्याता समाख्या विश्रुता लोकप्रसिद्धेत्यर्थः ॥ १६ ॥

अर्थ–॥ १६ ॥ त्या मुद्ददेवाला "मुद्देव" असें नांव पडण्याचें कारण, तो आपणास शरण आलेल्या सर्व प्राणिमात्रांस संतोष देत होता, त्यामुळेंच "मुद्द-देव" संतोष देणारा, असें नांव जगांत प्रसिद्ध झालें.

श्लोकः–तस्यासीन्नंदनः शान्तः सिद्धनाथाभिधः शुचिः ॥
शिवसिद्धान्तनिर्णेता शिवाचार्यः शिवात्मकः ॥ १७ ॥

व्याख्यानं—तस्य मुद्ददेवस्य शुचिः पवित्रः शान्तः रागद्वेषरहितः शिवात्मकः शिवस्वरूपः शिवसिद्धान्तनिर्णेता त्रिपदार्थचतुष्पादयुक्तशिवागमार्थनिर्णायकः शिवा-

चार्यः शिवसमयस्थापनाचार्यः सिद्धनाथाभिधः सिद्धरामेश्वराभिधासंयुक्तः सिद्धनाथाचार्याख्यो नंदनः कुमार आसीदभवदित्यर्थः ॥ १७ ॥

अर्थ–॥ १७ ॥ मुद्देवाचा मुलगा सिद्धनाथ नांवाचा शांत आणि पवित्र आचरण करणारा होता; तो शिवसिद्धान्ताचा निर्णय करणारा असून शिवमती होता, व केवळ शिवस्वरूपच होता.

श्लोकः–वीरशैवशिखारत्नं विशिष्टाचारसम्पदं ॥
शिवज्ञानमहासिंधुं यं प्रशंसन्ति देशिकाः ॥ १८ ॥

व्याख्यानं—विशिष्टाचारसंपदं सदाचारसंपन्नं शिवज्ञानमहासिंधुं यं सिद्धनाथाचार्यं देशिका आचार्या वीरशैवशिखारत्नं वीरशैवानां शिरोमणिं श्रेष्ठं सन्तं प्रशंसन्ति कथयन्तीत्यर्थः ॥ १८ ॥

अर्थ–॥ १८ ॥ श्रेष्ठ लोक हा सिद्धनाथ वीरशैवांचा मुकुटमणि आहे, उत्तम प्रकारच्या आचाराची मूर्तिमन्त संपत्ति आहे, व शिवज्ञानाचा महासमुद्र आहे, अशी प्रशंसा करीत असत.

श्लोकः–यस्याचार्यकुलाज्जातास्सतामाचारमातृकाः ॥
शिवभक्तिः स्थिरा यस्मिन् यज्ञे विगतविप्लवाः ॥ १९ ॥

व्याख्यानं—सतां सत्पुरुषाणां आचारमातृका यस्य सिद्धनाथाचार्यस्य आचार्यकुलात् आचार्यवंशात् जाता विगतविप्लवा विगतदोषा शिवभक्तिरष्टविधा यस्मिन् स्थिरा जज्ञे जातेत्यर्थः ॥ १९ ॥

अर्थ–॥ १९ ॥ सज्जनांस आचार शिकविणारी माता अशी शिवभक्ति ज्या सिद्धनाथाच्या कुळांत उत्पन्न झाली होती (सिद्धनाथाचा वंश मोठा शिवभक्त होता.) ह्मणून त्या सिद्धनाथाच्या अंगांत शिवभक्ति निश्चळपणानें राहिली.

श्लोकः–तस्य वीरशिवाचार्यशिखारत्नस्य नंदनः ॥
अभवच्छिवयोगीति सिन्धोरिव सुधाकरः ॥ २० ॥

व्याख्यानं—वीरशैवशिखामणेस्तस्य सिद्धनाथाचार्यस्य नंदनः कुमारः सिंधोः समुद्रस्य सुधाकर इव शिवयोगीति आसीत् प्रसिद्धो जात इत्यर्थः ॥ २० ॥

अर्थ–॥ २० ॥ त्या सिद्धनाथ वीरशैवाचार्य मुकुटमणीचा मुलगा शिवयोगी नांवाचा होता, समुद्रास जसा चंद्र मुलगा सुख देतो, तसाच तो बापास सुख देणारा होता.

अवतरणिका–अथैतच्छास्त्रसंग्रहकर्ताऽयं शिवयोगी द्वादशसूत्रैः स्वनामप्रशंसापूर्वकं शास्त्रावतारक्रमं निरूपयति—

श्लोकः–चिदानंदपराकाशशिवानुभवयोगतः ॥
शिवयोगीति नामोक्तिर्यस्य याथार्थ्ययोगिनी ॥ २१ ॥

व्याख्यानं—यस्य आचार्यस्य "सत्यं ज्ञानमनन्तं ब्रह्म आकाशशरीरं ब्रह्मेत्यादिश्रुतेः" चिदानंदपराकाशरूपशिवानुभवयोगात् शिवयोगीति नामोक्तिः याथार्थ्ययोगिनी यथार्थेन संयुक्ता भवतीत्यर्थः ॥ २१ ॥

अर्थ–॥ २१ ॥ चिदानंदरूप व ब्रह्मरूप अशा शिवाचा अनुभव आल्यामुळें, त्याचें शिवयोगी असें नांव अगदीं रास्त होतें.

श्लोकः–शिवागमपरिज्ञानपरिपाकसुगन्धिना ॥
यदीयकीर्तिपुष्पेण वासितं हरितां मुखं ॥ २२ ॥

व्याख्यानं—उक्तलक्षणशिवागमपरिज्ञानपरिपाकसुगंधिना यदीयकीर्तिपुष्पेण यस्याचार्यस्य कीर्तिकुसुमेन हरितां दिशां मुखं वासितं पोषितमित्यर्थः ॥ २२ ॥

अर्थ–॥ २२ ॥ शिवागमाचें ज्ञान परिपूर्ण दशेला आल्यामुळें सुगंधित झालेल्या त्याच्या कीर्तिरूप पुष्पांनीं दहाही दिशा सुगंधित झाल्या होत्या. (हा शिवयोगी शिवागमाचा पूर्ण ज्ञाता आहे असा त्याचा लौकिक दाही दिशांत पसरला होता.

श्लोकः–येन रक्षावती जाता शिवभक्तिः सनातनी ॥
बुद्धादिप्रतिसिद्धान्तमहाध्वान्तांशुमालिना ॥ २३ ॥

व्याख्यानं—बौद्धादिशिवसमयप्रतिकूलसिद्धान्तान्धकारचण्डकिरणेन येनाचार्येण सनातनी शिवभक्तिः रक्षावती जाता रक्षिताभूदित्यर्थः ॥ २३ ॥

अर्थ–॥ २३ ॥ ज्यानें बौद्धादिक अनेक अन्यमती लोकांच्या मतरूपी अंधाराचें सूर्याप्रमाणें खंडन करून सनातन अशा शिवभक्तीचें रक्षण केलें.

श्लोकः–स महावीरशैवानां धर्ममार्गप्रवर्तकः ॥
शिवतत्वपरिज्ञानचंद्रिकावृतचंद्रमाः ॥ २४ ॥

व्याख्यानं—शिवतत्वज्ञानरूपचंद्रिकावृतचंद्रमाः स शिवयोगी महावीरशैवानां धर्ममार्गप्रवर्तकः तदीयाचारमार्ग एव वर्तनवानित्यर्थः ॥ २४ ॥

अर्थ–॥ २४ ॥ तो शिवयोगी महावीरशैवांचा धर्ममार्ग स्थापन करणारा होता, व शिवज्ञानरूप चांदण्यानें तो चंद्रासारखा शोभत होता.

श्लोकः–आलोक्य शैवतंत्राणि कामिकाद्यानि सादरं ॥
वातुलान्तानि शैवानि पुराणान्यखिलानि तु ॥ २५ ॥

व्याख्यानं—कामिकादिवातुलान्तशैवतन्त्राणि शैवान्यखिलानि पुराणानि च प्रीतियुक्तं यथाभवति तथा आलोक्य ॥ २५ ॥

अर्थ–॥ २५ ॥ त्यानें कामिकागमापासून वातुलागमापर्यंत अठ्ठावीस आगम व सर्व शैवपुराणें लक्ष्य लावून वाचिलीं होतीं.

श्लोकः–वेदमार्गाविरोधेन विशिष्टाचारसिद्धये ॥
असन्मार्गनिरासाय प्रमोदाय विवेकिनां ॥ २६ ॥

व्याख्यानं—वैदिकमार्गाविरोधेन सदाचारसिद्धये दुर्जनजैनबौद्धादिशास्त्र-मार्गनिरासाय वेदागमविवेकिनां सन्तोषाय ॥ २६ ॥

अर्थ–॥ २६ ॥ वेदमार्गास बाध न येईल अशा रीतीनें, एकप्रकारचा उत्तम आचार प्रसिद्धीस आणण्यासाठीं, दुष्टमार्गाचा नाश होण्यासाठीं व विद्वान् लोकांस संतोष होण्यासाठीं,

श्लोकः–सर्वस्वं वीरशैवानां सकलार्थप्रकाशनं ॥
अस्पृष्टमखिलैर्दोषैरादृतं शुद्धमानसैः ॥ २७ ॥

व्याख्यानं—वीरशैवानां सर्वस्वं समस्तार्थप्रकाशकं समस्तदोषैरसंस्पृष्टं शुद्ध-मानसैः निगमागमज्ञानिभिः आदृतं संतोषितं ॥ २७ ॥

अर्थ–॥ २७ ॥ वीरशैव लोकांचें भूषणभूत, सर्व तऱ्हेचे अर्थ स्पष्ट रीतीनें कळविणारें, निर्दोष व विद्वान् लोक ज्याला आवडीनें स्वीकारतात, असें एकोत्तर शतस्थल वीरशैवाचें तंत्र केलें.

श्लोकः–तेष्वागमेषु सर्वेषु पुराणेष्वखिलेषु च ॥
पुरा देवेन कथितं देव्यै तन्नंदनाय च ॥ २८ ॥

व्याख्यानं—पूर्वोक्तागमपुराणेषु शिवेन देव्यै तन्नंदनाय षण्मुखायानुगृह्य कथितं ॥ २८ ॥

अर्थ–॥ २८ ॥ तें एकोत्तरशतस्थल सर्व शिवागमामध्यें व सर्व पुराणांमध्यें वर्णिलेलें असून, तें पूर्वी शंकरांनीं पार्वतीला आणि षडाननास सांगितलें होतें.

श्लोकः–तत्संप्रदायसिद्धेन रेणुकेन महात्मना ॥
गणेश्वरेण कथितमगस्त्याय पुनः क्षितौ ॥ २९ ॥

व्याख्यानं—तत्संप्रदायसिद्धेन महात्मना रेणुकगणाधीश्वरेण पुनः क्षितावगस्त्याय कथितं ॥ २९ ॥

अर्थ–॥ २९ ॥ शिवसंप्रदायानें वागणाऱ्या रेणुक नांवाच्या श्रेष्ठ प्रमथानें तेंच पुन्हां पृथ्वीवर अगस्त्यऋषीस सांगितलें.

२

श्लोकः–वीरशैवमहातंत्रमेकोत्तरशतस्थलं ॥

अनुग्रहाय लोकानामभ्यधात्सुधियां वरः ॥ ३० ॥

व्याख्यानं—एकोत्तरशतस्थलं पिण्डादिज्ञानशून्यान्तैरेकोत्तरशतस्थलं वीरशैवसिद्धान्तं लोकानामनुग्रहाय निर्मलज्ञानिनां मध्ये श्रेष्ठः शिवयोगिनाम्ना प्रख्याताचार्यः अभ्यधात् संग्रहेण प्रकटितवानित्यर्थः ॥ ३० ॥

अर्थ–॥ ३० ॥ हा शिवयोगी, एकोत्तरशतस्थलाचा कर्ता, मोठा विद्वान् असून त्यानें लोकांचा उपयोग व्हावा ह्या हेतूनें हें रचिलें आहे.

श्लोकः–सर्वेषां शैवतंत्राणामुत्तरत्वान्निरुत्तरं ॥

नाम्ना प्रतीयते लोके यत्सिद्धान्तशिखामणिः ॥ ३१ ॥

व्याख्यानं—यद्वीरशैवतंत्रं सर्वेषां शैवतंत्राणां उत्तरत्वात् निरुत्तरं स्वस्मादुत्तररहितं सत् सिद्धान्तशिखामणिरिति नाम्ना लोके प्रतीयते प्रतिभातीत्यर्थः ॥३१॥

अर्थ–॥ ३१ ॥ सर्व शैवतंत्रांतील ग्रंथांपेक्षां हा ग्रंथ श्रेष्ठ असून सर्वांस निरुत्तर करणारा आहे, ह्मणून त्यास सिद्धान्तशिखामणी असें नांव दिलें आहे.

वृत्तं–अनुगतसकलार्थे शैवतंत्रैः समस्तैः

प्रकटितशिवबोधाद्वैतभावप्रसादे ॥

विदधतु मतिमस्मिन्वीरशैवे विशिष्टाः

पशुपतिमतसारे पंडितश्लाघनीये ॥ ३२ ॥

व्याख्यानं—समस्तैर्वीरशैवतंत्रैरनुगतसमस्तरहस्यार्थे प्रकटितशिवाद्वैतज्ञानसमरसभावप्रसन्नतायुक्ते शिवसिद्धान्तसारे विद्वद्भिः स्तूयमानेऽस्मिन्सिद्धान्तशिखामणौ विशिष्टाः श्रेष्ठाः वीरशैवाः वीरशैवाचार्याः मतिं विदधतु कुर्वन्त्वित्यर्थः ॥३२॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धांतशिखामणिव्याख्यायां प्रथमपरिच्छेदः समाप्तः ॥

अर्थ–॥ ३२ ॥ ह्या ग्रंथावरून सर्व तऱ्हेचे अर्थ समजून येतात, सर्व तऱ्हेच्या शैवतंत्रांवरून हा ग्रंथ तयार केला असल्यामुळें शिवबोधाचें ज्ञान होऊन शिवाद्वैतमत चांगल्या रीतीनें ह्या ग्रंथावरून समजतें, शैवमतांत हा ग्रंथ श्रेष्ठ मानला जात असून विद्वान् लोकांस हा ग्रंथ मान्य आहे, ह्यासाठीं वीरशैव लोकांनीं ह्या ग्रंथाकडे आपलें लक्ष्य लावावें.

ह्याप्रमाणें महावीरशैव माहेश्वराचार्य शिवयोगी यानें तयार केलेल्या, वेद, शिवागम, पुराण वगैरे ग्रंथांत श्रेष्ठ असणाऱ्या सिद्धान्तशिखामणींतील अनुक्रमवर्णन नांवाचा पहिला परिच्छेद संपला.

द्वितीयपरिच्छेदप्रारंभः ॥

अवतरणिका–अथ शिवयोगिनामाचार्यः सूत्रद्वयेन निगमागमसम्मत्या पार्वतीपरमेश्वरौ प्रणमति—

श्लोकः–सच्चिदानंदरूपाय सदसद्व्यक्तिहेतवे ॥
नमः शिवाय सांबाय सगणाय स्वयंभुवे ॥ १ ॥

व्याख्यानं—सदसद्व्यक्तिहेतवे भावाभावमण्डलप्रपंचाविर्भावकारणाय भवानीपतये प्रमथगणसहिताय स्वयम्भुवे अयोनिजाय सच्चिदानन्दरूपाय शिवाय नम इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ सच्चिदानंदस्वरूप, भावाभाव प्रपंच दाखविण्याला कारण असणारा, स्वयंभु, (आपोआप जन्मलेला,) व ज्याच्या बरोबर प्रमथगण असतात, त्या पार्वतीसहित असणाऱ्या शिवास नमस्कार असो.

श्लोकः–सदाशिवमुखाशेषतत्वमौक्तिकशुक्तिकां ॥
वंदे माहेश्वरीं शक्तिं महामायादिरूपिणीं ॥ २ ॥

व्याख्यानं—सदाशिवादिभूम्यन्तषट्त्रिंशत्तत्वमौक्तिकोत्पत्तिशुक्तिरूपां शुद्धविद्याख्यमहामायाप्रकृतिरूपिणीं शिवसमवेतशक्तिं भवानीं वंदे नौमीत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ जी शंकराच्या मुखांतील सर्व तत्वरूप मोत्यांची शिंपली आहे, जी महामाया असून आदिरूपिणी आहे, जी महेश्वराची शक्ति आहे, त्या पार्वतीला नमस्कार असो.

अवतरणिका–अथ विश्वसृष्टिक्रममुपपादयितुं चतुर्भिः सूत्रैर्वस्तुनिर्देशं करोति—

श्लोकः–अस्ति सच्चित्सुखाकारमलक्षणपदास्पदं ॥
निर्विकल्पं निराकारं निरस्ताशेषविप्लवं ॥ ३ ॥

व्याख्यानं—सच्चिदानंदस्वरूपं चिन्हशून्यपदास्पदं भेदरहितं आकारशून्यं निवारितसकलोपप्लवं ॥ ३ ॥

अर्थ–॥ ३ ॥ शिव नांवाचें परब्रह्म सच्चित्सुखस्वरूप आहे, त्याचें लक्षण ह्मणून करितांच येत नाहीं, त्याला विकल्प नाहीं, त्याला आकार नाहीं, त्याचा नाश होत नाहीं.

श्लोकः–परिच्छेदकथाशून्यं प्रपंचातीतवैभवं ॥
प्रत्यक्षादिप्रमाणानामगोचरपदे स्थितं ॥ ४ ॥

व्याख्यानं—विच्छिन्नप्रसंगरहितं अप्राकृतवैभवं रूपरसाद्यभावेन प्रत्यक्षप्रमाणागम्यं अंतएवानुमानाद्यगम्यं तेषामपि प्रत्यक्षमूलत्वात् परिच्छिन्नत्वाच्च ॥ ४ ॥

अर्थ–॥ ४ ॥ त्याचे विभाग होण्याचें तर नांव देखील काढण्यास नको, त्याचें अलौकिक सामर्थ्य आहे, तें, प्रत्यक्ष, अनुमान, उपमान, शब्द वगैरे प्रमाणांवरून कळण्यासारखें नाहीं.

श्लोकः–स्वप्रकाशविराजन्तमनामयमनौपमं ॥
सर्वज्ञं सर्वगं शान्तं सर्वशक्ति निरंकुशं ॥ ५ ॥

व्याख्यानं—स्वप्रकाशेनैव प्रकाशमानं जननमरणादिदोषरहितं उपमातीतं सर्वज्ञं सर्वानुस्यूतं रागद्वेषरहितं सर्वसामर्थ्यं अनर्गलं निरोधरहितमिति यावत् ॥ ५ ॥

अर्थ–॥ ५ ॥ तें नेहमीं आपल्याच तेजानें प्रकाशित असतें, त्याला रोग नाहीं. त्याला उपमा नाहीं. तें सर्वज्ञ आहे, त्याची सर्वत्र गति आहे, तें शांत आहे, तें सर्वांहून शक्तिमान् आहे. त्याला कोठेंही प्रतिबंध होत नाहीं.

श्लोकः–शिवरुद्रमहादेवभवादिपदसंज्ञितं ॥
अद्वितीयमनिर्देश्यं परं ब्रह्म सनातनं ॥ ६ ॥

व्याख्यानं—शिवरुद्राद्यनेकपदसंज्ञितं द्वितीयशून्यं अवाच्यं नित्यं परं ब्रह्म अस्ति अस्तीत्यंगीकरणीयं अन्यथा जगदान्ध्यप्रसंगात् "असन्नेव स भवति असद्ब्रह्मेति वेद चेदस्तिब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः" इति श्रुतेः ॥ ६ ॥

अर्थ–॥ ६ ॥ त्याला शिव, रुद्र, महादेव, भव वगैरे नांवें आहेत. त्यासारखें दुसरें कोणी श्रेष्ठ नाहीं, तें अमुक तऱ्हेचें आहे ह्मणून सांगतां येत नाहीं, तें अनादिकालापासून असून श्रेष्ठ ब्रह्मस्वरूप आहे.

अवतरणिका–अथैवंविधक्रियाशक्तिमतः परब्रह्मणः सकाशात् "सदेव सौम्येदमग्र आसीत्" इति श्रुतेर्बीजांकुरन्यायेन विश्वसृष्टिप्रकारं दर्शयति—

श्लोकः–तत्र लीनमभूत्पूर्वं चेतनाचेतनं जगत् ॥
स्वात्मलीनं जगत्कार्यं स्वप्रकाश्यं तदद्भुतं ॥ ७ ॥

व्याख्यानं—तत्र तस्मिन्नुक्तलक्षणे परब्रह्मणि "चराचरमयं विश्वं" पूर्वं सृष्टेः

प्राक् लीनं अनुभयेंद्रियगोचरत्वेन तादात्म्येन स्थितं तदद्भुतमाश्चर्यं अनंतरमिति शेषः स्वात्मलीनं स्वात्मशक्तिलीनं जगत् योग्योपादानांतरराहित्येन स्वप्रकाश्यं द्वितीयस्याभावात्स्वेनैव प्रकाश्यं सत् कार्यमुभयेंद्रियगोचरत्वेन कर्तुं योग्यमभूदित्यर्थः ॥ ७ ॥

अर्थ-॥ ७ ॥ त्या ब्रह्मांत सृष्टीच्या पूर्वी तें चेतन आणि अचेतन जग लीन झालेलें होतें; तें ब्रह्म आत्मस्वरूपांत सर्वदा लीन असलेल्या जगाला, आपल्या तेजानें उत्पन्न करणारें आहे; असें तें विचित्र आहे.

अवतरणिका-अथ घृतकाठिन्यन्यायेन विश्वसृष्ट्युन्मुखीभूतशिवशक्तिस्वरूपं सूत्रषट्केन प्रदर्शयति—

श्लोकः-शिवाभिधं परं ब्रह्म जगन्निर्मातुमिच्छया ॥

स्वरूपमादधे किंचित्सुखस्फूर्तिविजृंभितं ॥ ८ ॥

व्याख्यानं—शिवाख्यं परं ब्रह्म विश्वसृष्ट्यर्थं स्वेच्छया सुखबाहुल्योच्छूनं किंचित्स्वरूपमंगीचकारेत्यर्थः ॥ ८ ॥

अर्थ-॥ ८ ॥ त्या शिव नांवाच्या परब्रह्मानें जग निर्माण करण्याच्या इच्छेनें, कांहींएक विशिष्ट रीतीचें सुख आणि ज्ञान असणारें स्वरूप घेतलें.

अवतरणिका-तत्स्वरूपं कुलकेनाह—

श्लोकः-निरस्तदोषसंबंधं निरुपाधिकमव्ययं ॥

दिव्यमप्राकृतं नित्यं नीलकण्ठं त्रिलोचनं ॥ ९ ॥

व्याख्यानं—निरस्तजरामरणादिसकलदोषसंबंधं स्वातिरिक्ताविद्याद्युपाधिशून्यं नाशरहितमत एव नित्यं कालत्रयाबाध्यमित्यर्थः अप्राकृतं प्रकृतिसंबंधरहितं नीलकण्ठं त्रिलोचनं ॥ ९ ॥

अर्थ-॥ ९ ॥ तें स्वरूप असें आहे कीं, त्याला दोष तर मुळींच नाहीं, त्याला उपाधि नाहीं, त्याला नाश नाहीं, तें दिव्य असून अलौकिक आहे, तें नित्य आहे, त्याला नीलकंठ ह्मणतात, त्रिलोचन ह्मणतात.

श्लोकः-चंद्रार्धशेखरं शुद्धं शुद्धस्फटिकसन्निभं ॥

शुद्धमुक्ताफलाभासमुपास्यं गुणमूर्तिभिः ॥ १० ॥

व्याख्यानं—चंद्रखण्डशेखरं शुद्धं पवित्रं शुद्धस्फटिकसंकाशं निर्मलमुक्तामणिप्रभं गुणमूर्तिभिर्ब्रह्मादिभिरुपास्यं ॥ १० ॥

अर्थ-॥ १० ॥ त्याच्या मस्तकावर अर्धचंद्र आहे, तें शुद्ध आहे, तें निर्मळ

स्फटिकासारखें आहे. निर्मळ मोत्यांसारखें तेजदार आहे, तें देहधारी मनुष्यांनीं उपासना करण्यायोग्य आहे.

श्लोकः–विशुद्धज्ञानकरणं विषयं सर्वयोगिनां ॥
कोटिसूर्यप्रतीकाशं चंद्रकोटिसमप्रभं ॥
अप्राकृतगुणाधारमनन्तमहिमास्पदं ॥ ११ ॥

व्याख्यानं—दिव्यं स्तुत्यं निर्मलज्ञानमयचक्षुरादिकरणप्रपंचं योगिनां प्रत्यक्षं कोटिसूर्यप्रकाशं चंद्रकोटिसमाभासं अप्राकृतानंतकल्याणगुणाश्रयं अतिदुर्घटकारिताद्यनेकमहिमाधारं किंचित्स्वरूपमादध इति पूर्वेण संबंधः ॥ ११ ॥

अर्थ–॥ ११ ॥ तें निष्पाप ज्ञान होण्यास कारणीभूत आहे, तें योगीश्वरांना अभ्यासाच्या योगानें प्रत्यक्ष प्राप्त होण्यासारखें आहे, कोटिसूर्यासारखें त्याचें तेज आहे, कोटिचंद्रासारखें तें शीतळ आहे. तें अलौकिक गुणांस आधारभूत आहे व अनंत महिम्याचें स्थान आहे.

अवतरणिका–अथ शिवस्य शक्तिस्वरूपं प्रकटयति—

श्लोकः–तदीया परमा शक्तिः सच्चिदानंदलक्षणा ॥
समस्तलोकनिर्माणसमवायस्वरूपिणी ॥ १२ ॥

व्याख्यानं—तदीया परशिवसंबंधिनी परमा शक्तिः परारूपा विमर्शशक्तिः सच्चिदानंदलक्षणा अस्तीति शेषः ॥ १२ ॥

अर्थ–॥ १२ ॥ त्याची परा नांवाची शक्ति सच्चिदानंद स्वरूपाचें लक्षण आहे; व ज्याप्रमाणें माती ही घटाला कारण असून, कार्यस्वरूप ह्मणजे घटाचें स्वरूप घेते, त्याप्रमाणेंच ही पराशक्ति विश्वाला कारण असून विश्वस्वरूप होते.

श्लोकः–तदिच्छयाभवत्साक्षात्तत्स्वरूपानुसारिणी ॥
स शंभुर्भगवान्देवः सर्वज्ञः सर्वशक्तिमान् ॥ १३ ॥

व्याख्यानं—"अहमस्मि" इति श्रुतेः अस्मिन्प्रकाशे नंदामीत्यनुत्पन्नमलोल्लासाकर्मकाक्रमोत्तमस्फूर्तिरूपापि समस्तलोकनिर्माणे पूर्वोक्तप्रकारेण "नासतो विद्यते भाव" इति भगवदुक्तेः स्वात्मन्यण्डरसन्यायेनाहमित्यविभागपरामर्शात्मनानुभयेंद्रियगोचरत्वेन स्थितस्य विश्वस्येदंतालक्षणविभागपरामर्शमयसृष्टिलीलायां स्वस्वातंत्र्यमहिम्ना भेदाभेदं प्रतिपाद्य वृक्षगतफलपुष्पादिन्यायेन विकाररहित्येन समवायस्वरूपिणी उपादानकारणीभूता भवति पुनः स्वांतराकर्षणलक्षणसंहारलीलायां तदिच्छया कूर्मभंगिन्यायेन स्वकिरणायमानज्ञानक्रियाशक्तिद्वारा सर्वं स्वात्मन्याकृष्य साक्षादपरोक्षेणाहमिति तत्स्वरूपानुकारिणी शिवाभिन्नस्वरूपिणी

अभवत् भवतीत्यर्थः ॥ नच भेदाभेदयोर्विरोध इति वाच्यं तद्भेदस्य स्वातंत्र्यपरिकल्पितत्वात् स्वाभाविकभेदाभेदयोरेव विरोधात् समानसत्ताकयोरिति यावत् भगवतः शक्तेरघटनघटनापटीयस्त्वात्तदेतदग्रे तत्र तत्र स्फुटीभविष्यतीति नैष विस्तरः देवः क्रीडाशील इत्यर्थः ॥ १३ ॥

अर्थ-॥ १३ ॥ शंकराच्या इच्छेप्रमाणें ती त्याच्या स्वरूपास अनुसरून रूप घेते. तो शंभु भगवान् ईश्वर सर्वज्ञ असून सर्वांपेक्षां शक्तिमान् आहे.

अवतरणिका-एवं शिवशक्तिस्वरूपं निरूप्याथ "स ऐक्षत लोकानसृजत यथापूर्वमकल्पयत्" इत्यादिश्रुत्युक्तप्रकारेण सृष्टिक्रमं निरूपयति—

श्लोकः-जगत्सिसृक्षुः प्रथमं ब्रह्माणं सर्वदेहिनां ॥
कर्तारं सर्वलोकानां विदधे विश्वनायकः ॥ १४ ॥

व्याख्यानं—लोकानां चतुर्दशभुवनानां देहिनां तत्तल्लोकमाश्रित्य विद्यमानानां प्राणिनामित्यर्थः शिष्टं स्पष्टम् अस्मिन्नर्थे "विश्वाधिको रुद्रो महर्षिर्हिरण्यगर्भं जनयामास पूर्वं" इति याजुषश्रुतेः ॥ १४ ॥

अर्थ-॥ १४ ॥ जग निर्माण करावें ह्या हेतूनें, त्या सर्व विश्वाचा ईश्वर अशा, शंकरानें सर्व जगाचे अगोदर ब्रह्मदेवास उत्पन्न केलें; तो ब्रह्मदेव सृष्टिकर्ता झाला.

अवतरणिका-"अथ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्वेताश्वतरश्रुत्यर्थं प्रकटयति—

श्लोकः-तस्मै प्रथमपुत्राय शंकरः शक्तिमान्विभुः ॥
सर्वज्ञः सकला विद्याः सानुग्रहमुपादिशत् ॥ १५ ॥

व्याख्यानं—शक्तिमान्समवेतशक्तिमानित्यर्थः अनुग्रहेण सहितं यथा भवति तथा वेदादिसकलशास्त्रमुपदिष्टवानित्यर्थः ॥ १५ ॥

अर्थ-॥ १५ ॥ त्या सर्वज्ञ व सर्वशक्तिमान शंकरानें त्या प्रथम जन्मलेल्या मुलाला, (ब्रह्मदेवाला,) कृपा करून सर्व विद्या शिकविल्या.

श्लोकः-समस्तलोकान्निर्मातुं समुद्यमपरोऽभवत् ॥
कृतोद्योगोऽपि निर्माणे जगतां शंकराज्ञया ॥
अज्ञातोपायसंपत्तेरभवन्मायया वृतः ॥ १६ ॥

व्याख्यानं—स्पष्टम् ॥ १६ ॥

अर्थ-॥ १६ ॥ पुढें तो ब्रह्मदेव सर्व जग निर्माण करण्याचा उद्योग करूं लागला; त्यानें शंकराच्या आज्ञेप्रमाणें जग निर्माण करण्याचा उद्योग केला, तरी तो मायावश झाल्यामुळें, त्यास सृष्टि निर्माण करण्याचा उपाय सुचेना,

श्लोकः–विधातुमखिलान्लोकानुपायं प्राप्तुमिच्छया ॥
पुनस्तं प्रार्थयामास देवदेवं त्रियंबकं ॥ १७ ॥

अर्थ–॥ १७ ॥ मग सर्व लोक (जग) कसें उत्पन्न करावें? याचा उपाय समजण्यासाठीं पुन्हा त्या ब्रह्मदेवानें तीन नेत्र असणाऱ्या सर्व देवाधिदेवाचीं (शंकराची) प्रार्थना केली.

अवतरणिका–अथ तत्प्रार्थनप्रकारं दर्शयति—

श्लोकः–नमस्ते देवदेवेश नमस्ते करुणाकर ॥
अस्मदादिजगत्सर्वनिर्माणनविधिक्षम ॥ १८ ॥

अर्थ–॥ १८ ॥ हे देवाधिदेवा, तुला नमस्कार असो, दयासमुद्रा, तुला नमस्कार असो, आमच्यासुद्धां सर्व त्रैलोक्याची उत्पत्ति करण्यास तूं समर्थ आहेस.

श्लोकः–उपायं वद मे शंभो जगत्स्रष्टा जगत्पते ॥
सर्वज्ञः शर्वशक्तिस्त्वं सर्वकर्ता सनातनः ॥ १९ ॥

व्याख्यानं—अत्रोपायकथने सर्वज्ञ इत्यादिकं हेतुगर्भविशेषणं ॥ १९ ॥

अर्थ–॥ १९ ॥ सृष्टि उत्पन्न करण्याचा उपाय तूं मला सांग, तूं जग उत्पन्न करणारा आहेस, तूं सर्व जगाचा ईश्वर आहेस, तूं सर्वज्ञ आहेस, सर्वांपेक्षां शक्तिमान् आहेस, तूं सर्व जग उत्पन्न करणारा असून तूं अनादिकालापासून आहेस.

श्लोकः–इति संप्रार्थितः शंभुर्ब्रह्मणा विश्वनायकः ॥
उपायमवदत्तस्मै लोकसृष्टिप्रवर्तनं ॥ २० ॥

अर्थ–॥ २० ॥ ह्याप्रमाणें ब्रह्मदेवानें त्या विश्वनायकाची प्रार्थना केल्यावर, त्यानें (शंकरानें) त्यास सृष्टि उत्पन्न करण्याचा उपाय सुचविला.

श्लोकः–उपायमीश्वरेणोक्तं लब्ध्वाऽपि चतुराननः ॥
न समर्थोऽभवत्कर्तुं नानारूपमिदं जगत् ॥ २१ ॥

व्याख्यानं—विश्वनिर्माणे शिवेन लब्धोपायवानपि ब्रह्मा न समर्थो अभवत् कुत इत्यत्र हेतुगर्भविशेषणं नानारूपमिति जगतो नानारूपत्वादिति भावः ॥ २१ ॥

अर्थ–॥ २१ ॥ शंकरानें जग निर्माण करण्याचा ब्रह्मदेवास उपाय शिकविला, तरी ब्रह्मदेवास हें नानाप्रकारचें जग उत्पन्न करितां येईना.

अवतरणिका–अथ तत्प्रकारं वर्णयति—

श्लोकः–पुनस्तं प्रार्थयामास ब्रह्मा विह्वलमानसः ॥
देवदेव महादेव जगत्प्रथमकारण ॥ २२ ॥

व्याख्यानं—अतो विव्हलमानसः भययुक्तमानसः सन् पुनः शिवं प्रार्थयामासेत्यर्थः ॥ २२ ॥

अर्थ-॥ २२ ॥ पुन्हां ब्रह्मदेव अगदीं थकून गेला, व पुन्हा त्यानें शंकराची प्रार्थना केली; देवाधिदेवा, महादेवा, तूं सर्व जग उत्पन्न करण्यास मूल कारण आहेस.

श्लोकः-नमस्ते सच्चिदानंद स्वेच्छाविग्रहराजित ॥
भव शर्व महेशान सर्वकारणकारण ॥ २३ ॥

व्याख्यानं—भव सर्वलोकोत्पादक शर्व सर्वसंहारक सर्वकारणकारण बिंदुमायादिसर्वकारणकारणेत्यर्थः ॥ २३ ॥

अर्थ-॥ २३ ॥ तूं सच्चिदानंदस्वरूप आहेस, तूं आपल्या इच्छेप्रमाणें शरीर (रूप) धारण करून शोभतोस, तुला कोणी भव, शर्व, महेशान अशा नांवानें हांक मारतात, तूं सर्व कारणांचा कारण आहेस.

अवतरणिका-तर्हि किं कर्तव्यमित्यत्राह—

श्लोकः-भवदुक्तो ह्युपायो मे न किंचिज्ज्ञायतेऽधुना ॥
सृष्टिं विधेहि भगवन्प्रथमं परमेश्वर ॥
ज्ञातोपायस्ततः कुर्यां जगत्सृष्टिमुमापते ॥ २४ ॥

व्याख्यानं—स्पष्टं ॥ २४ ॥

अर्थ-॥ २४ ॥ तूं मला जग निर्माण करण्याचा प्रकार शिकविलास खरा, परंतु त्यापैकीं मला कांहीं समजलें नाहीं; ह्यासाठीं तूं अगोदर सृष्टि निर्माण कर, तूं परमेश्वर आहेस. पार्वतीपते, तूं सृष्टि उत्पन्न केलेली पाहून मला सृष्टि कशी करावयाची तें समजेल, नंतर मी सृष्टि उत्पन्न करीन.

अवतरणिका-अथ "प्रजाः सृजेति निर्दिष्टश्चंद्रमौलिर्विरिंचिना ॥ ससर्ज मनसा रुद्रानात्मतुल्यान्महेश्वरान् ॥ नीलकण्ठांस्त्रिनेत्रांश्च जटामुकुटमंडितान्" इत्याद्यादित्यपुराणवचनानुसारेण सृष्टवानित्याह—

श्लोकः-इत्येवं प्रार्थितः शंभुर्ब्रह्मणा विश्वयोनिना ॥
ससर्जात्मसमप्रख्यान् सर्वगान् सर्वशक्तिकान् ॥ २५ ॥

व्याख्यानं—स्पष्टम् ॥ २५ ॥

अर्थ-॥ २५ ॥ ह्याप्रमाणें जग निर्माण करणाऱ्या ब्रह्मदेवानें शंकराची प्रार्थना केली, तेव्हां त्या शंकरांनीं आपल्यासारखेच प्रसिद्ध, ज्यांना पाहिजे तेथें जाण्याये-

ण्याची शक्ति आहे, (जे व्यापक होते) जे सर्वांपेक्षां ज्यास्त बळकट आहेत असे प्रमथगण उत्पन्न केले.

श्लोकः—प्रबोधपरमानन्दपरिवाहितमानसान् ॥
प्रमथान् विश्वनिर्माणप्रलयापादनक्षमान् ॥ २६ ॥

व्याख्यानं—स्पष्टं ॥ २६ ॥

अर्थ—॥ २६ ॥ ते प्रमथगण अतिशय ज्ञानी असून शिवानंदांत त्यांचीं मनें नेहमीं पोंहत असत, जग निर्माण करणें, आणि जगाचा संहार करणें ह्या दोन्ही गोष्टी त्यांस सहज करितां येतील इतकी त्यांची शक्ति होती.

श्लोकः—तेषु प्रमथवर्गेषु सृष्टेषु परमात्मना ॥
रेणुको दारुकश्चेति द्वावभूतां शिवप्रियौ ॥ २७ ॥

व्याख्यानं—स्पष्टं ॥ २७ ॥

अर्थ—॥ २७ ॥ परमेश्वर श्रीशिवानें अशा तऱ्हेनें तो प्रमथांचा समुदाय उत्पन्न केला, त्यांत रेणुक आणि दारुक नांवांचे दोघे प्रमथ शिवाच्या अत्यंत प्रीतींतील होते.

अवतरणिका—अथ तद्गणेश्वरयोर्माहात्म्यं पंचभिः श्लोकैः प्रकटयति—

श्लोकः—सर्वविद्याविशेषज्ञौ सर्वकार्यविचक्षणौ ॥
मायामलविनिर्मुक्तौ महिमातिशयोज्वलौ ॥ २८ ॥

व्याख्यानं—स्पष्टं ॥ २८ ॥

अर्थ—॥ २८ ॥ ते सर्व विद्येंतील मर्म जाणत असून ते सर्व कामांत मोठे चतुर होते; मायेच्या संबंधानें उत्पन्न होणारे आणवमल, मायामल आणि कार्मिकमलापासून ते अलिप्त होते, त्यांचा प्रभाव फार मोठा असून ते तेजःपुंज होते.

श्लोकः—आत्मानंदपरिस्फूर्तिरसास्वादनलंपटौ ॥
शिवतत्वपरिज्ञानतिरस्कृतभवामयौ ॥ २९ ॥

व्याख्यानं—मायामलविनिर्मुक्तौ मायाशक्तिपरिकल्पिताणवादिमलत्रयसंबंधरहिताविल्यर्थः ॥ २९ ॥

अर्थ—॥ २९ ॥ आत्मस्वरूपाचे आनंदाचा अनुभव घेण्यांत ते नेहमीं गढून गेले होते, व शिवतत्वाचें यथार्थज्ञान झाल्यामुळें त्यांचा संसाररूपी रोग दूर झाला होता. (त्यांस जन्ममरणांचें भय नव्हतें.)

श्लोकः-नानापथमहाशैवतंत्रनिर्वाहतत्परौ ॥
वेदान्तसारसर्वस्वविवेचनविचक्षणौ ॥ ३० ॥

व्याख्यानं—स्पष्टं ॥ ३० ॥

अर्थ-॥ ३० ॥ अनेकप्रकारचीं मतें आणि महाशैवतंत्र ह्यांची त्यांस यथार्थ माहिती होती व वेदांतशास्त्रांतील तात्पर्यांचा अर्थ त्यांस चांगल्या रीतीनें समजत होता;

श्लोकः-नित्यसिद्धौ निरातंकौ निरंकुशपराक्रमौ ॥
तादृशौ तौ महाभागौ संवीक्ष्य परमेश्वरः ॥ ३१ ॥

व्याख्यानं—नित्यसिद्धौ नित्यभूतसिद्धिमन्तौ स्पष्टमन्यत् ॥ ३१ ॥

अर्थ-॥ ३१ ॥ ते दोघे नित्यसिद्ध असून त्यांस कोणतीही पीडा नव्हती, व त्यांच्या पराक्रमास मर्यादा नव्हती. ते दोघे तशा प्रकारचे व मोठे भाग्यवान् आहेत असें पाहून,

श्लोकः-समर्थौ सर्वकार्येषु विश्वासपरमाश्रितौ ॥
अन्तःपुरद्वारपालौ निर्ममे नियतौ विभुः ॥ ३२ ॥

व्याख्यानं—नियतौ शुद्धात्मानौ एवंरूपरेणुकदारुकौ विभुः स्वतन्त्रः परमेश्वरः अन्तःपुरद्वारपालौ निर्ममे निर्मितवानित्यर्थः ॥ ३२ ॥

अर्थ-॥ ३२ ॥ शिवाचा त्या दोघांजणांवर मोठा विश्वास बसला. व ते तसेच सर्व कामांत प्रवीण होते. त्या दोघां इंद्रियनिग्रहवानांस महादेवानें आपल्या अन्तःपुराचे (स्त्रीसमुदाय राहतो त्या ठिकाणाचे) द्वारपाल केले.

अवतरणिका-अथ तौ रेणुकदारुकौ शिवसेवां चक्रतुरित्याह—

वृत्तं-गणेश्वरौ रेणुकदारुकावुभौ विश्वासभूतौ नवचंद्रमौलेः ॥
अन्तःपुरद्वारगतौ सदा तौ वितेनतुर्विश्वपतेस्तु सेवां ॥ ३३ ॥

व्याख्यानं—स्पष्टं ॥ ३३ ॥

इति श्रीसिद्धांतशिखामणौ रेणुकदारुकावतरणं नाम द्वितीयः परिच्छेदः

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां रेणुकदारुकावतरणं नाम द्वितीयः परिच्छेदः ॥

अर्थ-॥ ३३ ॥ द्वितीयेचा चंद्र मस्तकावर धारण करणाऱ्या शंकराचे ते

दोघेजण गणेश्वर मोठे विश्वासांतील होते; ते नेहमीं अन्तःपुराच्या दारावर पहारा करीत व वेळोवेळीं शंकराची सेवा करीत होते.

ह्याप्रमाणें सिद्धान्तशिखामणि ग्रंथांतील रेणुक आणि दारुक ह्या दोघां प्रमथगणांचा जन्म नांवाचा दुसरा परिच्छेद संपला.

तृतीयपरिच्छेदप्रारंभः ।

अवतरणिका–अथात्र शिवयोगिनो रेणुकस्य भूलोकावतरणप्रसंगकथनार्थं प्रथममष्टभिः श्लोकैः कैलासवर्णनं करोति—

श्लोकः–कदाचिदथ कैलासे कलधौतशिलामये ॥
गन्धर्ववामनयनाक्रीडामौक्तिकदर्पणे ॥ १ ॥

व्याख्यानं—अथ रेणुकावतरणानंतरं कदाचिद्रजतमयपाषाणप्रदेशे गन्धर्ववनिताक्रीडायाः मौक्तिकदर्पणे ॥ १ ॥

अर्थ–॥ १ ॥ कैलास पर्वतावर सोन्याच्या मोठमोठ्या शिला आहेत, व तो पर्वत गंधर्वांच्या बायकांचा क्रीडा करण्याकरितां केलेला मोत्यांचा आरसा असल्यासारखा दिसतो.

श्लोकः–मंदारबकुलाशोकमाकंदप्रायभूरुहे ॥
मल्लीमरंदनिष्यन्दपानपीनमधुव्रते ॥ २ ॥

व्याख्यानं—मंदारमाकंदादिनानावृक्षवति मल्लिकाकुसुममकरंदस्रवणपानपरिपुष्टभ्रमरे ॥ २ ॥

अर्थ–॥ २ ॥ कैलासावर पारिजात, बकुल, अशोक, आंबा वगैरे जातींचीं अनेक झाडें आहेत. कैलासावर बटमोगरा वगैरे फुलझाडांच्या सुवासिक फुलांतील मकरंद पिऊन भुंगे पुष्ट झालेले होते.

श्लोकः–कुंकुमस्तबकामोदकूलंकषहरिन्मुखे ॥
कलकण्ठकुलालापकन्दलद्रागबन्धुरे ॥ ३ ॥

व्याख्यानं—कुंकुमकुसुमगुच्छामोदभरितकूलस्पृशन्नदीप्रवाहवति कोकिलसमूहरवबाहुल्योद्भवपंचमस्वरमनोहरे ॥ ३ ॥

अर्थ–॥ ३ ॥ लाल रंगाच्या सुवासिक फुलांच्या झुपक्यामुळें कैलासपर्वताच्या सर्व दिशा सुगंधित झालेल्या असतात; व कैलास पर्वतावरील झाडांवर अनेक

कोकिलपक्षी बसून मधुर गायन करितात; त्यांचा मधुर शब्द सर्वत्र पसरलेला असतो.

श्लोकः–किन्नरीगीतमाधुर्यपरिवाहितगह्वरे ॥

सानन्दवरयोगीन्द्रवृंदालंकृतकंदरे ॥ ४ ॥

व्याख्यानं—किन्नरस्त्रीगीतमाधुर्यप्रवहितगुहाप्रदेशे सानंदगणेशमुख्यशिवयोगिसमूहालंकृतप्रदेशभागवति ॥ ४ ॥

अर्थ–॥ ४ ॥ कैलास पर्वतावर किन्नरांच्या बायका मधुर स्वरानें गायन करितात, त्यांच्या मंजुळ शब्दानें तेथील सर्व गुहा दुमदुमून जातात, व त्या गुहांत मोठे मोठे समाधियोग साधणारे योगी ध्यान लाऊन बसल्यामुळें त्यांस अप्रतिम शोभा येते.

श्लोकः–हेमारविंदकलिकासुगंधिरसमानसे ॥

शातकुंभमयस्तंभशतोत्तुंगविराजिते ॥ ५ ॥

व्याख्यानं—हेमारविंदकलिकामोदरसभरितमानससरोवरे स्वर्णमयस्तम्भशतौन्नत्यप्रकाशमाने ॥ ५ ॥

अर्थ–॥ ५ ॥ कैलास पर्वतावरील मानस सरोवरांत उत्तम तऱ्हेनें सुवर्णकमलें फुललेलीं असल्यामुळें, त्या पाण्यास एक प्रकारची गोडी आलेली असते. कैलास पर्वतावर सोन्याचे मोठमोठे उंच शेंकडों खांब आहेत.

श्लोकः–माणिक्यदीपकलिकामरीचिद्योतितान्तरे ॥

द्वारतोरणसंरूढशंखपद्मनिधिद्वये ॥ ६ ॥

व्याख्यानं—मणिप्रदीपकलिकाकारशिखामयूखप्रकाशितान्तःपुरे द्वारतोरणस्तंभसंलग्नशंखपद्मनिधिद्वये ॥ ६ ॥

अर्थ–॥ ६ ॥ कैलासावर रत्नांचे दीप असल्यामुळें, त्यांचा प्रकाश दहा दिशांत पसरत असून फार शोभा येते. कैलास पर्वतावरील मोठमोठ्या वाड्यांच्या दारांच्या दोन्ही बाजूस, शंख आणि पद्म हीं दोन चित्रें काढलेलीं दिसतात.

श्लोकः–मुक्तातारकितोदारवितानांबरमंडिते ॥

स्पर्शलक्षितवैडूर्यमयभित्तिपरंपरे ॥ ७ ॥

व्याख्यानं—मुक्तामणिरचितनक्षत्रवन्महावितानपटालंकृते स्पर्शवेद्युपलक्षितवैडूर्यरत्नमयभित्तिश्रेणिमति ॥ ७ ॥

अर्थ–॥ ७ ॥ कैलास पर्वतावर वाड्यांत मोठमोठीं छतें बांधून त्यांस मोत्यांच्या झालरी बांधलेल्या असतात, त्यांतील मोत्यें नक्षत्रांसारखीं शोभतात.

कैलास पर्वतावरील वाड्यांच्या भिंतींस परिस आणि इंद्रनीलमणि ह्यांचे तुकडे बसविलेले असल्यामुळें, ते फार शोभतात.

श्लोकः–संचरत्प्रमथश्रेणीपदवाचालनूपुरे ॥

प्रवालवलभीशृंगशृंगारमणिमंटपे ॥ ८ ॥

व्याख्यानं—संचरत्प्रमथपादप्रदेशकूजत्कटके प्रवालवलभिमुख्यशृंगारमणिमंटपे॥

अर्थ–॥ ८ ॥ कैलास पर्वतावर प्रमथगण इकडून तिकडे फिरत असतात, त्या वेळीं त्यांच्या पायांतील पैंजण वाजत असतात. मोठमोठ्या वाड्यांच्या बारगज्यांवर क्रीडागृहास शोभा येण्यासाठीं पोंवळीं बसविलेलीं असतात.

अवतरणिका–सिंहासनमध्यस्थितं परमेश्वरं पंचदशभिः श्लोकैः वर्णयति—

श्लोकः–वंदारुदेवमुकुटमंदाररसवासितं ॥

रत्नसिंहासनं दिव्यमध्यस्तं परमेश्वरं ॥ ९ ॥

व्याख्यानं—नमनशीलत्रयस्त्रिंशत्कोटिदेवतामुकुटकल्पप्रसूनरसमनोहरं नवरत्नमयसिंहासनं तन्मंटपमध्ये भाति ॥ ९ ॥

अर्थ–॥ ९ ॥ वर वर्णन केलेल्या त्या कैलासपर्वतावर एकवेळ उत्तम तऱ्हेच्या रत्नसिंहासनावर शंकर बसले होते, त्या वेळीं शंकरास नमस्कार करणाऱ्या देवांच्या मुकुटावरील पारिजातांच्या फुलांचा सुवास सुटला होता.

श्लोकः–तमास्थानगतं देवं सर्वलोकमहेश्वरं ॥

त्र्यय्यन्तकमलारण्यविहारकलहंसकं ॥ १० ॥

व्याख्यानं—तत्र विद्यमानः परमेश्वरः कीदृश इत्यत्राह देवमित्यादिना क्रीडाशीलः सर्वलोकेशः वेदान्तमयकमलसमूहविहारराजहंसः ॥ १० ॥

अर्थ–॥ १० ॥ शंकर कैलासावरील आपल्या सभेंत बसले होते; ते सर्व त्रैलोक्याचे ईश्वर असून, तीन वेदरूपी कमलांच्या अरण्यांत विहार करणाऱ्या राजहंसाप्रमाणें दिसत होते.

श्लोकः–उदारगुणमोंकारशुक्तिकापुटमौक्तिकं ॥

सर्वमंगलसौभाग्यसमुदायनिकेतनं ॥ ११ ॥

व्याख्यानं—त्यागशीलः ॐकारशुक्तिकापुटमौक्तिकः सर्वमंगलसौभाग्यसमूहस्थानभूतः ॥ ११ ॥

अर्थ–॥ ११ ॥ ॐकाररूप शिंपेंतील शंकर हे तेजदार मोत्यांसारखे शोभत

होते, श्रेष्ठ शंकर हे अनेकप्रकारचीं कल्याणकारक कृत्यें व सुंदरपणा ह्यांच्या समुदायाचें घरच होत. (शंकर हे कल्याण आणि सौंदर्य ह्यांची खाण होते)

श्लोकः—संसारविषमूर्च्छालुजीवसंजीवनौषधं ॥
नित्यप्रकाशनैर्मल्यं कैवल्यसुरपादपं ॥ १२ ॥

व्याख्यानं—संसारविषमूर्च्छितजीवसंजीवनौषधः स्वप्रकाशेनैव निर्मलः परमुक्तिप्रदानकल्पद्रुः ॥ १२ ॥

अर्थ—॥ १२ ॥ शंकर हे संसारविषानें मूर्च्छित झालेल्या जीवांस संजीवन करणारें उत्तम औषधच होय. ते नेहमीं तेजःपुंज आणि शुचिर्भूत असे आहेत. ते भक्तांस मोक्षप्राप्ति करून देणारे कल्पवृक्ष होत.

श्लोकः—अनन्तपरमानंदमकरन्दमधुव्रतं ॥
आत्मशक्तिलतापुष्यत्रिलोकीपुष्पकोरकं ॥ १३ ॥

व्याख्यानं—अपारपरमानंदरसास्वादनमधुव्रतः स्वसमवेतशक्तिकल्पलतापुष्यल्लोकत्रयकुसुमकोरकः ॥ १३ ॥

अर्थ—॥ १३ ॥ ते ज्याची मर्यादा नाहीं अशा आनंदरूपी रसाचा भुंग्याप्रमाणें उपभोग घेणारे आहेत (ते नेहमीं आनंदी असतात.) आत्मशक्तिरूप वेली प्रफुल्लित होऊन तिला त्रैलोक्यरूपी कळी आल्याप्रमाणें शंकर दिसत होते.

श्लोकः—ब्रह्माण्डकुण्डिकाषंडपिंडीकरणपंडितं ॥
समस्तदेवताचक्रचक्रवर्तिपदे स्थितं ॥ १४ ॥

व्याख्यानं—ब्रह्माण्डसमूहलोलीकरणप्रवीणः नारायणादिसकलदेवतासमूहचक्रवर्ती ॥ १४ ॥

अर्थ—॥ १४ ॥ शंकर, ब्रह्माण्डरूप पात्र फुटून छिन्नभिन्न झाल्यास तें एक करण्याचे कामांत कुशल होते. सर्व देवतांच्या समुदायाचे शंकर सार्वभौम राजे होते.

श्लोकः—चंद्रबिंबायुतच्छायादायादद्युतिविग्रहं ॥
माणिक्यमुकुटज्योतिर्मंजरीपिंजरांबरं ॥ १५ ॥

व्याख्यानं—चंद्रायुतप्रभास्पर्धमानतेजाः मुकुटगतनवरत्नज्योतिर्मंजरीविचित्रांबरः ॥ १५ ॥

अर्थ—॥ १५ ॥ दहा हजार चंद्रांसारखें शंकराचें सौंदर्य होतें व नमस्कार करणाऱ्या देवांच्या रत्नमुकुटाच्या तेजाच्या किरणांनीं शंकराचें वस्त्र पिंगट दिसत होतें.

श्लोकः—चूडालं सोमकलया सुकुमारबिसाभया ॥
कल्याणपुष्पकलिकाकर्णपूरमनोहरं ॥ १६ ॥

व्याख्यानं—कोमलकंदाभसोमकलाशिरोभूषणः परममंगलसुमकुड्मलकर्णाभरणमनोहरः ॥ १६ ॥

अर्थ—॥ १६ ॥ कोमल कमलतंतूंसारख्या चंद्रकलेमुळें, त्यांच्या मस्तकास तुरा खोंवल्याप्रमाणें शोभा आली होती; कल्याणकारक फुलाची कळी त्यांनीं आपल्या कानावर खोंविली असल्यामुळें ते शोभत होते.

श्लोकः—मुक्तावलयसंबद्धमुण्डमालाविराजितं ॥
पर्याप्तचंद्रसौंदर्यपरिपंथिमुखश्रियं ॥ १७ ॥

व्याख्यानं—मुक्ताप्रकरवलितमुण्डमालाविराजितः पूर्णचंद्रसौंदर्यपरिपंथिमुखश्रीः ॥ १७ ॥

अर्थ—॥ १७ ॥ मोत्यांनीं गुंफलेली मुंडमाला त्यांनीं आपल्या गळ्यांत घातली असल्यामुळें, त्यांस एका प्रकारची विचित्र शोभा आली होती, व पूर्णचंद्राप्रमाणें त्यांचें तोंड सुशोभित दिसत होतें.

श्लोकः—प्रातस्संफुल्लकमलपरियायत्रिलोचनं ॥
मंदस्मितमितालापमधुराधरपल्लवं ॥ १८ ॥

व्याख्यानं—प्रातःप्रफुल्लकमलपर्यायत्रिलोचनः मंदस्मितपरिमितवचोविलासमनोहराधरपल्लवः ॥ १८ ॥

अर्थ—॥ १८ ॥ सकाळीं टवटवीत झालेल्या कमलांप्रमाणें शंकराचे तीन डोळे सुशोभित दिसत होते, मंद हास्यामुळें व मितभाषणामुळें त्या शंकराच्या नाजूक ओंठास शोभा आली होती.

श्लोकः—गण्डमण्डलपर्यन्तक्रीडन्मकरकुण्डलं ॥
कालिम्ना कालकूटस्य कंठनाले कलंकितं ॥ १९ ॥

व्याख्यानं—कपोलाभोगपर्यन्तचलन्मकरकुण्डलः कालकूटकालिम्ना कलंकितकण्ठनालः ॥ १९ ॥

अर्थ—॥ १९ ॥ शंकराच्या गालांवर मकरकुण्डल लोळत होते; हलाहल विष प्राशन केल्यामुळें त्यांचा गळा काळसर झालेला होता.

श्लोकः—मणिकंकणकेयूरमरीचिकरपल्लवैः ॥
चतुर्भिः संविराजन्तं बाहुमंदारशाखिभिः ॥ २० ॥

व्याख्यानं—मणिमयकंकणकेयूरप्रकाशमानकरपल्लवचतुष्कः बाहुकल्पद्रुमभासमानः ॥ २० ॥

अर्थ–॥ २० ॥ रत्नकंकण आणि बाजुबंद ह्यांच्या किरणांनीं त्यांच्या हाताचीं बोटें शोभिवंत दिसत होतीं, अशा कल्पवृक्षासारख्या चार हातांमुळें, शंकरास अवर्णनीय शोभा आली होती.

श्लोकः–गौरीपयोधराश्लेषकृतार्थभुजमध्यमं ॥

सुवर्णब्रह्मसूत्रांकं सूक्ष्मकौशेयवाससं ॥ २१ ॥

व्याख्यानं—उमापयोधरालिंगनकृतार्थवक्षःस्थलः कनकमयब्रह्मसूत्रांकितः अतिसूक्ष्मदुकूलाम्बरः ॥ २१ ॥

अर्थ–॥ २१ ॥ शंकर हे अर्धनारीनटेश्वर असल्यामुळें पार्वतीस आलिंगन दिल्यामुळें, त्यांचे दोहों हातांचा मध्यभाग सफळ झाला होता; त्यांच्या गळ्यांत सोन्याचें यज्ञोपवीत असून ते (शंकर) पातळ व उंची रेशमी वस्त्र नेसले होते.

श्लोकः–नाभिस्थानावलंबिन्या नवमौक्तिकमालया ॥

गंगयेव कृताश्लेषं मौलिभागावतीर्णया ॥ २२ ॥

व्याख्यानं—नाभिपर्यन्तगतनवमौक्तिकमालया मस्तकावतीर्णया गंगयेव कृतालिंगनः ॥ २२ ॥

अर्थ–॥ २२ ॥ त्यांनीं आपल्या गळ्यांत बेंबीपर्यंत लोंबणारी उत्तम उत्तम तेजदार मोत्यांची माळ घातली होती, त्यामुळें जटांतून निघणारी गंगा त्यांच्या आंगावर सर्वत्र पसरल्याप्रमाणें दिसत होती.

श्लोकः–पदेन मणिमंजीरप्रभापल्लवितश्रिया ॥

चंद्रवत्स्फाटिकं पीठं समावृत्य स्थितं पुरः ॥ २३ ॥

व्याख्यानं—मणिमयनूपुरप्रकाशपल्लवितश्रिया पादेन सिंहासनस्य पुरतश्चंद्रकान्तमयफलकमावृत्य वर्तमान इत्यर्थः ॥ २३ ॥

अर्थ–॥ २३ ॥ पायांतील रत्नांच्या पैंजणांच्या सभोंवतीं पसरणाऱ्या शोभेनें चंद्रासारख्या स्वच्छ स्फटिकाच्या सिंहासनास जास्त शोभा आणून, एक पाय आंखडून व एक पाय पसरून शंकर बसले होते.

अवतरणिका–एवं महेश्वरं वर्णयित्वाथ तद्वामांकसंस्थितां भवानीं त्रयोदशसूत्रैर्वर्णयति—

श्लोकः–वामपार्श्वनिवासिन्या मंगलप्रियवेषया ॥

समस्तलोकनिर्माणसमवायस्वरूपया ॥ २४ ॥

व्याख्यानं—तद्वामपार्श्ववर्तिनी मांगल्येनासेचनकरूपवती सकललोकसृष्टावुपादानकारणीभूता ॥ २४ ॥

अर्थ-॥ २४ ॥ शंकराच्या जवळ डावीकडील बाजूस पार्वती बसली होती; तिनें आपल्या आवडीचा मंगलकारक वेष घेतला होता. ती सर्व जग निर्माण करतेवेळीं कार्यस्वरूप होत असते.

श्लोकः-इच्छाज्ञानक्रियारूपबहुशक्तिविलासया ॥
विद्यातत्वप्रकाशिन्या विनाभावविहीनया ॥ २५ ॥

व्याख्यानं—इच्छाज्ञानक्रियादिबहुशक्तिविलासवती आत्मविद्याप्रकाशिनी शिवेनाविनाभूता ॥ २५ ॥

अर्थ-॥ २५ ॥ इच्छा, ज्ञान, आणि क्रिया इत्यादि पुष्कळ शक्तींनीं पार्वती युक्त होती; पार्वती, कोणत्याही रीतीची न्यूनता नाहीं अशा विद्यातत्वाचा प्रकाश करणारी व नेहमीं शंकराजवळ राहणारी होती.

श्लोकः-संसारविषकान्तारदाहदावाग्निलेखया ॥
धम्मिल्लमल्लिकामोदझंकुर्वद्भृंगमालया ॥ २६ ॥

व्याख्यानं—संसारविषविपिनदाहदावाग्निराजिः धम्मिल्लमल्लिकामोदझंकुर्वदलिमालिका ॥ २६ ॥

अर्थ-॥ २६ ॥ पार्वती ही संसाररूप विषवन जाळून टाकणारी मूर्तिमन्त दवाग्नीची (वणव्याची) ज्वाला च होती, पार्वतीनें आपल्या बुचड्यांत बटमोगऱ्याचीं फुलें खोविलीं होतीं, त्यांच्या सुवासानें भुंगे गुंजारव करीत तिच्या केशांभोंवतीं फिरत होते.

श्लोकः-संपूर्णचंद्रसौभाग्यसंवादिमुखपद्मया ॥
नासामौक्तिकलावण्यनाशीरस्मितशोभया ॥ २७ ॥

व्याख्यानं—पूर्णचंद्रकान्तिविवदन्मुखपंकजा नासामौक्तिकलावण्यबाहुल्यच्छुरितमंदस्मितकान्तिमती ॥ २७ ॥

अर्थ-॥ २७ ॥ पौर्णिमेच्या स्वच्छ चंद्रासारखें मी तेजःपुंज आहें, असें पार्वतीचें कमलासारखें तोंड स्पष्टरीतीनें बोलून दाखवितें, असें वाटे. नाकांतील नथेच्या मोत्यांचे तेजामुळें पार्वतीच्या हंसण्यास एक प्रकारची शोभा आली होती.

श्लोकः-मणिताटंकरंगान्तर्वलितापांगलीलया ॥
नेत्रद्वितयसौंदर्यनिंदितेंदीवरत्विषा ॥ २८ ॥

व्याख्यानं—रत्नखचितताटंकरंगमंटपमध्यलास्यमानापांगलीला नयनद्वयसौंदर्यनिंदितेंदीवरश्रीः ॥ २८ ॥

अर्थ-॥ २८ ॥ कानांत पार्वतीनें रत्नांचीं ताटंकें (बुगड्या) घातलीं हीतीं, त्यांच्या तेजामुळें तिच्या डोळ्यांच्या दोन्ही बाजूंस शोभा आलेली होती; निळ्या कमळांच्या शोभेस लाजवितील असे पार्वतीचे नेत्र सुशोभित होते.

श्लोकः-कुसुमायुधकोदण्डकुटिलभ्रूविलासया ॥
बंधूककुसुमच्छायाबंधुभूताऽधरश्रिया ॥ २९ ॥

व्याख्यानं—मारकार्मुककुटिलभ्रूलताविलासवती बंधूककुसुमकान्तिबंधुराधरश्रीः ॥ २९ ॥

अर्थ-॥ २९ ॥ पार्वतीच्या दोन्ही भोंवया मदनाच्या धनुष्याप्रमाणें शोभत होत्या. जास्वंदीच्या फुलासारखे पार्वतीचे दोन्ही ओंठ लाल होते.

श्लोकः-कंठनालजितानंगकंबुबिब्बोकसंपदा ॥
बाहुद्वितयसौभाग्यवंचितोत्पलमालया ॥ ३० ॥

व्याख्यानं—कण्ठनालजितानंगजयशंखनिनादवती बाहुद्वितयसौभाग्यन्यक्कृतोत्पलमालिका ॥ ३० ॥

अर्थ-॥ ३० ॥ पार्वतीचा गळा मदनाच्या हातांतील शंखास लाजविणारा होता; नीलकमलांच्या माळेस लाजवितील इतके पार्वतीचे दोन्ही हात नाजुक होते.

श्लोकः-स्थिरयौवनलावण्यशृंगारितशरीरया ॥
अत्यंतकठिनोत्तुंगपीवरस्तनभारया ॥ ३१ ॥

व्याख्यानं—स्थिरयौवनलावण्यालंकृतकलेवरा अत्यन्तकठिनोत्तुंगस्तनभारवती॥

अर्थ-॥ ३१ ॥ पार्वतीचें वय नेहमीं तरुण असून तिच्या शरीराचें सौंदर्य अवर्णनीय होतें, तिचे स्तन मोठे व घट्ट असल्यामुळें त्यांचें तिला ओझें होत होतें.

श्लोकः-मृणालवल्लरीतन्तुबंधुभूतावलग्नया ॥
शृंगारतटिनीतुंगपुलिनश्रोणिभारया ॥ ३२ ॥

व्याख्यानं—कमलनालतन्तुनिभातिसूक्ष्ममध्यप्रदेशा शृंगारतरंगिणीतुंगपुलिनश्रोणिभारविराजिता ॥ ३२ ॥

अर्थ-॥ ३२ ॥ वेलीसारख्या असलेल्या कमळाच्या देंठाच्या तंतूसारखी तिची कंबर फार नाजूक होती; पार्वतीचें ढुंगण शृंगाररूप नदीच्या मोठ्या वाळवंटाप्रमाणें शोभिवंत दिसत होतें.

श्लोकः-कुसुंभकुसुमच्छायाकोमलांबरशोभया ॥
शृंगारोद्यानसंरंभरंभास्तंभोरुकाण्डया ॥ ३३ ॥

व्याख्यानं—कुसुंभकुसुमकांतिमत्कोमलांबरशोभमाना शृंगारोद्यानसंभ्रमरंभास्तंभायमानोरुकाण्डा ॥ ३३ ॥

अर्थ-॥ ३३ ॥ पार्वती कुसुंब्याच्या फुलाप्रमाणें रंग असलेलें व तसेंच नाजुक असलेलें वस्त्र नेसलेली होती; शृंगाररूप वनांतील कोंवळ्या कोंवळ्या केळीसारख्या तिच्या मांड्या नाजुक होत्या.

श्लोकः-च्यूतप्रवालसुषुमसुकुमारपदाब्जया ॥
स्थिरमंगलशृंगारभूषणालंकृतांगया ॥ ३४ ॥

व्याख्यानं—चूतपल्लवमनोहरसुकुमारपदाब्जा स्थिरमांगल्यभूषणालंकृतांगी ३४

अर्थ-॥ ३४ ॥ आंब्याच्या कोंवळ्या पानांसारखे लाल रंगाचे पार्वतीचे पाय होते. नित्य व मंगलदायक असे अलंकार घातल्यामुळें तिचें शरीर फार सुशोभित दिसत होतें.

श्लोकः-हारनूपुरकेयूरचमत्कृतशरीरया ॥
चक्षुरानंदलतया सौभाग्यकुलविद्यया ॥ ३५ ॥

व्याख्यानं—मुक्ताहारमंजीरकेयूरचमत्कृतशरीरिणी नयनानंदलतिका सौभाग्यस्य कुलविद्यारूपिणी ॥ ३५ ॥

अर्थ-॥ ३५ ॥ पार्वतीच्या गळ्यांतील मोत्यांच्या माळा, पायांतील पैंजण, व बाहुभूषण, ह्यांच्यामुळें तिच्या शरीरास अवर्णनीय शोभा आलेली होती, पाहणाऱ्यांच्या डोळ्यांस आनंद होईल अशा वेलीसारखें तिचें रूप होतें; पार्वती ही सुखरूप असून मंगलकारक व उत्तम गुण तिच्या अंगांत परिपूर्णरीतीनें भरलेले होते.

श्लोकः-उमया सममासीनं लोकजालकुटुंबया ॥
अपूर्वरूपमभजन्परिवारास्समन्ततः ॥ ३६ ॥

व्याख्यानं—लोकसमूहकुटुंबिनी एवंरूपयोमया दिव्यकन्यकया सह दिव्यसिंहासने समासीनमपूर्वरूपं परमेश्वरं समन्तान्नारायणादित्रयस्त्रिंशत्कोटिदेवता अभजन्नित्यर्थः ॥ ३६ ॥

अर्थ-॥ ३६ ॥ जगांतील स्त्रीपुरुषांचीं जोडपीं पार्वतीच्या रूपापासून झालेलीं आहेत. त्या पार्वतीसहवर्तमान कैलासावरील आपले सभेंतील रत्नसिंहासनावर शंकर बसले असतां, तेथें विलक्षण प्रकारची शोभा आली होती. प्रमथगणांचे समुदाय शंकराच्या भोंवतीं आपापल्या योग्यतेप्रमाणें बसले होते.

अवतरणिका–एवं पार्वतीपरमेश्वरौ वर्णयित्वाग्रे विंशतिसूत्रैस्ताभिर्देवताभिर्विधीयमानां सेवां वर्णयति—

श्लोकः–पुण्डरीकाकृतिस्वच्छं पूर्णचंद्रसहोदरं ॥
दधौ तस्य महालक्ष्मीः सितमातपवारणं ॥ ३७ ॥

व्याख्यानं—श्वेतकमलवन्निर्मलं पूर्णचंद्रसहोदरं श्वेतच्छत्रं महालक्ष्मीस्तस्य परमेश्वरस्य धृतवतीत्यर्थः ॥ ३७ ॥

अर्थ–॥ ३७ ॥ महालक्ष्मीनें शंकरपार्वतीवर पांढरें शुभ्र छत्र धरलें होतें; तें पांढऱ्या कमलाप्रमाणें स्वच्छ होतें, व पौर्णिमेच्या संपूर्ण चंद्राप्रमाणें शोभिवंत होतें.

श्लोकः–तंत्रीझंकारशालिन्या संगीतामृतविद्यया ॥
उपतस्थे महादेवमुपान्ते च सरस्वती ॥ ३८ ॥

व्याख्यानं—कूजन्नवरत्नमयकंकणसमूहयुक्तहस्तेनोपनिषद्धास्वरमण्डलतंत्रीझंकारशोभमानसंगीतरसविद्यया सरस्वती समीपे महादेवं सेवितवतीत्यर्थः ॥ ३८ ॥

अर्थ–॥ ३८ ॥ शंकराच्या जवळ सरस्वती आपल्या हातांत वीणा घेऊन व त्याच्या तारांच्या झणत्कारानें मंजुळ ध्वनि काढून, अमृतासारख्या मधुर स्वरानें गायन करीत होती.

श्लोकः–झणत्कंकणजातेन हस्तेनोपनिषद्वधूः ॥
ओंकारतालवृन्तेन वीजयामास शंकरं ॥ ३९ ॥

व्याख्यानं—कूजन्नवरत्नमयकंकणसमूहयुक्तहस्तेनोपनिषद्वधूः ॐकारव्यजनेन शिवं वीजयामासेत्यर्थः ॥ ३९ ॥

अर्थ–॥ ३९ ॥ उपनिषद्रूपी स्त्री हातांतील रत्नकंकणांचा रुणझुण असा मंजुळ ध्वनि होत असतां, ॐकाररूप पंख्यानें शंकरास वारा घालीत होती.

श्लोकः–चलच्चामरिकाहस्ता झंकुर्वन्मणिकंकणाः ॥
आसेवंत तमीशानमभितो दिव्यकन्यकाः ॥ ४० ॥

व्याख्यानं—दिव्यकन्यका इंद्राणीप्रभृतिदेवस्त्रिय इत्यर्थः स्पष्टमन्यत् ॥ ४०॥

अर्थ–॥ ४० ॥ आपल्या हातांनीं शंकरावर चवऱ्या ढाळीत असतां, ज्यांच्या हातांतील रत्नकंकणें रुणझुण रुणझुण वाजत होतीं, अशा कितीएक देवकन्या शंकरपार्वतींच्या बाजूस उभ्या राहून सेवा करीत होत्या.

श्लोकः–चामराणां विलोलानां मध्ये तन्मुखमण्डलं ॥
रराज राजहंसानां भ्रमतामिव पंकजं ॥ ४१ ॥

व्याख्यानं—विलोलानां चामराणां मध्ये शिवस्य मुखमण्डलं भ्रमतां राजहंसानां मध्ये कमलमिव रराजेत्यर्थः ॥ ४१ ॥

अर्थ–॥ ४१ ॥ चवऱ्या वरचेवर वारूं लागल्यामुळें मधून मधून चवऱ्या वारणाऱ्या देवकन्यांचीं तोंडें वरून राजहंसपक्षी फिरतां फिरतां त्यांचे छायेखालील कमळें एखादेवेळीं अवचित नजरेस पडावीं त्याप्रमाणें शोभत होतीं.

श्लोकः–मन्त्रेण तमसेवन्त वेदाः सांगविभूतयः ॥
भक्त्या चूडामणिं कान्तं वहन्त इव मौलिभिः ॥ ४२ ॥

व्याख्यानं—सांगविभूतयः शिक्षाद्यंगविशिष्टाः ऋगादिवेदपुरुषा उपनिषद्भागरूपमस्तकैः तं परमेश्वरं कान्तं चूडारत्नमिव वहन्तः सन्तः प्रणवमंत्रेण भक्त्या असेवन्तेत्यर्थः ॥ ४२ ॥

अर्थ–॥ ४२ ॥ परिपूर्ण ऐश्वर्य असणारे वेद आपापल्या मंत्रानें भक्तिपूर्वक स्तवन करीत होते, मस्तकावर जसें एखादें रत्न घ्यावें त्याप्रमाणें सर्व वेद शंकराची आज्ञा शिरसामान्य करीत होते.

श्लोकः–तदीयायुधधारिण्यस्तत्समानविभूषणाः ॥
अंगभूताः स्त्रियः काश्चिदासेवन्त तमीश्वरं ॥ ४३ ॥

व्याख्यानं—वेदपुरुषायुधधारिण्यः तत्समानविभूषणाः अंगदेवताः तं शिवमासेवन्तेत्यर्थः ॥ ४३ ॥

अर्थ–॥ ४३ ॥ शंकराचीं शस्त्रास्त्रें धारण करणाऱ्या, त्या वेषाला शोभतील असे अलंकार आपापल्या आंगावर घालणाऱ्या शंकराच्या अंगभूत कितीएक स्त्रिया त्या शंकरास भजत होत्या.

श्लोकः–आप्ताधिकारिणः केचिदनंतप्रमुखा अपि ॥
अष्टौ विद्येश्वरा देवमभजन्त समन्ततः ॥ ४४ ॥

व्याख्यानं—परमाप्ताधिकारिणः केचिदनंतसूक्ष्मशिवोत्तमैकनेत्रैकरुद्रत्रिमूर्तिश्रीकंठशिखंडिसंज्ञकाः अष्टविद्येश्वराः परमेश्वरमभितोऽसेवन्त इत्यर्थः ॥ ४४ ॥

अर्थ–॥ ४४ ॥ नातलगांतील अधिकारी अनंत वगैरे आठजण विद्येश्वर शंकराच्या बाजूस उभे राहून सेवा करीत होते.

श्लोकः–ततो नंदी महाकालश्चंडो भृंगी रिटिस्ततः ॥
घण्टाकर्णः पुष्पदंतः कपाली वीरभद्रकः ॥ ४५ ॥

अर्थ–॥ ४५ ॥ तदनंतर नंदी, महाकाळ, चंड, भृंगी रिटि, घंटाकर्ण, पुष्पदंत, कपाली, वीरभद्र.

श्लोकः–एवमाद्या महाभागा महाबलपराक्रमाः ॥
निरंकुशमहासत्वा भेजिरे तं महेश्वरं ॥ ४६ ॥

व्याख्यानं—स्पष्टम् ॥ ४५ ॥ ४६ ॥

अर्थ–॥ ४६ ॥ इत्यादिक प्रमुख प्रमुख भाग्यवान् मोठमोठे शक्तिमान् पराक्रमी व ज्यांच्या शक्ती कोठेंच कुंठित होत नाहींत असे प्रमथगण शंकराची सेवा करीत होते.

अवतरणिका–अथ प्रमथगणान् पंचभिस्सूत्रैर्वर्णयति—

श्लोकः–अणिमादिकमैश्वर्यं येषां सिद्धेरपोहनं ॥
ब्रह्मादयः सुरा येषामज्ञालंघनभीरवः ॥ ४७ ॥

व्याख्यानं—अणिमाद्यष्टैश्वर्यं येषां प्रमथगणानां सिद्धेः सकाशात्तुच्छं ब्रह्मादयः सुराः येषां आज्ञालंघने भयशीला इत्यर्थः ॥ ४७ ॥

अर्थ–॥ ४७ ॥ त्या प्रमथगणांच्या अष्टमहासिद्धि दासीसारख्या होत्या, फार काय परंतु ब्रह्मादिक देव देखील त्यांची आज्ञा मोडण्यास भीत होते.

श्लोकः–मोक्षलक्ष्मीपरिष्वंगमुदिता येऽन्तरात्मना ॥
येषामीषत्करं विश्वसर्गसंहारकल्पनं ॥ ४८ ॥

व्याख्यानं—अन्तर्मुखीभूतबुद्ध्या मोक्षलक्ष्म्यालिंगने मुदिताः येषां विश्वसृष्ट्यादिकल्पनमीषत्करं तुच्छमित्यर्थः ॥ ४८ ॥

अर्थ–॥ ४८ ॥ मोक्षरूप लक्ष्मीचें आलिंगन मिळाल्यामुळें ते मनांत संतुष्ट होते, त्या प्रमथांस पृथ्वी उत्पन्न करणें किंवा पृथ्वीचा संहार करणें ह्या दोन्ही गोष्टी कसपटासारख्या वाटत असत.

श्लोकः–ज्ञानशक्तिः परा येषां सर्ववस्तुप्रकाशिनी ॥
आनंदकणिका येषां हरिब्रह्मादिसम्पदः ॥ ४९ ॥

व्याख्यानं—येषां ज्ञानशक्तिः सर्ववस्तुप्रकाशिनी वरा श्रेष्ठा ब्रह्मादीनां सम्पदः येषां आनंदकणिकाः लेशा इत्यर्थः ॥ ४९ ॥

अर्थ–॥ ४९ ॥ त्या प्रमथगणांची ज्ञानशक्ति सर्व वस्तूंचें यथार्थज्ञान करून देणारी व मोठी होती, ब्रह्मदेव विष्णु वगैरे देवांचीं ऐश्वर्यें त्यांच्या मनास अगदीं थोडें सुख देणारीं वाटत असत (त्या ऐश्वर्यास ते तुच्छ मानीत असत.)

श्लोकः–आकांक्षन्ते पदं येषां योगिनो योगतत्पराः ॥
कांक्षणीयफलो येषां संकल्पः कल्पपादपः ॥ ५० ॥

व्याख्यानं—शिवयोगतत्पराः योगिनः येषां पदं कांक्षन्ते अपेक्षन्ते येषां संकल्पः कामितार्थफलयुतकल्पपादप इत्यर्थः ॥ ५० ॥

अर्थ–॥ ५० ॥ योगसाधनांत निमग्न राहणारे ऋषि आपणांस प्रमथांची योग्यता कधीं येईल? ह्मणून नेहमीं वाट पहात असतात. प्रमथगणांच्या मनांत अमुक वस्तु पाहिजे असें येतांच ती वस्तु प्रत्यक्ष कल्पवृक्ष त्यांस आणून देत होता.

श्लोकः–कर्मकालादिकार्पण्यचिन्ता येषां न विद्यते ॥
येषां विक्रमसन्नाहाः मृत्योरपि च मृत्यवः ॥ ५१ ॥
ते सारूप्यपदं प्राप्ताः प्रमथा भेजिरे शिवं ॥

व्याख्यानं—संचितादिकर्मभूतादिकालकामप्रभृत्युद्भूतकार्पण्यचिन्ता येषां न विद्यते येषां पराक्रमप्रसंगाः मृत्योरपि मृत्यवः सारूप्यपदं प्राप्तास्ते प्रमथाः हरं भेजिरे भजसेवायामिति धातुः ॥ ५१ ॥

अर्थ–॥ ५१ ॥कर्म, काल व कृपणपणाची काळजी त्या प्रमथगणांस मुळींच नव्हती, ते इतके पराक्रमी होते कीं, त्यांस पाहून प्रत्यक्ष मृत्यु देखील आपणास मृत्यु आला असें मानीत होता, ते शिवसारूप्य पावलेले प्रमथगण शिवाची सेवा करीत होते.

श्लोकः–ब्रह्मोपेंद्रमहेंद्राद्या विश्वतंत्राधिकारिणं ॥
आयुधालंकृतप्रान्ताः परितस्तं सिषेविरे ॥ ५२ ॥

व्याख्यानं—ब्रह्मविष्णुरुद्रेंद्रप्रभृतित्रयस्त्रिंशत्कोटिदेवाः स्वकीयायुधालंकृतश्रेणियुग्माः विश्वसृष्टावधिकारवन्तं तं शिवं परितः सिषेविर इत्यर्थः ॥ ५२ ॥

अर्थ–॥ ५२ ॥ तसेच त्रैलोक्याचीं सूत्रें हातांत असणाऱ्या शंकराच्या ब्रह्मा, विष्णु, इंद्र वगैरे देव आपापल्या हातांत शस्त्रास्त्रें घेऊन बाजूस उभे राहिले, होते व शंकराची सेवा करीत होते.

श्लोकः–आदित्या वसवो रुद्राः यक्षगंधर्वकिन्नराः ॥
दानवा राक्षसा दैत्याः सिद्धा विद्याधरोरगाः ॥
अभजंत महादेवमपरिच्छिन्नसैनिकाः ॥ ५३ ॥

व्याख्यानं—आदित्या द्वादशादित्या, अष्टवसवः, एकादशरुद्राः, कुबेरप्रभृतियक्षाः, हाहाप्रभृतिगन्धर्वाः, अश्वमुखादिकिन्नराः, बाणादिदानवाः, रावणादिराक्षसाः, तारकादिदैत्याः आदिनाथादिसिद्धाः, मणिभद्रादिविद्याधराः, शेषाद्युरगाः, अविच्छिन्नसैनिकाः सन्तः, महादेवमभजन्त इत्यर्थः ॥ ५३ ॥

अर्थ-॥ ५३ ॥ तसेच आदित्य वसु, रुद्र, यक्ष, गंधर्व, किन्नर, दानव, राक्षस, दैत्य, सिद्ध, विद्याधर, सर्प वगैरे सर्व जातीचे सेनापति व सैन्य महादेवाची आज्ञा मानण्यास तयार होते.

श्लोकः-वसिष्ठो वामदेवश्च पुलस्त्यागस्त्यशौनकाः ॥
दधीचिर्गौतमश्चैव सानंदशुकनारदाः ॥ ५४ ॥

अर्थ-॥ ५४ ॥ वसिष्ठ, वामदेव, पुलस्त्य, अगस्त्य, शौनक, दधीचि, गौतम सानंद, शुक, नारद,

श्लोकः-उपमन्युभृगुव्यासपाराशरमरीचयः ॥
इत्याद्या मुनयः सर्वे नीलकण्ठं सिषेविरे ॥ ५५ ॥

अर्थ-॥ ५५ ॥ उपमन्यु, भृगु, व्यास, पाराशर, मरीचि, इत्यादि सर्व मुनीश्वर शंकरास भजत होते.

श्लोकः-पार्श्वस्थपरिवाराणां विमलांगेषु बिंबितः ॥
सर्वान्तर्गतमात्मानं स रेजे दर्शयन्निव ॥ ५६ ॥

अर्थ-॥ ५६ ॥ शंकराच्या आजुबाजूस जो सेवकगणांचा समुदाय उभा होता त्यांच्या स्वच्छ शरीरांत शंकराचीं प्रतिबिंबें पडून मी सर्वान्तर्यामी आहें असें शंकर उघड रीतीनें सर्वांस दाखवीत आहेत अशाप्रमाणें शोभले.

अवतरणिका-अथ परमेश्वरस्य राजव्यापारं दशभिस्सूत्रैः प्रदर्शयति—

श्लोकः-क्षणं स शंभुर्देवानां कार्यभागं निरूपयन् ॥
क्षणं गन्धर्वराजानां गानविद्यां विभावयन् ॥ ५७ ॥

अर्थ-॥ ५७ ॥ एखादे वेळीं शंकरांनीं सर्व देवांस अमुक अमुक काम करा ह्मणून सांगावें, एखादे वेळीं गंधर्वांचें सुस्वर गाणें ऐकावें.

श्लोकः-ब्रह्मविष्ण्वादिभिर्देवैः क्षणमालापमाचरन् ॥
क्षणं देवमृगाक्षीणां लालयन्नृत्यविभ्रमं ॥ ५८ ॥

अर्थ-॥ ५८ ॥ एखादे वेळीं ब्रह्मदेव, विष्णु वगैरे देवांबरोबर सुखासमाधानाच्या गोष्टी सांगाव्या, एखादे वेळीं क्षणभर देवस्त्रियांचें नाचण्याचे प्रकार पहावे.

श्लोकः-व्यासादीनां क्षणं कुर्वन् वेदोच्चारेषु गौरवं ॥
विदधानः क्षणं देव्या मुखे बिंबाधरे दृशः ॥ ५९ ॥

अर्थ-॥ ५९ ॥ एखादे वेळीं वेदाचा उच्चार फार चांगला ह्मणून शंकरांनीं व्यासादिकांची स्तुति करावी, एखादे वेळीं पिकल्या तोंडल्याप्रमाणें ओंठ असणाऱ्या पार्वतीच्या मुखाकडे आपली दृष्टि लावावी.

श्लोकः–हास्यनृत्यं क्षणं पश्यन्भृंगिना परिकल्पितं ॥
नंदिना वेत्रहस्तेन सर्वतंत्राधिकारिणा ॥ ६० ॥

व्याख्यानं—स्पष्टम् ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

अर्थ-॥ ६० ॥ एखादे वेळीं भृंगीच्या हांसण्याकडे व नाचण्याकडे लक्ष्य द्यावें, शंकराच्या जवळच नंदिकेश्वर उभा होता, त्यानें आपल्या हातांत वेताची छडी घेतली होती, सर्व कामाचा त्याचेकडे शंकरांनीं अधिकार दिलेला होता.

श्लोकः–अमुंचता सदा पार्श्वमात्माभिप्रायवेदिना ॥
चोदितान्वासयन् कांश्चिद्विसृजन्भ्रूविलासतः ॥
संभावयंस्तथा चान्यानन्यानपि नियामयन् ॥ ६१ ॥

व्याख्यानं—भ्रूसंज्ञया कांश्चिद्विसृजन् प्रेषयंस्तथान्यान्संभावयन्, प्रियोक्तिं वदन्नन्यान्नियामयन्, शिक्षयन् शिष्टं स्पष्टं ॥ ६१ ॥

अर्थ-॥ ६१ ॥ शंकराच्या जवळ नेहमीं नंदिकेश्वरानें राहावें व शंकराच्याच मनाप्रमाणें नंदिकेश्वरानें नेहमीं वागावें; त्या नंदिकेश्वराकडून शंकरांनीं ज्यांस बोलाऊन आणावयाचें त्यांस बोलाऊन आणावें, कितीएकांस नेत्रसंकेत करून घालवून द्यावें, कितीएकांचा आदर सत्कार नंदिकेश्वराकडून करवावा व कितीएकांस शासन करवावें.

श्लोकः–समस्तभुवनाधीशमौलिलालितशासनः ॥
अकुंठशक्तिरव्याजलावण्यललिताकृतिः ॥ ६२ ॥

व्याख्यानं—समस्तभुवनाधीशः, ब्रह्ममस्तकस्थापितसमस्तज्ञानशक्तिमानप्रतिहतशक्तिः, निजलावण्यमनोहराकृतिरित्यर्थः ॥ ६२ ॥

अर्थ-॥ ६२ ॥ शंकर हे सर्वत्रैलोक्याचे प्रभु असल्यामुळें त्यांची आज्ञा सर्व देव शिरसा मान्य करीत असत, शंकराची शक्ति अमर्याद असून स्वाभाविक सौंदर्यामुळें त्यांचा आकार फार सुंदर होता.

श्लोकः–स्थिरयौवनसौरभ्यशृंगारितकलेवरः ॥
आत्मशक्त्यमृतास्वादरसोल्लासितमानसः ॥ ६३ ॥

व्याख्यानं—वृद्धिक्षयरहितयौवनोद्रेकशृंगारितकलेवरः, स्वसमवेतशक्तिलक्षणपरमानंदरसास्वादनोज्जृंभितांतरंगः ॥ ६३ ॥

अर्थ-॥ ६३ ॥ त्या शंकराचे आंगीं नेहमीं कायमचें तारुण्य असल्यामुळें त्यांचें शरीर सुगंधित व सुशोभित दिसत असे. आत्मशक्तिरूप अमृतरसाची गोडी त्या शंकरास लागली असल्यामुळें ते नेहमीं आनंदित असत.

श्लोकः-स्वाभाविकमहैश्वर्यविश्रामपरमावधिः
निष्कलंकमहासत्वनिर्मितानेकविग्रहः ॥ ६४ ॥

व्याख्यानं—स्वाभाविकेति अनौपाधिकसर्वज्ञतादिमहैश्वर्यविश्रांतिपर्यंतभूमिः, अकलंकमहाशक्तिनिर्मितानेकदिव्यमंगलमूर्तिमान् ॥ ६४ ॥

अर्थ-॥ ६४ ॥ शंकराचें स्वाभाविक ऐश्वर्य आणि विश्रांतिसुख अमर्याद होतें. त्यांचें शरीर निर्दोष अशा सत्वगुणानें निर्माण केलें आहे असें वाटे.

श्लोकः-अखंडारातिदोर्दण्डकंडूखण्डनपंडितः ॥
चिंतामणिः प्रसन्नानां श्रीकंठः परमेश्वरः ॥ ६५ ॥

व्याख्यानं—अपरिमितसज्जनारातिबाहुदंडकंडूखंडनविचक्षणः, अतएव निर्मलान्तःकरणानामिष्टार्थप्रदः, श्रीकंठः परमेश्वरो राजत इति शेषः ॥ ६५ ॥

अर्थ-॥ ६५ ॥ शंकर कितीही शत्रु आले तरी त्यांचा पराभव करण्यास पूर्ण समर्थ होते, ते प्रसन्न झाल्यावर चिंतामणिरत्नाप्रमाणें भक्तलोकांच्या इच्छा परिपूर्ण करीत.

अवतरणिका-एवं शिवस्य वैभवं वर्णयित्वाग्रे सूत्रकादशकेन रेणुकगणेशस्य शिवभक्तिमहत्वं सूचयति—

श्लोकः-सभांतरगतं तंत्र रेणुकं गणनायकं ॥ माहूयेत्थं समादिशत् ॥६६॥
प्रसादं सुलभं दातुं तांबूलं स तमाह्वयत् ॥ ६६ ॥

व्याख्यानं—स शिवः सभामध्यगतं तंत्र मुख्यं अथवा प्रसिद्धं तं रेणुकं प्रथि सुलभं तांबूलप्रसादं दातुं, शिरसा आव्हयत् आकारितवानित्यर्थः ॥ ६६ ॥

अर्थ-॥६६ ॥ ते शंकर सभेंत बसले असतां त्यांनीं त्या मुख्य रेणुक प्रमथश्रेष्ठास सुलभ तांबूल प्रसाद देण्यासाठीं जवळ बोलाविलें.

श्लोकः-शंभोराह्वानसंतोषसंभ्रमेणैव दारुकं ॥
उल्लंघ्य पार्श्वमगमल्लोकनाथस्य रेणुकः ॥ ६७ ॥

व्याख्यानं—पार्श्वं वामभागमित्यर्थः ॥ ६७ ॥

अर्थ-॥ ६७ ॥ शंकरांनीं आपणास प्रसाद देण्यासाठीं जवळ बोलाविलें इतक्यामुळें त्यास मोठा आनंद होऊन त्या आनंदाच्या घाईघाईत तो दारुकास ओलांडून त्यास न जुमानतां शंकराजवळ गेला.

श्लोकः—तमालोक्य विभुस्तत्र समुल्लंघितदारुकं ॥
माहात्म्यं निजभक्तानां द्योतयन्निदमब्रवीत् ॥ ६८ ॥

व्याख्यानं—विभुः स्वतंत्र इत्यर्थः । स्पष्टमन्यत् ॥ ६८ ॥

अर्थ—॥ ६८ ॥ तो दारुकास ओलांडून आला असें पाहतांच आपल्या भक्ताचा मोठेपणा प्रकट करण्यासाठीं शंकर त्या सभेंतच रेणुकास ह्मणाले.

श्लोकः—रे रे रेणुक दुर्बुद्धे कथमेष त्वयाऽधुना ॥
उल्लंघितः सभामध्ये मम भक्तो हि दारुकः ॥ ६९ ॥

अर्थ—॥ ६९ ॥ अरेरे दुष्टा, रेणुका, तूं आतां ह्या दारुकाचा सभेंत उपमर्द केलास, दारुक माझा परमभक्त आहे.

श्लोकः—लंघनं मम भक्तानां परमानर्थकारणं ॥
आयुः श्रियं कुलं कीर्तिं निहन्ति हि शरीरिणां ॥ ७० ॥

व्याख्यानं—हि प्रसिद्धमित्यर्थः ॥ ६९ ॥ ७० ॥

अर्थ—॥ ७० ॥ माझ्या भक्ताचा कोणीं उपमर्द केल्यास त्यापासून त्यावर अनेक संकटें गुदरतात, माझ्या भक्तांचा उपमर्द करणाऱ्या प्राणिमात्रांच्या आयुष्याचा, संपत्तीचा, कुलाचा व कीर्तीचा नाश होतो.

श्लोकः—मम भक्तमवज्ञाय मार्कण्डेयं पुरा यमः ॥
मत्पादताडनादासीत्स्मरणीयकलेवरः ॥ ७१ ॥

व्याख्यानं—विनष्टकलेवरत्वात् स्मरणीयकलेवर आसीदित्यर्थः स्पष्टमन्यत्॥ ७१॥

अर्थ—॥ ७१ ॥ पूर्वीं यमानें माझ्या मार्कण्डेय भक्ताचा असाच छळ केला त्यामुळें माझी त्याला अशी जोरानें लाथ बसली तिच्यामुळें तो लागलाच मरण पावला.

श्लोकः—भृगोश्च शंकुकर्णस्य मम भक्तिमतोस्तयोः ॥
कृत्वानिष्टमभूद्विष्णुर्विकेशो दशयोनिभाक् ॥ ७२ ॥

व्याख्यानं—विकेशः शिरःपूर्वभागोत्पादितकेशवानित्यर्थः ॥ ७२ ॥

अर्थ—॥ ७२ ॥ तसेंच माझे परमभक्त भृगु आणि शंकुकर्ण यांचा विष्णूनें असाच छळ केला, त्यामुळें विष्णूचे केश नाहींसे होऊन त्यास दहावेळ निरनिराळ्या योनींत जन्म घ्यावे लागले.

श्लोकः—मद्भक्तेन दधीचेन कृत्वा युद्धं जनार्दनः ॥
भग्नचक्रायुधः पूर्वं पराभवमुपागमत् ॥ ७३ ॥

अर्थ–॥ ७३ ॥ माझा भक्त दधीचि ह्या बरोबर पूर्वीं विष्णूनें युद्ध केलें त्यांत त्याच्या सुदर्शनचक्राचा नाश होऊन त्याचा पराभव झाला.

श्लोकः–कृताश्वमेधो दक्षोऽपि मद्भक्तांश्च गणेश्वरान् ॥
अवमत्य सभामध्ये मेषवक्त्रोऽभवत्पुरा ॥ ७४ ॥

व्याख्यानं–अवमत्य उदास्येत्यर्थः ॥ ७३ ॥ ७४ ॥

अर्थ–॥ ७४ ॥ दक्ष ब्रह्मयानें अश्वमेध यज्ञ केला व सभेमध्यें माझ्या भक्तांचा उपमर्द केला त्यामुळें त्यास बोकडाचें तोंड झालें.

श्लोकः–श्वेतस्य मम भक्तस्य दुरतिक्रमतेजसः ॥
औदासिन्येन कालोऽपि मया दग्धः पुराऽभवत् ॥ ७५ ॥

व्याख्यानं—दुरतिक्रमतेजसः अनिंदिततेजस इत्यर्थः ॥ ७५ ॥

अर्थ–॥ ७५ ॥ श्वेत नांवाचा माझा भक्त मोठा पराक्रमी होता त्याकडे दुर्लक्ष्य केल्यामुळें मीं पूर्वीं यमास देखील जाळून टाकिलें.

श्लोकः–एवमन्येऽपि बहवो मद्भक्तानामतिक्रमात् ॥
परिभूता हताश्चासन्भक्ता मे दुरतिक्रमाः ॥ ७६ ॥

अर्थ–॥ ७६ ॥ असे दुसरेही कितीएक माझ्या भक्तांचा उपमर्द केल्यामुळें पराभव पावले व नाश पावले. सारांश, माझे भक्त मोठे पराक्रमी होत, त्यांचा कोणीही उपमर्द करितां कामास नये.

अवतरणिका–एवं भक्तमाहात्म्यं वर्णयित्वा तदुल्लंघनदोषस्य फलं निर्दिशति—

श्लोकः–अविचारेण मद्भक्तो लंघितो दारुकस्त्वया ॥
एष त्वं रेणुकानेन जन्मवान्भव भूतले ॥ ७७ ॥

व्याख्यानं—एष दारुक इति संबंधः ॥ ७७ ॥

अर्थ–॥ ७७ ॥ रेणुका, त्वां मूर्खपणानें ह्या माझ्या दारुक भक्ताचा उपमर्द केलास, त्या पातकामुळें तुला पृथ्वीवर जन्म घेतला पाहिजे.

अवतरणिका–अथ रेणुको जन्मनि भीतस्सन् पंचभिः सूत्रैः शिवं विज्ञापयति—

श्लोकः–इत्युक्तः परमेशेन भक्तमाहात्म्यशंसिना ॥
प्रार्थयामासदेवेशं प्रणिपत्य स रेणुकः ॥ ७८ ॥

व्याख्यानं—इत्युक्तः लोकहितार्थमित्युक्तः भवदाव्हानसंभ्रांत्या मया अज्ञानादयं लंघितः, मां पाहीति प्रार्थयामासेत्यर्थः ॥ ७८ ॥

अर्थ–॥ ७८ ॥ भक्तांचा मोठेपणा सुचविणाऱ्या शंकरानें असें ह्मटल्यावर रेणुक शंकरास नमस्कार करून ह्मणाला.

श्लोकः–मानुषीं योनिमासाद्य महादुःखविवर्धिनीं ॥
जात्यायुर्भोगवैषम्यहेतुकर्मोपपादिनीं ॥ ७९ ॥

अर्थ–॥ ७९ ॥ मनुष्ययोनीमध्यें मोठमोठीं दुःखें वरचेवर येतात. जाति, आयुष्य, सुखोपभोग, व दुःख उत्पन्न करणारीं अनेक प्रकारचीं कर्में तेथें घडतात.

श्लोकः–समस्तदेवकैंकर्यकार्पण्यप्रसवस्थलीं ॥
महातापत्रयोपेतां वर्णाश्रमनियंत्रितां ॥
विहाय त्वत्पदांभोजसेवां किं वा वसाम्यहं ॥ ८० ॥

व्याख्यानं—त्वत्पदांबुजसेवां विहाय, एवंरूपमानुषीं योनिमासाद्य स्थातुं योग्यः किमहमित्यर्थः ॥ ७९ ॥ ८० ॥

अर्थ–॥ ८० ॥ मनुष्ययोनीमध्यें अनेक देवांची सेवा करावी लागते, मनुष्ययोनि तर कृपणपणाची जन्मभूमि आहे. आध्यात्मिक, आधिभौतिक, व आधिदैविक अशीं मोठमोठीं दुःखें तेथें भोगावीं लागतात. त्या योनींत जाति आणि आश्रम वगैरे अनेक अडचणी आहेत. अशा ठिकाणीं मी तुझ्या चरणकमलाची सेवा करणें सोडून कसा राहूं ?

श्लोकः–यथा मे मानुषो भावो न भवेत्क्षितिमण्डले ॥
तथा प्रसादं देवेश विधेहि करुणानिधे ॥ ८१ ॥

अर्थ–॥ ८१ ॥ हे ईश्वरा, तूं कृपेचा समुद्र आहेस, सर्व देवांचाही देव आहेस, ज्या तऱ्हेनें मला पृथ्वीवर मनुष्यजन्म घ्यावा लागणार नाहीं असा माझ्यावर अनुग्रह कर.

अवतरणिका–एवं प्रार्थितवन्तं रेणुकं स्वात्मत्वेन निश्चित्याभयं दत्वा षड्भिः सूत्रैः प्रयोजनं दर्शयति—

श्लोकः–इति संप्रार्थितो देवो रेणुकेन महेश्वरः ॥
मा भैषीर्मम भक्तानां कुतो भीतिरिहेष्यति ॥ ८२ ॥

अर्थ–॥ ८२ ॥ रेणुकानें अशी प्रार्थना केल्यावर महादेव ह्मणाले, रेणुका, भिऊं नकोस, माझ्या भक्तांस संकटें कशीं उत्पन्न होतील ? कधींच होणार नाहींत.

श्लोकः–श्रीशैलस्योत्तरे भागे त्रिलिंगविषये शुभे ॥
कोल्लिपाक्यभिधानोऽस्ति कोऽपि ग्रामो महत्तरः ॥ ८३ ॥

व्याख्यानं—त्रिलिंगविषये आंध्रदेशे कोल्लिपाक्याख्यमहाग्रामोऽस्ति ॥८२॥८३॥

अर्थ–॥ ८३ ॥ श्रीशैलपर्वताच्या उत्तरेकडे तेलंग देशांत कोल्लिपाक नांवाचा फार मोठा गांव आहे.

श्लोकः–सोमेश्वराभिधानस्य तत्र वासवतो मम ॥
अस्पृशन्मानुषं भावं लिंगात्प्रादुर्भविष्यसि ॥ ८४ ॥

व्याख्यानं—तत्र वासवतः सोमेश्वराभिधानस्य मम लिंगात् मानुषं भावमस्पृशन् प्रादुर्भविष्यसीत्यर्थः ॥ ८४ ॥

अर्थ–॥ ८४ ॥ तेथें मी सोमेश्वर असें नांव घेऊन राहतों, त्या माझ्या सोमेश्वर लिंगापासून तूं जन्मशील, तुला मनुष्याच्या स्त्रीच्या पोटीं जन्म घेऊन गर्भवासांत पडावें लागणार नाहीं.

श्लोकः–मदीयलिंगसंभूतं मद्भक्तपरिपालकं ॥
विस्मिता मानुषाः सर्वे त्वां भजन्तु मदाज्ञया ॥ ८५ ॥

अर्थ–॥ ८५ ॥ तूं माझ्या सोमेश्वर लिंगापासून जन्मलास, सर्व प्राणिमात्रांचें हित करणारा आहेस असें समजतांच माझे आज्ञेप्रमाणें सर्व लोक तुझी सेवा करूं लागतील.

श्लोकः–मदद्वैतपरं शास्त्रं वेदवेदान्तसंमतं ॥
स्थापयिष्यसि भूलोके सर्वेषां हितकारकं ॥ ८६ ॥

अर्थ–॥ ८६ ॥ तूंही माझ्या आज्ञेप्रमाणें माझें श्रेष्ठ अद्वैतशास्त्र वेद आणि वेदांत ह्यांस मान्य असणारें पृथ्वीवर विस्तार करशील व त्यामुळें सर्वांचें कल्याण होईल.

श्लोकः–मम प्रतापमतुलं मद्भक्तानां विशेषतः ॥
प्रकाशय महीभागे वेदमार्गानुसारतः ॥ ८७ ॥

अर्थ–॥ ८७ ॥ तूं माझा आणि माझ्या भक्तांचा पराक्रम वेदमार्गाला बाध न येईल अशातऱ्हेनें पृथ्वीवर प्रसिद्धीस आण.

अवतरणिका–अथ संग्रहकर्तुः शिवयोगिनो वाक्यम्—

वृत्तम्–इत्युक्त्वा परमेश्वरः स भगवान्भद्रासनादुत्थितो
ब्रह्मोपेंद्रमुखान्विसृज्य विबुधान् भ्रूसंज्ञया केवलं ॥

पार्वत्या सहितो गणैरभिमतैः प्राप स्वमन्तःपुरं
क्षोणीभागमवातरत्पशुपतेराज्ञावशाद्रेणुकः ॥ ८८ ॥

व्याख्यानं—अभिमतैः अत्याप्तैः नंद्यादिभिः स्वकमंतःपुरं भगवान् प्राप अथ-रेणुको ब्रह्माधिपतेः शिवस्य आज्ञावशाद्भूभागं प्राप्तवानित्यर्थः ॥ ८८ ॥

अर्थ—॥ ८८ ॥ इतकें बोलून शंकर आपल्या सिंहासनावरून उठले, ब्रह्मदेव विष्णु वगैरे देवांस त्यांनीं नेत्रसंकेतानें (आपल्या डोळ्यांच्या खुणेनें) आपापल्या स्थानांस जावयास सांगितलें व आपल्या आवडत्या प्रमथगणांस मात्र आपल्या-बरोबर घेऊन पार्वतीसहित आपल्या अन्तःपुरांत गेले; शंकराचे आज्ञेप्रमाणें रेणुक कोल्लिपाक गांवांतील सोमेश्वर लिंगापासून पृथ्वीवर जन्मास आला.

इति श्रीसिद्धान्तशिखामणौ रेणुकस्य भूलोकावगतिर्नाम तृतीयः परिच्छेदः समाप्तः

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्र-दीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां रेणुकस्य भूलोकावगतिर्नाम तृतीय-परिच्छेदः समाप्तः ॥

ह्याप्रमाणें श्रीसिद्धान्तशिखामणि ग्रंथांतील रेणुकाचें पृथ्वीलोकावर जन्मास येणें हें वर्णन असलेला हा तिसरा परिच्छेद संपला.

॥ श्रीसांबाय सगणाय नमः ॥

चतुर्थपरिच्छेदप्रारंभः ।

अवतरणिका—"अथाष्टभिः सूत्रैः शिवयोगी रेणुकगणेश्व-रस्य स्वरूपं वर्णयति"—

श्लोकः—अथ त्रिलिंगविषये कोल्लिपाक्यभिधे पुरे ॥
सोमेश्वरमहालिंगात्प्रादुरासीत्स रेणुकः ॥ १ ॥

अर्थ—॥ १ ॥ मग तेलंग देशांत कोल्लिपाक नांवाच्या गांवांत सोमेश्वर लिंगा-पासून तो रेणुक जन्मला.

श्लोकः—प्रादुर्भूतं तमालोक्य शिवलिंगात्त्रिलिंगजाः ॥
विस्मिताः प्राणिनस्सर्वे बभूवुरतितेजसं ॥ २ ॥

अर्थ—॥ २ ॥ शिवलिंगापासून तो अतिशय तेजस्वी रेणुक जन्मलेला पाहून तेलंगदेशांतील सर्व लोकांस मोठें आश्चर्य वाटलें.

श्लोकः—भस्मोद्धूलितसर्वांगं साररुद्राक्षभूषणं ॥
जटामुकुटसंयुक्तं त्रिपुण्ड्रांकितमस्तकं ॥ ३ ॥

व्याख्यानं—सारशब्देन बाहुल्यमुच्यते ॥ ३ ॥

अर्थ—॥ ३ ॥ रेणुकाच्या सर्व आंगास भस्मलेपन केलेलें होतें. उत्तम उत्तम रुद्राक्षांच्या गळ्यांत माळा घातल्या होत्या. मस्तकावर मुकुटासारख्या जटा बांधलेल्या होत्या व कपाळास विभूतीचा त्रिपुंड्र लाविलेला होता.

श्लोकः—कटीतटीपटीभूतकंथापटलबंधुरं ॥
दधानं योगदण्डं च भस्माधारं कमण्डलुं ॥ ४ ॥

अर्थ—॥ ४ ॥ कमरेस वस्त्रासारखी कंथा गुंडाळली होती व त्यानें हातांत योगदंड आणि भस्म ठेवण्याचा कमंडलु घेतला होता.

श्लोकः—शिवाद्वैतपरिज्ञानपरमानंदमोदितं ॥
निर्धूतसर्वसंसारवासनादोषपंजरं ॥ ५ ॥

अर्थ—॥ ५ ॥ शिवाचें अद्वैत शास्त्र त्यास चांगल्या रीतीनें समजल्यामुळें तो अत्यानंदांत निमग्न झाला होता. सर्वप्रकारच्या संसारवासनांचे दोष त्याचे तुटले होते.

श्लोकः—शिवागमसुधासिंधुसमुन्मेषसुधाकरं ॥
चित्तारविंदसंगूढशिवपादांबुजद्वयं ॥ ६ ॥

अर्थ—॥ ६ ॥ शिवागमरूप अमृतसमुद्रास तो भरती आणणारा मूर्तिमन्त चंद्रच होता. तो आपल्या हृदयकमलांत शिवाचे दोन्ही चरण नेहमीं आठवीत होता.

श्लोकः—यमादियोगतंत्रज्ञं स्वतंत्रं सर्वकर्मसु ॥
समस्तसिद्धसंतानसमुदायशिखामणिं ॥ ७ ॥

अर्थ—॥ ७ ॥ यम नियम प्राणायाम वगैरे योगसाधनाचीं आंगें त्यास माहीत होतीं. तो सर्व कर्मांमध्यें स्वतंत्र होता व सर्व सिद्धवंशाच्या समुदायांत तो प्रमुख असा होता.

श्लोकः—वीरसिद्धान्तनिर्वाहकृतपट्टनिबंधनं ॥
आलोकमात्रनिर्भिन्नसमस्तप्राणिपातकं ॥ ८ ॥

व्याख्यानं—वीरसिद्धांतशब्देन वीरशैवसिद्धांतमुच्यते स्पष्टमन्यत् ॥ ८ ॥

अर्थ—॥ ८ ॥ वीरशैवमताचा प्रसार करण्याचा जणु काय त्यानें विडा

उचललेला होता व त्याचें दर्शन झाल्याबरोबर प्राणिमात्रांचें सर्व पाप दूर होईल इतका रेणुक पवित्र होता.

अवतरणिका–"अथ मर्त्यं प्राप्त एष रेणुको जनैः पृष्टस्सन्नुत्तरं दत्वा मलयाद्रिमगमदित्याह तमपृच्छन्नित्यादिश्लोकपंचकेन"—

श्लोकः–तमपृच्छन्जनास्सर्वे नमन्तः को भवानिति ॥
इति पृष्टो महायोगी जनैर्विस्मितमानसैः ॥ ९ ॥

अर्थ–॥ ९ ॥ त्याला पाहतांच तेलंगदेशांतील सर्व लोकांनीं त्यास नमस्कार करून, तूं कोण ? ह्मणून विचारिलें; कांतर त्याचें तें अद्भुत तपःसामर्थ्य पाहून त्या लोकांस मोठें आश्चर्य वाटलें.

श्लोकः–प्रत्युवाच शिवाद्वैतमहानंदपरायणः ॥
पिनाकिनः पार्श्ववर्ती रेणुकाख्यगणेश्वरः ॥ १० ॥

अर्थ–॥ १० ॥ त्या लोकांनीं असें विचारल्यावर शिवाच्या अद्वैतशास्त्राच्या परमानंदांत बुडालेल्या त्या रेणुकानें उत्तर दिलें कीं, मी महादेवाचा अगदीं जवळ राहणारा सेवक रेणुक नांवाचा प्रमथ आहें.

श्लोकः–केनचित्कारणेनाहं शिवलिंगादिहाभवं ॥
नाम्ना रेणुकसिद्धोऽहं सिद्धसन्ताननायकः ॥ ११ ॥

अर्थ–॥ ११ ॥ मी कांहीं कारणामुळें येथें ह्या सोमेश्वरलिंगापासून जन्मास आलों माझें नांव रेणुकसिद्ध असून मीं सर्व सिद्धवंशाचा प्रमुख (मुख्य) पुरुष आहें.

श्लोकः–स्वच्छंदचारी लोकेऽस्मिन् शिवसिद्धान्तपालकः ॥
खण्डयन्जैनचार्वाकबौद्धादीनां दुरागमान् ॥ १२ ॥

अर्थ–॥ १२ ॥ मी कोणाचाताबेदार नाहीं. मी स्वच्छंदपणानें ह्या जगामध्यें राहून शिवशास्त्राचें रक्षण करणार आहें, जैन, चार्वाक, बौद्ध वगैरे शिवधर्माचा द्वेष करणाऱ्यांच्या शास्त्राचा मी उच्छेद करीन.

श्लोकः–इत्युक्त्वा पश्यतां तेषां विषयस्थिरचक्षुषां ॥
उत्थाय व्योममार्गेण मलयाद्रिमुपागमत् ॥ १३ ॥

अर्थ–॥ १३ ॥ रेणुकेश्वरानें असें ह्मटलें तेव्हां तेलंगदेशांतील सर्व लोक

त्याजकडे टक लावून पाहूं लागले; इतक्यांत तो तेथून उठून सर्वांच्या समक्ष आकाशमार्गानें मलयपर्वताकडे चालता झाला.

अवतरणिका–अथ सूत्रत्रयेण मलयाद्रिं वर्णयति—

श्लोकः–नवचंदनकान्तारकंदलन्मंदमारुतं ॥
अभंगुरभुजंगस्त्रीसंगीतरससंकुलं ॥ १४ ॥

व्याख्यानं—नूतनश्रीचंदनभेदनक्षममंदमारुतः अतिनिबिडभुजंगस्त्रीसंगीतरसव्याप्तः ॥ १४ ॥

अर्थ–॥ १४ ॥ मलयपर्वतावर चंदनांचीं झाडें अतिशय असल्यामुळें त्यांवरून मंद मंद वाहणाऱ्या वायूंमुळें सर्वत्र सुवास सुटला होता. त्या पर्वतावर नेहमीं नागस्त्रिया मधुर मधुर गायन करीत त्यांचा मंजुल ध्वनि सर्वत्र ऐकूं येत होता.

श्लोकः–करिपोतकराकृष्टस्फुरदेलातिवासितं ॥
वराहदंष्ट्रिकाध्वस्तमुस्तासुरभिकंदरं ॥ १५ ॥

व्याख्यानं–करिकलभकराकर्षणविकीर्णैलाफलसुगंधवासितः वराहदंष्ट्रोत्खातभद्रमुस्तासुरभिसानुप्रदेशः ॥ १५ ॥

अर्थ–॥ १५ ॥ तेथें हत्तींच्या लहान लहान छाव्यांनीं आपल्या सोंडांनीं भराभर वेलदोड्याच्या वेली उपडाव्या, त्यामुळें त्यांचा सुगंध चोहोंकडे सुटलेला असे, व तेथील रानडुकरांनीं आपल्या दाढांनीं वाळ्याचीं मुळें उपडावीं, त्यांचाही सुवास मलयपर्वतावरील गुहांत चोहोंकडे पसरत असे.

श्लोकः–पटीरदलपर्यंकप्रसुप्तव्याधदम्पतिं ॥
माधवीमल्लिकाजातीमंजरीरेणुरंजितं ॥ १६ ॥

व्याख्यानं—कर्पूरकदलीपत्रपर्यंकनिद्रितकिरातदंपतिः सेवंत्यादिकुसुमगुच्छपरागरंजितः एतादृशं मलयाद्रिमगमदिति पूर्वेणान्वयः ॥ १६ ॥

अर्थ–॥ १६ ॥ मलयपर्वतावरील फांसेपारधी लोक चंदनाच्या पानांचे पलंग करून त्यावर आपल्या बायकांसह सुखानें निजत असत, तसेच त्या पर्वतावर जाई, जुई, बटमोगरा ह्यांच्या फुलांचा मंजुळ्यांचा व परागांचा चोहोंकडे सुगंध सुटलेला असे.

अवतरणिका–"अथाष्टभिस्सूत्रैरगस्त्याश्रमं वर्णयति—

श्लोकः–तत्र कुत्रचिदाभोगसर्वर्तुकुसुमद्रुमे ॥
अपश्यदाश्रमं दिव्यमगस्त्यस्य महामुनेः ॥ १७ ॥

व्याख्यानं—संपूर्णवसंतादिसर्वर्तुकुसुममयवृक्षवति तत्र मलयाचले कुत्रचित् कस्मिंश्चित्प्रदेशे दिव्यं मनोहरम् अगस्त्याश्रममपश्यत् दृष्टवानित्यर्थः ॥ १७ ॥

अर्थ-॥ १७ ॥ त्या पर्वतावर सहा ऋतूंत सर्वझाडांस फुलें येत असत, अमुक ऋतूंमध्यें अमुक झाडांस फुलें यावीं, असा नियम तेथें मुळींच नव्हता, त्या मलयपर्वतावर अगस्त्यऋषीचा सुशोभित आश्रम रेणुकानें पाहिला.

श्लोकः-मंदारचंदनप्रायैर्मंडितं तरुमण्डलैः ॥

शाखाशिखरसंलीनतारकागणकोरकैः ॥ १८ ॥

व्याख्यानं—शाखाग्रसंविलीनतारकागणरूपकुसुमकुड्मलैः कल्पवृक्षश्रीचंदनादितरुसमूहैर्मंडितं शोभितमित्यर्थः ॥ १८ ॥

अर्थ-॥ १८ ॥ त्या आश्रमांत पारिजाताचीं व चंदनाचीं झाडें इतकीं दाट लागून गेलीं होतीं कीं, त्या झाडींतून आकाशांतील चांदण्या त्या झाडांच्या शेंड्यांवर आलेल्या पांढऱ्या पांढऱ्या फुलांप्रमाणें शोभत असत.

श्लोकः-मुनिकन्याकरानीतकलशांबुविवर्द्धितैः ॥

आलवालजलास्वादमोदमानमृगीगणैः ॥ १९ ॥

अर्थ-॥ १९ ॥ ऋषींच्या कन्या आपल्या हातांत घागरी घेऊन पाणी घालून आश्रमांतील झाडें वाढवितात, त्या झाडांच्या आळ्यांतील पाणी पिऊन हरिणींचा समुदाय सुखानें रवंथ करीत बसत होता.

श्लोकः-हेमारविंदनिष्यंदमकरंदसुगंधिभिः ॥

मरालालापवाचालवीचीमालामनोहरैः ॥ २० ॥

व्याख्यानं—मरालालापेन वाचालुरित्यर्थः ॥ २० ॥

अर्थ-॥ २० ॥ तेथील (आश्रमाजवळील) सरोवरांतील सुवर्णकमलांतून गळणाऱ्या मधुर मधुर मकरंदाचा जलास सुवास येतो, व कमलावर बसून राजहंसपक्षी मधुर शब्द करितात, त्यामुळें पाण्यांतील लाटांची मोठी मौज दिसे.

श्लोकः-इंदीवरवरज्योतिरन्धीकृतहरिन्मुखैः ॥

लोपामुद्रापदन्यासचरितार्थतटांकितैः ॥ २१ ॥

अर्थ-॥ २१ ॥ तेथील सरोवरांत नीलकमळें इतकीं आहेत कीं, त्यांच्या तेजानें दहा दिशा देखील निळ्या झालेल्या दिसतात, व तीं नीलकमळें अशीं शोभतात कीं, अगस्त्यऋषीची स्त्री लोपामुद्रा ही सरोवरावर जातांना वाटेंत तिचीं पावलें उमटलीं आहेत किंवा काय ? असा भास होत होता.

श्लोकः—हारनीहारकर्पूरहरहासामलोदकैः ॥
नित्यनैमित्तिकस्नाननियमार्थैस्तपस्विनां ॥ २२ ॥

अर्थ—॥ २२ ॥ सरोवरांतील पाणी फार स्वच्छ असून तें मोत्यांच्या माळा, बर्फ, कापूर, शंकराचें हांसणें ह्याप्रमाणें पांढरें शुभ्र दिसे, व त्यांत अनेक तपस्वी लोक नियमानें नित्य स्नान करीत असत.

श्लोकः—प्रकृष्टमणिसोपानैः परिवीतं सरोवरैः ॥
विमुक्तसत्ववैरस्यं ब्रह्मलोकमिवापरं ॥ २३ ॥

अर्थ—॥ २३ ॥ सरोवराच्या पायऱ्या उत्तम उत्तम रत्नांच्या केलेल्या होत्या, त्या आश्रमांत वैरभाव तर कोणत्याही प्राण्यांस माहीत नव्हता. (सर्व प्राणिमात्र स्नेहभावानें वागत असत.) ह्यामुळें तो दुसरा सत्यलोकच आहे असें भासे.

श्लोकः—हूयमानाज्यसन्तानधूमगन्धि महास्थलं ॥
शुकसंसत्समारब्धश्रुतिशास्त्रोपबृंहणं ॥ २४ ॥

व्याख्यानं—शुकसंसदेत्यर्थः स्पष्टमन्यत् एतादृशमगस्त्याश्रममपश्यदित्यर्थः॥२४

अर्थ—॥ २४ ॥ जागोजाग होमहवन होत असल्यामुळें त्यांत जळणाऱ्या तुपाचा वास येणारा धूर चोहोंकडे पसरला होता, तेथील बाळगलेले राघु देखील वेद आणि शास्त्र ह्यांतील वाक्यें भराभर बोलत असत.

अवतरणिका—"अथागस्त्यमुनिं नवभिस्सूत्रैर्वर्णयति"—

श्लोकः—तस्य मध्ये समासीनं मूले चंदनभूरुहः ॥
सुकुमारदलच्छायादूरितादित्यतेजसः ॥ २५ ॥

अर्थ—॥ २५ ॥ त्या आश्रमांत चंदनाच्या झाडाखालीं अगस्त्य ऋषि बसले होते, त्या चंदनाचीं कोंवळीं कोवळीं पानें इतकीं दाट होतीं कीं, त्यांतून अगस्त्याचे आंगावर ऊन्ह तर मुळींच पडत नव्हतें.

श्लोकः—तडित्पिंगजटाभारैस्त्रिपुण्ड्रांकितमस्तकैः ॥
भस्मोद्धूलितसर्वांगैः स्फुरद्रुद्राक्षभूषणैः ॥ २६ ॥

अर्थ— ॥ २६ ॥ विजेसारख्या पिंगट रंगाच्या जटा डोकीवर असणारे, कपाळाला भस्माच्या त्रिपुण्ड्राचे टिळे लाविलेले, सर्व आंगावर भस्माचे पट्टे ओढलेले गळ्यांत उत्तम उत्तम अशा रुद्राक्षांच्या माळा घातलेले.

श्लोकः—नववल्कलवासोभिर्नानानियमधारिभिः ॥
परिवीतं मुनिगणैः प्रमथैरिव शंकरं ॥ २७ ॥

अर्थ-॥ २७ ॥ नवीन वल्कलें (झाडांच्या सालीचीं वस्त्रें) नेसलेले, अनेक-प्रकारचे नियम करणारे, मोठमोठे ऋषीश्वर, प्रमथगण ज्याप्रमाणें शंकराची उपासना करितात त्याप्रमाणें अगस्त्यऋषीची उपासना (सेवा) करीत सभोंवती बसले होते.

श्लोकः—समुज्वलजटाजालैस्तपःपादपपल्लवैः ॥
स्फुरत्सौदामिनीकल्पैर्ज्वालाजालैरिवानलं ॥ २८ ॥

व्याख्यानं—शिवप्रसादभूततपोवृक्षपल्लवैः स्फुरद्विद्युल्लतासदृशैः जटाजालैः अग्निमिव समुज्वलंतमित्यर्थः ॥ २८ ॥

अर्थ-॥ २८ ॥ विजेसारख्या लखलखीत ज्वालांमुळें जसा अग्नि शोभावा त्याप्रमाणें तपश्चर्यारूप वृक्षाचे पानाप्रमाणें शोभणाऱ्या (तपश्चर्येमुळें वाढलेल्या) तेजःपुंज जटांच्या समुदायामुळें अगस्त्यऋषि शोभत होते.

श्लोकः-विशुद्धभस्मकृतया त्रिपुण्ड्रांकितरेखया ॥
त्रिस्रोतसेव संबद्धशिलाभागं हिमाचलं ॥ २९ ॥

व्याख्यानं—त्रिभागेन प्रवहद्गंगासंबद्धशिलाभागं हिमाद्रिमिव शितत्रिपुंड्रेखांकितमस्तकमित्यर्थः ॥ २९ ॥

अर्थ-॥ २९ ॥ गंगानदीमुळें पांढऱ्या शुभ्र दिसणाऱ्या मोठमोठ्या शिलांमुळें जसा हिमालय पर्वत शोभावा, त्याप्रमाणें पांढऱ्या शुभ्र भस्मानें काढलेल्या कपाळावरील त्रिपुंड्राच्या रेषांमुळें अगस्त्यऋषि शोभत होते.

श्लोकः—भस्मालंकृतसर्वांगं शशांकमिव भूगतम् ॥
वसानं वल्कलं नव्यं बालातपसमप्रभम् ॥ ३० ॥

अर्थ-॥ ३० ॥ अगस्त्यऋषींनीं आपल्या सर्व आंगास भस्म लाविलेलें होतें, त्यामुळें ते पृथ्वीवर उतरलेल्या चंद्राप्रमाणें शोभत होते, ते नवें वल्कल नेसले होते तें वल्कल सकाळच्या उन्हासारखें शोभिवंत दिसत होतें.

श्लोकः—वडवाग्निशिखाजालसमालीढमिवार्णवम् ॥
सर्वासामपि विद्यानां समुदायनिकेतनम् ॥ ३१ ॥

व्याख्यानं—समालीढं व्याप्तमित्यर्थः ॥ ३१ ॥

अर्थ-॥ ३१ ॥ वडवाग्नीच्या ज्वालांनीं युक्त असणाऱ्या समुद्राप्रमाणें अगस्त्य ऋषि दिसत असत, आणि सर्व प्रकारच्या विद्यांच्या समुदायांचे अगस्त्यऋषि हे राहण्याचें एक मुख्य ठिकाण होते. (त्यांस सर्व विद्या येत होत्या.)

श्लोकः–न्यक्कृतप्राकृताहंतं निरूढशिवभावनम् ॥
तृणीकृतजगज्जालं सिद्धीनामुदयस्थलम् ॥ ३२ ॥

व्याख्यानं—तिरस्कृतप्राकृतशरीराद्यहंकारवंतमित्यर्थः सिद्धीनामणिमादिसिद्धीनामित्यर्थः ॥ ३२ ॥

अर्थ–॥ ३२ ॥ अगस्त्यऋषीस सामान्यमनुष्यांप्रमाणें गर्व मुळींच नव्हता, त्यांची शंकरावर अतिशय श्रद्धा होती सर्वजगाच्या पसाऱ्यास ते कसपटाप्रमाणें तुच्छ मानीत असत. अष्टमहासिद्धींचे अगस्त्यऋषि हे भरभराटीचे स्थान होते. (अगस्त्यऋषीस अष्टमहासिद्धि अनुकूल होत्या.)

श्लोकः–मोहांधकारतपनं मूलबोधमहीरुहम् ॥
ददर्श स महायोगी मुनिं कलशसंभवम् ॥ ३३ ॥

व्याख्यानं—मूलबोधस्य स्वरूपज्ञानस्य कुल्पद्रुममित्यर्थः एवमादिविशेषणविशिष्टं कलशसंभवमगस्त्यं स रेणुकाचार्यो ददर्श दृष्टवानित्यर्थः ॥ ३३ ॥

अर्थ–॥ ३३ ॥ अगस्त्यऋषि मोहरूप अंधकारास सूर्यासारखे होते, (ज्ञानी होते,) मूलज्ञानाचे वृक्ष होते, अशा त्या कलशापासून जन्मलेल्या अगस्त्यऋषीस त्या श्रेष्ठ योगीश्वरानें (रेणुकानें) पाहिलें.

अवतरणिका–'अथ समागतं तं रेणुकाचार्यमगस्त्यः पूजयामासेति चतुर्भिः सूत्रैः प्रतिपादयति'—

श्लोकः–तमागतं महासिद्धं समीक्ष्य कलशोद्भवः ॥
गणेंद्रं रेणुकाभिख्यं विवेद ज्ञानचक्षुषा ॥ ३४ ॥

अर्थ–॥ ३४ ॥ तो महायोगी रेणुकेश्वर प्रमथपति आपल्याकडे येतो आहे असें ज्ञानदृष्टीनें अगस्त्यांनीं जाणलें.

श्लोकः–तस्यानुभावं विज्ञाय सहसैव समुत्थितः ॥
लोपामुद्राकरानीतैरुदकैरतिपावनैः ॥ ३५ ॥

व्याख्यानं—स अगस्त्यः तस्या रेणुकस्य अनुभावं सामर्थ्यं समन्वीक्ष्य तस्मिन्नेव क्षणे समुत्थाय प्रणम्यासने उपवेशयदित्यर्थः ॥ ३५ ॥

अर्थ–॥ ३५ ॥ अगस्त्यांनीं त्याचें सामर्थ्य जाणून रेणुक येतांच ते एकदम उठून उभे राहिले, व मुद्दाम लोपामुद्रेच्या हातानें निर्मळ पाणी आणवून

श्लोकः–पादौ प्रक्षालयामास स तस्य शिवयोगिनः ॥
संपूज्य तं यथाशास्त्रं तन्नियोगपुरःसरम् ॥ ३६ ॥

अर्थ-॥ ३६ ॥ त्या शिवयोग्याचे त्यांनीं पाय धुतले, नंतर त्याची यथाविधि पूजा करून त्याची आज्ञा घेऊन

श्लोकः-मुनिर्विनयसंपन्नो निषसादासनांतरे ॥
समासीनं मुनिवरं सर्वतेजस्विनां विभुम् ॥ ३७ ॥

व्याख्यानं—अथेति शेषः तं रेणुकं शास्त्रोक्तप्रकारेण भक्तियुक्तः सन् अगस्त्यमुनिः संपूज्य तदाज्ञापुरःसरम् यथा तथा पीठांतरे उपविष्ट इत्यर्थः ॥ ३६ ॥ ३७ ॥

अर्थ-॥ ३७ ॥ तो विनयशील अगस्त्यऋषि आपण दुसऱ्या आसनावर बसला. पृथ्वीवर सामर्थ्यवान् ह्मणून जितके लोक आहेत, त्या सर्वांत रेणुक मुख्य होता, तो रेणुक मुनीश्वर आसनावर बसल्या नंतर

अवतरणिका-अथाष्टभिः सूत्रैः श्रीरेणुकोऽगस्त्यं कुशलप्रश्नपूर्वकं प्रस्तौति—

श्लोकः-उवाच शांतया वाचा रेवणः सिद्धशेखरः ॥
निर्विघ्नं वर्तसे किं नु नित्या ते नियमक्रिया ॥
अथवाऽगस्त्य तेजस्विन् कुतः स्युस्तेंऽतरायकाः ॥ ३८ ॥

व्याख्यानं—तेजस्विन् भो अगस्त्य अथ मांगल्येन निर्विघ्नं भवान् वर्तसे किन्नु ते नियमक्रिया नित्या वा विच्छेदरहिता वेत्यर्थः ते अंतरायकाः विघ्नकारिणः कुतः स्युः न स्युरित्यर्थः ॥ ३८ ॥

अर्थ-॥ ३८ ॥ सर्व सिद्ध लोकांत मुख्य तो रेवणसिद्ध अगस्त्यास शांतपणानें ह्मणाला, अगस्त्यऋषे, खुशाल आहेसना ? तुझी नियमक्रिया निर्विघ्नपणानें चालत आहे ना? अगस्त्यऋषे, तूं स्वतः सामर्थ्यवान् आहेस, तुला विघ्नें कोठून येतील ?

श्लोकः-विंध्यो निरुद्धो भवता विश्वोल्लंघनविभ्रमः ॥
नहुषो रोषलेशात्ते सद्यः सर्पत्वमागतः ॥ ३९ ॥

व्याख्यानं—विश्वोल्लंघनविभ्रमः महामेरुप्रभृतिमहापर्वतोल्लंघनविलासवान् विंध्यः विंध्याद्रिः निरुद्धः भूमौ निपातित इत्यर्थः भो अगस्त्य ते क्रोधलेशात् सद्य एव नहुषः सर्पतां गतः ॥ ३९ ॥

अर्थ- ॥ ३९ ॥ विश्वाचा नाश करण्यास प्रवृत्त झालेला विंध्याद्रि पर्वत तूं जमिनीवर पुन्हा पूर्ववत् निजविलास, तुझ्या थोड्याशा रागानें उन्मत्त झालेला नहुष राजा सर्पयोनीस गेला.

श्लोकः-आचांते भवता पूर्वं पंकशेषाः पयोधयः ॥
जीर्णस्ते जाठरे वन्हौ दृप्तो वातापिदानवः ॥ ४० ॥

व्याख्यानं—पूर्वं भवता आचांते आचमने कृते सति पयोधयः समुद्राः पंकशेषेण अवशिष्टाः कृताः ते जठराग्नौ दग्धः उद्धृतः वातापिदानवः वातापिनामासुरः जीर्णो जात इत्यर्थः ॥ ४० ॥

अर्थ–॥ ४० ॥ तूं पूर्वी सर्व समुद्र एका आचमनानें पिऊन टाकल्यांमुळें सर्व समुद्रांत फक्त चिखल काय तो शिल्लक राहिला, तुझ्या पोटांमध्यें पूर्वी वातापिदैत्य खाण्याच्या अन्नाप्रमाणेंच पचून गेला.

श्लोकः–एवंविधानां चित्राणां सर्वलोकातिशायिनाम् ॥
कृत्यानां तु भवान् कर्ता कस्तेऽगस्त्य समप्रभः ॥ ४१ ॥

व्याख्यानं—सर्वजनातिशायिनां एवंविधचित्रकर्मणां त्वं कर्ता कर्माणि कुर्वाण इत्यर्थः तस्मात् भो अगस्त्य ते समानप्रभावः कः? न कोपीत्यर्थः ॥ ४१ ॥

अर्थ–॥ ४१ ॥ अशाप्रकारचीं तुझीं अलौकिक व चमत्कारिक कृत्यें आहेत, तुझी बरोबरी करणारा ह्या जगांत दुसरा कोणी नाहीं.

श्लोकः–शिवाद्वैतपरानंदप्रकाशनपरायणम् ॥
भवंतमेकं शंसंति प्रकृत्या संगवर्जितम् ॥ ४२ ॥

व्याख्यानं—अत्र लोकाः भवंतमेकमेव शिवाद्वैतविज्ञानाविर्भूतपरमानंदप्रकाशनतत्परं प्रकृतिसंबंधरहितं कथयंतीत्यर्थः तत्कथमित्यत्राह ॥ ४२ ॥

अर्थ–॥ ४२ ॥ शिवाच्या अद्वैतशास्त्रापासून अतिशय आनंद होतो, हें लोकांच्या नजरेस आणून देण्यास तूं नेहमीं तयार आहेस, तुझी सर्वलोक प्रशंसा करितात, तूं स्वाभाविकरीतीनें निःसंग (सर्व संगपरित्याग केलेला) आहेस.

श्लोकः–पुरा हैमवतीसूनुरवदत्ते षडाननः ॥
शिवधर्मोत्तरं नाम शास्त्रमीश्वरभाषितम् ॥ ४३ ॥

व्याख्यानं—हैमवतीसूनुः पार्वतीनंदन इत्यर्थः ॥ ४३ ॥

अर्थ–॥ ४३ ॥ पूर्वी कार्तिकस्वामीनें (पार्वतीच्या मुलानें) त्यास शिवांनीं जें शिवधर्मशास्त्र शिकविलें होतें तें त्यांनें तुला सांगितलें आहे.

श्लोकः–भक्तिः शैवी महाघोरसंसारभयहारिणी ॥
त्वया राजन्वती लोके जाताऽगस्त्य महामुने ॥ ४४ ॥

व्याख्यानं—स्कंदोपदेशमहिम्ना अतिक्रूरसंसारभयनाशिनी शिवभक्तिस्त्वया भूलोके राजन्वती सम्यक्प्रकाशमाना जातेत्यर्थः ॥ ४४ ॥

अर्थ–॥ ४४ ॥ शंकराची भक्ति अतिशय भयंकर अशा संसाराचें भय दूर

करणारी आहे, ती शिवभक्ति आणि तें शिवधर्मोत्तर शास्त्र तुझ्यामुळें लोकांत प्रसिद्धीस आलें.

अथागस्त्यमुनिवचनम् ॥

अवतरणिका–अथ अगस्त्यः स्वस्य रेणुकाचार्यदर्शनोत्थसौभाग्यं दशभिः सूत्रैर्वर्णयति—

श्लोकः–इति तस्य वचः श्रुत्वा सिद्धस्य मुनिपुंगवः ॥
गंभीरगुणया वाचा बभाषे भक्तिपूर्वकम् ॥ ४५ ॥

अर्थ–॥ ४५ ॥ अशाप्रकारचें रेणुकसिद्धाचें बोलणें ऐकून तो अगस्त्यऋषि भक्तिपूर्वक प्रौढभाषेनें त्यास ह्मणूं लागला.

श्लोकः–अहमेव मुनींद्राणां लालनीयोऽस्मि सर्वदा ॥
भवदागमसंपत्तिर्मो विना कस्य संभवेत्? ॥ ४६ ॥

व्याख्यानं—अहमेव सदा मुनींद्रैः लालनीयः श्लाघनीयः तत्र हेतुः भवदागमः त्वदागमनसंपत्तिर्मो विना न कस्यापीत्यहमेव सर्वैः श्लाघनीयोऽस्मीति भावः ॥४६॥

अर्थ–॥ ४६ ॥ सर्वमुनीश्वरांमध्यें मीच काय तो एक धन्य आहें, कांतर तूं घरीं यावेंस इतकी योग्यता माझ्याखेरीज दुसऱ्या कोणाचीच नाहीं.

श्लोकः–स्थिरमद्य शिवज्ञानं स्थिरा मे तापसक्रिया ॥
भवद्दर्शनपुण्येन स्थिरा मे मुनिराजता ॥ ४७ ॥

अर्थ–॥ ४७ ॥ माझें शिवज्ञान स्थिरपणा पावलें, माझ्या तपश्चर्येच्या सर्व क्रिया स्थिर आहेत. तुझें मला दर्शन झालें ह्मणून मला मुनिराज (मुनिश्रेष्ठ) असें नांव पडलें तें योग्य आहे असें मी मानतों.

श्लोकः–संसारसर्पदष्टानां मूर्च्छितानां शरीरिणाम् ॥
कटाक्षस्तव कल्याणं समुज्जीवनभेषजम् ॥ ४८ ॥

व्याख्यानं—तापत्रयात्मसर्पदष्टानामतएव मूर्च्छितानां प्राणिनां ते कटाक्षः कल्याणं मंगलात्मकम् समुज्जीवनभेषजं संजीवनौषधमित्यर्थः ॥ ४८ ॥

अर्थ–॥ ४८ ॥ संसाररूप साप चावून मूर्च्छित झालेल्या प्राणिमात्रांस तुझी कृपादृष्टि सुखकारक असें संजीविनी नांवाचें औषध आहे.

श्लोकः–समस्तलोकसंदाहतापत्रयमहानलः ॥
त्वत्पदांबुकणास्वादादुपशाम्यति देहिनाम् ॥ ४९ ॥

अर्थ-॥ ४९ ॥ सर्व लोकांच्या आंगाचा दाह करणारा आध्यात्मिक आधिभौतिक व आधिदैविक असा तीनप्रकारचा तापरूप अग्नि तुझें चरणकमलरूप जल प्राशन केल्याबरोबर शांत होतो.

अवतरणिका-तर्हि कोऽहमित्याकांक्षायामाह—

श्लोकः-रेणुकं त्वां विजानामि गणनाथं शिवप्रियम् ॥
अवतीर्णमिमां भूमिं मदनुग्रहकांक्षया ॥ ५० ॥

अर्थ-॥ ५० ॥ रेणुकनाथा, मी तुला ओळखतों, तूं प्रमथांत मुख्य असून शिवाच्या अगदीं प्रीतींतील आहेस, माझ्यावर कृपा करण्यासाठीं तूं ह्या पृथ्वीवर अवतरला आहेस.

श्लोकः-भवादृशानां सिद्धानां प्रबोधध्वस्तजन्मनाम् ॥
प्रवृत्तिरीदृशी लोके परानुग्रहकारिणी ॥ ५१ ॥

व्याख्यानं—प्रवृत्तिः संचार इत्यर्थः ईदृशी एवं परानुग्रहरूपिणीत्यर्थः ॥ ५१ ॥

अर्थ-॥ ५१ ॥ शिवज्ञानामुळें तुमचें जन्ममरण चुकलें आहे, अशा तुमच्यासारख्या योगीश्वरांचा लोकांवर उपकार करण्याचा धर्मच आहे. (लोकांवर उपकार करण्याची स्वाभाविकपणानें तुमची बुद्धि असते.)

श्लोकः-त्वन्मुखाच्छ्रोतुमिच्छामि सिद्धांतं श्रुतिसंमतम् ॥
सर्वज्ञ वद मे साक्षाच्छैवं सर्वार्थसाधकम् ॥ ५२ ॥

अर्थ-॥५२॥ वेदास संमत असणारें शिवशास्त्र मीं तुझ्या तोंडानें ऐकूं इच्छितों, तूं प्रत्यक्ष सर्वज्ञ आहेस. सर्वमनोरथ पूर्ण करणारें तें शैवशास्त्र तूं मला सांग.

श्लोकः-सद्यः सिद्धिकरं पुंसां सर्वयोगींद्रसेवितम् ॥
दुराचारैरनाघ्रातं स्वीकृतं वेदवेदिभिः ॥
शिवात्मैक्यमहाबोधसंप्रदायप्रवर्तकम् ॥ ५३ ॥

व्याख्यानं—दुराचारैः जैनबौद्धादिभिरनाघ्रातं अस्वीकृतमित्यर्थः साक्षाच्छिवात्म्यैक्येति सकललोकप्रत्यक्षभूतशिवजीवैक्यज्ञानसंप्रदायप्राप्तमित्यर्थः एवमादि विशेषणविशिष्टं शैवसिद्धांतं त्वन्मुखाच्छ्रोतुमिच्छामि भो सर्वज्ञ मे मह्यं वद कृपयेत्यर्थः ॥ ५३ ॥

अर्थ-॥ ५३ ॥ शैवधर्मशास्त्र प्राणिमात्रांचे सर्व मनोरथ पूर्ण करितें, सर्व योगीश्वर तें मनापासून ऐकतात, दुराचारी लोकांस मात्र तें आवडत नाहीं, तरी वेद जाणणारे लोक तें शैवधर्मशास्त्र आवडीनें ऐकतात. व तें शैवशास्त्र शिवाचें

आत्म्याशीं ऐक्य झाल्यामुळें उत्पन्न होणाऱ्या ज्ञानातिशयाचा संप्रदाय वाढविणारें आहे.

वृत्तं—उक्त्वा भवान् सकललोकमहोपकारं ॥
सिद्धांतसंग्रहमनादृतबाह्यतंत्रम् ॥
सद्यः कृतार्थयितुमर्हति दिव्ययोगिन् ॥
नानागमश्रवणवर्तितसंशयं माम् ॥ ५४ ॥

इति श्रीसिद्धांतशिखामणौ रेणुकागस्त्यदर्शनप्रसंगो नाम चतुर्थपरिच्छेदः समाप्तः ॥

व्याख्यानं—दिव्ययोगिन् मनोहरशिवयोगयुक्त रेवणसिद्धेश्वर अनादृतबाह्यतंत्रं खंडितजैनबौद्धादितंत्रं सकललोकमहोपकारकं सकलप्राण्यनुग्राहकं सिद्धांतसंग्रहं वेदसंमतसिद्धांतसारमुक्त्वा उपदिश्य नानागमश्रवणवर्तितसंशयं कामिकादिवातुलांतानेकागमश्रवणप्राप्तसंशयं मां भवान् सद्यः कृतार्थयितुमर्हति योग्योऽसीत्यर्थः ॥ ५४ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां चतुर्थः परिच्छेदः ॥

अर्थ—॥ ५४ ॥ रेणुकेश्वरा, तूं मोठा योगीश्वर आहेस, शिवधर्मशास्त्रापासून सर्वलोकांचा मोठा उपयोग आहे, यांत सिद्धांतांचा संग्रह आहे, व इतर मतांचा त्यांत समावेश केला नाहीं, असें तें शैवधर्मशास्त्र मला सांगून मीं अनेक आगम वाचले असल्यामुळें माझ्या मनांत अनेक प्रकारच्या कल्पना (संशय) आहेत त्या सर्व घालवून मला सुखी कर.

ह्याप्रमाणें श्रीसिद्धान्तशिखामणींतील रेणुकाचार्य आणि अगस्त्य ह्यांची भेट झाल्याचें वर्णन असलेला हा चवथा परिच्छेद संपला.

पंचमपरिच्छेदप्रारंभः ।

अवतरणिका-एवमगस्त्यविज्ञापनावाक्यश्रवणानंतरं तच्छास्त्रप्रचारार्थमेव भूलोकमधिगतश्शिवगणाधीशः श्रीरेणुकाचार्यः क्षणमचंचलमनाः दयया प्रारंभणीयशिवशास्त्रपरिसमाप्तिप्रतिबंधकीभूतविघ्नदेवतासंघसमाधानशक्तशिवध्यानरूपमंगलं मनसि विधाय तस्योत्तरमाहेति शिवयोगी निरूपयति इत्यवतारिकयैव अस्यार्थस्य स्फुटत्वेऽपि योजनाद्वारेण ईषद्विशेषः सूच्यते—

श्लोकः-अथागस्त्यवचः श्रुत्वा रेणुको गणनायकः ॥
ध्यात्वा क्षणं महादेवं सांबमाह समाहितः ॥ १ ॥

व्याख्यानं—अगस्त्यवचः श्रुत्वाथ गणनायको रेणुकः क्षणमेकाग्रचित्तः सन् सांबमंबया जगज्जनन्या शक्तिप्रवणरूपो मुख्यस्वसमवेतचित्क्रियासामरस्यलक्षणचिदंबरशक्त्या सह वर्तमानं महादेवं क्रीडाविजिगीषाद्यनेकगुणरत्नाकरं परब्रह्म तेजोलिंगं ध्यात्वा आह तस्योत्तरवचनं निरूपयतीत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ मग अगस्त्याचें बोलणें ऐकून तो रेवणाचार्य गणेश्वर क्षणभर पार्वतीसह महादेवाचें ध्यान करून शांतपणानें अगस्त्यास ह्मणूं लागला.

श्लोकः-अगस्त्य मुनिशार्दूल समस्तागमपारग ॥
शिवज्ञानकरं वक्ष्ये सिद्धांतं शृणु सादरम् ॥ २ ॥

व्याख्यानं—समस्तागमपारग सकलनिगमागमपारंगतशिवशास्त्रप्रभुत्वान्मुनिशार्दूल मुनिश्रेष्ठ भो अगस्त्य शिवज्ञानकरं स्वतंत्रशिवाद्वैतज्ञानप्रकाशकं सिद्धांतं सिद्धांतशास्त्रं वक्ष्ये सादरः प्रीतियुक्तः सन् त्वं शृण्वित्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ अगस्त्यऋषे, तूं सर्व मुनीश्वरांत श्रेष्ठ आहेस, सर्व आगमांत पारंगत आहेस, शिवज्ञान उत्पन्न करणारा सिद्धान्त मी तुला सांगतों, नीट लक्ष्य देऊन ऐक.

अवतरणिका-अथ तस्य सिद्धांतस्याधिक्यं प्रतिपादयितुं सिद्धांता बहवः संतीत्याह—

श्लोकः-अगस्त्य खलु सिद्धांता विख्याता रुचिभेदतः ॥
भिन्नाचारसमायुक्ता भिन्नार्थप्रतिपादकाः ॥ ३ ॥

व्याख्यानं—भो अगस्त्य रुचिभेदतः कपिलपतंजल्यादिऋषिप्रीतिवैचित्र्यात्

भिन्नाचारस्य भिन्नप्रमेयस्य प्रतिपादकाः सिद्धांताः बहव इति शेषः विख्याताः खलु प्रसिद्धाः संतीत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ अगस्त्यऋषे, आपापल्या आवडीप्रमाणें वेगळे वेगळे आचार सांगितलेले व वेगळे वेगळे अर्थ प्रतिपादन केलेले अनेक सिद्धान्त प्रसिद्ध आहेत.

अवतरणिका–ते क इत्याकांक्षायामाह—

श्लोकः–सांख्यं योगः पांचरात्रं वेदाः पाशुपतं तथा ॥
एतानि मानभूतानि नोपहन्यानि युक्तिभिः ॥ ४ ॥

व्याख्यानं—सांख्यं कापिलं प्रकृतिपुरुषलक्षणपदार्थद्वयप्रतिपादकं, तत्रानीश्वरांगीकारः योगः योगशास्त्रं पतंजलिप्रणीतं, तत्रेश्वरांगीकारः कष्टकरयमनियमाद्यष्टांगप्रतिपादकं पांचरात्रं वासुदेवप्रणीतं, वैष्णवं विष्णुदीक्षांगभूततप्तमुद्राधारणादिप्रतिपादनद्वारा चिदचिदीश्वरलक्षणत्रिपदार्थप्रतिपादकम्, पाशुपतं शिवप्रणीतं पशुपाशपतिलक्षणत्रिपदार्थप्रतिपादकं, वेदाः यस्य निश्वसिता वेदा इति शिवस्याप्रयत्नसिद्धनिश्वासरूपाः अतएव अकृत्रिमाः ऋग्यजुःसामरूपाः तत्पूर्वकांडानुसारेण जैमिनिप्रोक्तं पूर्वमीमांसाख्यं, यागादिकर्मप्राधान्यप्रतिपादकं निरीश्वरं एतानि शास्त्राणि मानभूतानि प्रमाणभूतानि युक्तिभिर्नोपहन्यानि तर्कयुक्तिभिर्न खंडनीयानि "त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति" महिम्नस्तोत्रप्रसिद्धत्वादित्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ त्यांत सांख्य, योग, पांचरात्र, वेद आणि तसेंच पाशुपत हीं मतें प्रमाणभूत आहेत, ती युक्तिवादानें खंडित होणारीं नाहींत.

अवतरणिका–ननु कथमेषां प्रामाण्यमित्यत्राह—

श्लोकः–वेदः प्रधानं सर्वेषां सांख्यादीनां महामुने ॥
वेदानुसरणादेषां प्रामाण्यमिति निश्चितम् ॥ ५ ॥

व्याख्यानं—उक्तलक्षणानां सर्वेषां सांख्यादीनां मध्ये वेदः प्रधानं मुख्यप्रमाणं अपौरुषेयत्वात् येषां सांख्यादिसिद्धांतानां वेदानुसरणात् वेदमूलकत्वात् प्रामाण्यमिति शास्त्रज्ञैर्निश्चितमित्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ मुनीश्वरा, सांख्य वगैरे सर्व मतांस वेद मान्य आहे, हीं सर्व मतें वेदाच्या तंत्रानें चालतात, ह्मणून त्यांस प्रामाण्य आहे हें सिद्ध झालें.

अवतरणिका–ननु सांख्यादिशास्त्राणामपि वेदमूलत्वादेभ्यः शैवशास्त्रस्य को विशेष इत्यत्राह—

श्लोकः–पांचरात्रस्य सांख्यस्य योगस्य च तथा मुने ॥

वेदैकदेशवर्तित्वं शैवं वेदमयं मतम् ॥ ६ ॥

व्याख्यानं—अत्र चकारादविशिष्टद्वयं संगृहीतं एवं चोक्तलक्षणपांचरात्रादिपंचसिद्धांतानां वेदैकदेशनिष्ठत्वं शैवं शिवशास्त्रं वेदमयं वेदस्वरूपमिति मतं निगमागमज्ञैरंगीकृतमित्यर्थः ॥ ६ ॥

अर्थ—॥६॥ पांचरात्र, सांख्य आणि योग हीं मतें वेदाच्या कांहीं थोड्या भागास अनुसरून आहेत, सर्वथैव वेदास अनुसरून नाहींत, तशीं शैवतंत्राची स्थिति नसून तें सर्वतोपरी वेदमय (वेदापासून तयार झालेलें) वेदस्वरूप असें आहे.

अवतरणिका—एवं स्थिते सर्ववेदमयत्वात् शैवतंत्रं सांख्यादिभ्यः श्रेष्ठमित्याह—

श्लोकः—वेदैकदेशवर्तिभ्यः सांख्यादिभ्यो महामुने ॥
सर्ववेदानुसारित्वाच्छैवतंत्रं विशिष्यते ॥ ७ ॥

व्याख्यानं—अत्र तंत्रशब्देन शास्त्रमुच्यते स्पष्टमन्यत् ॥ ७ ॥

अर्थ—॥ ७ ॥ वेदाच्या कांहीं कांहीं भागास सांख्य वगैरे मतें अनुसरून असल्यामुळें सर्वतोपरी वेदमय असलेल्या शैवमताचें महत्व त्यांच्यापेक्षां जास्त आहे

अवतरणिका—ननु तर्हि शैवतंत्रं केनचित्कल्पितमिति प्रतीयमानत्वात्कथमस्य प्रामाण्यमित्यत्राह—

श्लोकः—शैवतंत्रमिति प्रोक्तं सिद्धांताख्यं शिवोदितम् ॥
सर्ववेदार्थरूपत्वात्प्रामाण्यं वेदवत्सदा ॥ ८ ॥

व्याख्यानं—शैवतंत्रं शिवोक्तं सर्वज्ञशिवप्रोक्तं तत्सिद्धांताख्यमिति प्रोक्तं सर्ववेदार्थरूपत्वात् सकलोपनिषदर्थस्वरूपत्वात् सदा कालभेदराहित्येन वेदवत्प्रमाणमित्यर्थः ८

अर्थ—॥ ८ ॥ शिवांनीं स्वतः सांगितलेलें सिद्धान्तनांवाचें शैवशास्त्र होय, तें सर्वतोपरी वेदाच्या अर्थास अनुसरून असल्यामुळें त्याला वेदाप्रमाणें प्रामाण्य आहे.

श्लोकः—आगमा बहुधा प्रोक्ताश्शिवेन परमात्मना ॥
शैवं पाशुपतं सोमं लाकुलं चेति भेदतः ॥ ९ ॥

व्याख्यानं—परमात्मना शिवेन शैवमिति पाशुपतमिति सोममिति लाकुलमिति च भेदात् आगमा बहवः प्रोक्ताः ॥ ९ ॥

अर्थ— ॥ ९ ॥ परमेश्वर शंकरानें पुष्कळप्रकारचे आगम सांगितले आहेत त्यांत शैव, पाशुपत, सोम, लाकुल असे चार भेद आहेत.

अवतरणिका–ननु शिवोक्ततंत्राणां बाहुल्यात् तानि सर्वाणि वेदवत्प्रमाणानि किमित्यत्राह—

श्लोकः–तेषु शैवं चतुर्भेदं तंत्रं सर्वविनिश्चितम् ॥

वामं च दक्षिणं चैव मिश्रं सिद्धांतसंज्ञकम् ॥ १० ॥

व्याख्यानं—तेषु शैवतंत्रं चतुर्भेदवदिति सर्वैरागमज्ञैर्निश्चितम् ते के भेदा इत्यत्राह "वामं च दक्षिणं चैव मिश्रं सिद्धांतसंज्ञकमिति" ॥ १० ॥

अर्थ– ॥ १० ॥ त्यांपैकीं शैवमतांत चार भेद आहेत, व ते सर्व तंत्रांत प्रसिद्ध आहेत, त्यांचीं नांवें वाम, दक्षिण, मिश्र आणि सिद्धान्त अशीं होत.

अवतरणिका–अथ तत्वस्वरूपं प्रकटयति शक्तीत्यादिना–

श्लोकः–शक्तिप्रधानं वामाख्यं दक्षिणं भैरवात्मकम् ॥

सप्तमातृपरं मिश्रं सिद्धांतं वेदसंमतम् ॥ ११ ॥

व्याख्यानं—वामाख्यतंत्रं शक्तिपरं, दक्षिणतंत्रं भैरवपरं, मिश्रतंत्रं ब्राह्म्यादि सप्तमातृकापरं, सिद्धांतं वेदसंमतं सिद्धाख्यं शैवतंत्रं वेदसंमतं अनेन सिद्धांताख्य-शैवतंत्रमेव वेदसंमतत्वाद्वेदवत्प्रमाणं शिष्टमवेदसंमतत्वात्तद्वत् न भवतीति सूचितम् ॥ ११ ॥

अर्थ– ॥ ११ ॥ वाम नांवाचें शैवतंत्र शक्तीची उपासना करणारें आहे, द-क्षिण नांवाचें शैवतंत्र भैरवाची उपासना करणारें आहे, मिश्र नांवाचें शैवतंत्र सात मातृकांची उपासना करणारें असून सिद्धान्त नांवाचें शैवतंत्र वेदास अनुसरून आहे.

अवतरणिका–ननु सिद्धांताख्यशैवतंत्रं कथं वेदसंमतमि-त्यत्राह—

श्लोकः–वेदधर्माभिधायित्वात्सिद्धांताख्यः शिवागमः ॥

वेदबाह्यविरोधित्वाद्वेदसंमत उच्यते ॥ १२ ॥

व्याख्यानं—वेदोक्तभस्मलिंगधारणादिधर्मप्रतिपादकत्वात् वेदबाह्यजैनचार्वाकादिमतनिरासकत्वात् सिद्धांताख्यः शिवागमः वेदसंमत इत्युच्यत इत्यर्थः ॥ १२॥

अर्थ–॥ १२ ॥ वेदांत जे जे धर्म सांगितले आहेत तेच धर्म सिद्धांतशैवा-गमांत सांगितले असल्यामुळें व सिद्धांतशिवागम वेदानें बहिष्कृत केलेल्या जैन चार्वाकांचे मताचा नाश करणारा असल्यामुळें वेदसंमत असा मानला जातो.

अवत०– एवं वेदसंमतत्वात्सिद्धांतः वेदवत्प्रमाणमित्याह—

श्लोकः–वेदसिद्धांतयोरैक्यमेकार्थप्रतिपादनात् ॥
प्रामाण्यं सदृशं ज्ञेयं पंडितैरेतयोः सदा ॥ १३ ॥

व्याख्यानं—"सर्ववेदेषु यत् दृष्टं तत्सर्वं तु शिवागम इति" वीरागमोक्तेः वेदसिद्धांतयोरेकार्थकत्वाद्वेदवत् सिद्धांतोऽपि प्रमाणमिति भावः ॥ १३ ॥

अर्थ–॥ १३ ॥ वेद आणि सिद्धान्त हे दोन्हीही एकाच अर्थाचें प्रतिपादन करितात, त्यामुळें विद्वान् लोकांनीं वेदाचें व सिद्धान्ताचें प्रामाण्य (महत्व) सारखें आहे असें समजावें.

अवतरणिका–अथैवंविधसिद्धांताख्यशिवागमे किं प्रतिपाद्यत इत्यत्राह—

श्लोकः–सिद्धांताख्ये महातंत्रे कामिकाद्ये शिवोदिते ॥
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम् ॥ १४ ॥

व्याख्यानं—शिवोक्ते सिद्धांताख्ये कामिकादिवातुलांते महातंत्रे उत्तरभागे परं सर्वोत्कृष्टं वीरशैवमतं निर्दिष्टमुपदिष्टं अनेन पूर्वभागे शैवमुपदिष्टमिति सूचितम् ॥

अर्थ–॥ १४ ॥ शंकरांनीं कामिकापासून वातुलापर्यंत जे आगम सांगितले आहेत त्यांस सिद्धान्त महातंत्र ह्मणतात, त्यांत उत्तरभागांत वीरशैवमताचें वर्णन असून पूर्व भागांत शैवमताचें वर्णन आहे.

अवतरणिका–अथ वेदशिरस्यपि वीरशैवशब्दं दर्शयति—

श्लोकः–विद्यायां शिवरूपायां विशेषाद्रमणं यतः ॥
तस्मादेते महाभागा वीरशैवा इति स्मृताः ॥ १५ ॥

व्याख्यानं—शिवरूपायां ब्रह्मस्वरूपायां विद्यायां "वेदांतवाक्यजा विद्येति" सूतगीतोक्तेः वेदांतवेद्यायां विद्यायां विशेषात् यतः कारणात् रमणं रतिरस्ति तस्मात् एते तत्र रतिमंतः महाभागाः परमश्रेष्ठाः वीरशैवा इति स्मृता इत्यर्थः १५

अर्थ–॥ १५॥ ज्या अर्थीं शिवस्वरूपी विद्येमध्यें हे दैवशाली वीरशैवलोक ज्यास्त ज्यास्त रममाण होतात (अभ्यास करितात) ह्मणून ह्यांस वीरशैव असें नांव पडलें आहे.

अवतरणिका–अथ वेदागममस्तकयोरपि वीरशैवशब्दनिर्वचनं दर्शयति—

श्लोकः–वीशब्देनोच्यते विद्या शिवजीवैक्यबोधिका ॥
तस्यां रमंते ये शैवा वीरशैवास्तु ते मताः ॥ १६ ॥

व्याख्यानं—शिवजीवैक्यबोधिका लिंगांगरूपशिवजीवैक्यप्रकाशिका विद्या वि-

शब्देन उच्यते पंडितैः कथ्यत इत्यर्थः वीगतिप्रजनव्यासिकांत्यसनखादनेष्विति धातोः तस्यां विद्यायां ये शैवाः शिवभक्ता रमंते ते तु वीरशैवा इति मताः संमता इत्यर्थः॥

अर्थ-॥ १६ ॥ विशब्दानें विद्या असा अर्थ घ्यावयाचा, ती विद्या शिव आणि जीव ह्यांच्या ऐक्याचें ज्ञान करून देणारी आहे, त्या विद्येमुळें जे शैवलोक सुख मानतात (त्या विद्येचा अभ्यास करितात) ते वीरशैव होत.

अवतरणिका-अथ वीरमाहेश्वरशब्दनिर्वचनं करोति—

श्लोकः-विद्यायां रमते यस्मान्मायां हेयां श्ववद्रहेत् ॥
अनेनैव निरुक्तेन वीरमाहेश्वरः स्मृतः ॥ १७ ॥

व्याख्यानं—यस्मात् लिंगांगसंबंधकारणार्थं शिवजीवैक्यप्रकाशिकायां विद्यायां रमंते मायां जगद्रूपां हेयां त्यजनीयां श्ववत् शुनकवत् रहेत् निवारयेत् अनेनैव निरुक्तेन एकद्वित्र्यादिपदगताद्यक्षरप्रवचनेनैव वीरमाहेश्वर इत्यन्वर्थनाम्ना स्मृत इत्यर्थः॥

अर्थ-॥ १७ ॥ हे वीरमाहेश्वर शिवस्वरूपी विद्येमध्यें रममाण होतात व टाकण्यास योग्य अशा मायेचा कुत्र्याचा त्याग केल्याप्रमाणें त्याग करितात, ह्मणूनच त्यांस वीरमाहेश्वर असें नांव पडलें आहे.

अवतरणिका-एवं वेदांतसिद्धवीरशब्दसिद्धांतप्रसिद्धशैवशब्दमहेश्वरशब्दांश्च विविच्यानंतरम् वेदागमशिरःसिद्धवीरशैववीरमाहेश्वरस्वरूपं षड्भिः सूत्रैर्विशदयति तत्र प्रथमं वीरशब्दः कथं वेदांतप्रसिद्ध इत्यत्राह—

श्लोकः-वेदांतजन्यं यज्ज्ञानं विद्येति परिकीर्त्यते ॥
विद्यायां रमते तस्यां वीर इत्यभिधीयते ॥ १८ ॥

व्याख्यानं—"वेदांतवाक्यजा विद्येति" सूतगीतोक्तेः वेदांतवाक्यप्रकाश्यं यज्ज्ञानं विद्या तस्यां यो रमते स वीर इत्यर्थः ॥ १८ ॥

अर्थ-॥ १८ ॥ जें ज्ञान वेदांतापासून उत्पन्न होतें त्यास विद्या असें ह्मणतात, त्या विद्येचा जे अभ्यास करितात ते वीर होत.

अवतरणिका-एवं वेदांतप्रसिद्धवीरशब्दपूर्वकत्वेन सिद्धांतप्रसिद्धशिवतत्वज्ञाननिष्ठान् शैवान् माहेश्वरतत्वकर्मनिष्ठान्माहेश्वरांश्च सार्धसूत्रेण स्फुटयति—

श्लोकः-शैवैर्माहेश्वरैश्चैव कार्यमंतर्बहिः क्रमात् ॥

शिवो महेश्वरश्चेति नात्यंतमिह भिद्यते ॥ १९ ॥

व्याख्यानं—शैवैः वीरशब्दपूर्वकशैवैः वीरशैवैरित्यर्थः माहेश्वरैः वीरमाहेश्वरैश्च अंतर्बहिः क्रमात् शिवलिंगार्चनमिति शेषः कार्यं कर्तुं योग्यं एवंस्थिते शिवः निष्कलः शिवः महेश्वरः सकलः सदाशिवश्चेति स्थितौ इह "शिवश्शूली महेश्वर" इत्यभिधानगुणपाठे यथाऽत्यंतं न भिद्यते तयोरात्यंतिकभेदो नास्ति ॥ १९ ॥

अर्थ–॥ १९ ॥ वीरशैव आणि वीरमाहेश्वर यांचीं आभ्यंतर कृत्यें आणि बाह्यकृत्यें (लिंगार्चन) हीं सारखींच आहेत. शिव आणि महेश्वर ह्यांच्यांत फारसा निराळेपणा नाहीं.

अवतरणिका–अथ शैवमाहेश्वरयोरंतर्बाह्यरूपलिंगार्चनं यदुक्तं तत्कीदृशमित्यत्राह—

श्लोकः–यथा तथा न भिद्यंते शैवा माहेश्वरा अपि ॥
शिवाश्रितेषु ते शैवा ज्ञानयज्ञरता नराः ॥ २० ॥

व्याख्यानं—तथा शैवाः शिवसंबंधिनो वीरशैवाः माहेश्वरा अपि महेश्वरसंबंधिनो वीरमाहेश्वराश्च न भिद्यंते भिन्ना न भवंति अत्र सदाशिवस्य सोपाधिकत्वेऽपि तदुपाधेर्वक्ष्यमाणरीत्या सत्वगुणप्रधानत्वेन नापरत्वात्तयोरात्यंतिकभेदो नास्तीति भावः ॥ शिवाश्रितेषु ये नराः पुरुषाः ज्ञानयज्ञरताः हृत्कमलस्थचिल्लिंगपूजायां प्रीतियुक्ताः ते शैवाः वीरशैवा इत्यर्थः ॥ २० ॥

अर्थ–॥ २० ॥ तसाच वीरशैव आणि वीरमाहेश्वर ह्यांच्यांत निराळेपणा नाहीं. शिवमताभिमानी जे वीरशैवलोक मानसिक लिंगपूजेची आवड करितात त्यांस वीरशैव असें ह्मणतात.

श्लोकः–माहेश्वराः समाख्याताः कर्मयज्ञरता भुवि ॥
तस्मादभ्यंतरे कुर्युः शैवा माहेश्वरा बहिः ॥ २१ ॥

व्याख्यानं—कर्मयज्ञरताः करकमलस्थक्रियालिंगपूजायां प्रीतियुक्ताः माहेश्वराः वीरमाहेश्वरा इति भुवि समाख्याताः प्रख्याता इत्यर्थः तस्मात् शैवाः वीरशैवाः अभ्यंतरे हृत्कमले कुर्युः ज्ञानकांडप्रतिपादितप्राणलिंगिशरणशिवैक्यस्थलोक्तधर्माचरणं कुर्युरित्यर्थः माहेश्वराः वीरमाहेश्वराः बहिः कर्मकांडस्थभक्तमाहेश्वरप्रसादिस्थलोक्तधर्माचरणं कुर्युरित्यनुषंगः "ज्ञानं प्रधानं न तु कर्महीनं कर्मप्रधानं न तु चिद्विहीनं ॥ तस्माद्द्वयोरेव भवेत्प्रसिद्धिर्न ह्येकपक्षो विहगः प्रयाति" ॥ १ ॥ "न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया ॥ अपश्यन्नंधको दग्धः पश्यन् पंगुश्च दह्यते' ॥ २ ॥ इत्यादिवचनात् शैवमाहेश्वरयोः ज्ञानं क्रिया च समानैवेत्यनुसंधेयं किंतु बाह्यांतरपूजाप्रीतिमात्रं विशिष्यत इति ॥ २१ ॥

अर्थ-॥ २१ ॥ माहेश्वर हस्तकमलांतील क्रिया लिंगपूजेची आवड करितात ह्मणून त्यांची वीरमाहेश्वर ह्मणून लोकांत प्रसिद्धि आहे. ह्यासाठीं वीरशैव लोकांनीं आपल्या हृदयकमलांत ज्ञानकांडांत सांगितलेलें प्राणलिंगि, शरण, शिवैक्य यांत मोडणाऱ्या (समावेश होणाऱ्या) लोकांप्रमाणें धर्माचरण करावें, व वीरमाहेश्वरांनीं बहिःकर्मकांडांतील भक्त, माहेश्वर प्रसादि ह्यांत समावेश होणाऱ्या लोकांप्रमाणें धर्माचरण करावें.

श्लोकः-वीरशैवास्तु षड्भेदाः स्थलधर्मविभेदतः ॥
भक्तादिव्यवहारेण प्रोच्यंते शास्त्रपारगैः ॥ २२ ॥

व्याख्यानं—अथ वीरमाहेश्वरा इति प्रसिद्धवीरशैवास्तु भक्तादिशिवैक्यान्तव्यवहारेण स्थलधर्मविभेदतः पिंडादिवृत्तिज्ञानशून्यान्तःस्थलाचारभेदतः षड्भेदाः षड्विधभेदवन्त इति शास्त्रपारगैः प्रोच्यन्त इत्यर्थः ॥ २२ ॥

अर्थ-॥ २२ ॥ वीरशैवांचे स्थल आणि धर्म ह्यांच्या निरनिराळेपणामुळें सहा भेद होतात, व त्यांस शास्त्रांत पारंगत असणाऱ्यांनीं भक्त माहेश्वर अशीं नावें दिलीं आहेत.

अवतरणिका-अथ तच्छास्त्रभेदं दर्शयति—

श्लोकः-शास्त्रं तु वीरशैवानां षड्विधं स्थलभेदतः ॥
धर्मभेदसमायोगादधिकारिविभेदतः ॥ २३ ॥

व्याख्यानं—वीरशैवानां शास्त्रं तु विशेषद्योतकः स्थलभेदतः स्थलभेदात् धर्मभेदसमायोगात् स्थलोक्तसदाचारभेदसंबंधात् अधिकारिविभेदतः स्थलनिष्ठभक्ताद्यधिकारिभेदतश्च षड्विधः षट्प्रकारवदित्यर्थः अस्य शास्त्रस्य वीरशैवधर्मनिष्ठः सन् मुमुक्षुर्भक्त अधिकारी शिवभक्तिलभ्यशिवैक्यरूपपरमुक्तिः प्रयोजनं एकोत्तरशतस्थलज्ञानं विषयः अस्य ज्ञानस्य शास्त्रेण प्रकाश्यप्रकाशकभाव एव संबंधः एवमनुबंधचतुष्टयवदेतच्छास्त्रं ॥ २३ ॥

अर्थ-॥ २३ ॥ वीरशैव लोकांचें शास्त्र स्थलभेदांमुळें, धर्मभेदांमुळें आणि अधिकारिभेदांमुळें सहा प्रकारचें झालें आहे.

अवतरणिका-अथ स्थलक्रमं निरूपयति—

श्लोकः-आदौ भक्तस्थलं प्रोक्तं ततो माहेश्वरस्थलम् ॥
प्रसादिस्थलमन्यत्तु प्राणलिंगिस्थलं ततः ॥ २४ ॥

व्याख्यानं—स्पष्टम् ॥ २४ ॥

अर्थ-॥ २४ ॥ प्रथमचे स्थलास भक्तस्थल ह्मणतात, त्यानंतरचे दुसरे

स्थलास माहेश्वरस्थल ह्मणतात, तिसरे स्थलास प्रसादिस्थल ह्मणतात, त्यानंतरचें प्राणलिंगिस्थल होय.

श्लोकः–भक्तस्थलं प्रवक्ष्यामि प्रथमं कलशोद्भव ॥
तदवांतरभेदांश्च समाहितमनाः शृणु ॥ २५ ॥

व्याख्यानं—अथैवमुद्दिष्टस्थलेषु क्रमप्राप्तभक्तस्थलं तदवांतरभेदांश्च वक्ष्यामि शृण्वित्यन्वयः ॥ २५ ॥

अर्थ–॥ २५ ॥ अगस्त्यऋषे, मी अगोदर तुला भक्तस्थल आणि त्याचे दुसरे पोटभेद काय आहेत तें सांगतों, नीट लक्ष्य देऊन ऐक.

अवतरणिका–अथ भक्तस्थलं लक्षयति—

श्लोकः–शैवी भक्तिः समुत्पन्ना यस्यासौ भक्त उच्यते ॥
तस्यानुष्ठेयधर्माणां मुक्तिर्भक्तस्थलं मतम् ॥ २६ ॥

व्याख्यानं—यस्य शिवसंबंधिनी भक्तिरुत्पन्ना सोऽसौ भक्त इत्युच्यते तस्य भक्तस्य अनुष्ठेयधर्माणां आचरणीयवीरशैवधर्माणां उक्तिः ॥ "सदाचारः शिवे भक्ति-लिंगे जंगम एकधीः ॥ लांछने शरणे भक्तिर्भक्तस्थलमनुत्तमं ॥१॥" इत्याद्युपदेशनं भक्तस्थलमिति मतम् संमतमित्यर्थः ॥ २६ ॥

अर्थ–॥ २६ ॥ ज्याला शिवाची भक्ति करावी अशी इच्छा उत्पन्न होऊन तो भक्ति करूं लागला त्यास भक्त ह्मणावें, व तो आपल्या कर्तव्यकर्माप्रमाणें स्वधर्मानें जें आचरण करितो त्यास भक्तस्थल ह्मणावें.

अथ पिंडादिभक्तस्थलावांतरस्थलानि पंचदशेत्युक्त्वा तान्युद्दिशति—

श्लोकः–अवांतरस्थलान्यत्र प्राहुः पंचदशोत्तमाः ॥
पिंडता पिंडविज्ञानं संसारगुणहेयता ॥ २७ ॥

अर्थ–॥ २७ ॥ भक्तस्थलाचे पंधरा पोटभेद (निराळे भेद) विद्वान् लोकांनी मानिले आहेत, ते येणेंप्रमाणें–१ पिंडस्थल २ पिंडविज्ञानस्थल ३ संसारहेयस्थल.

श्लोकः–दीक्षा लिंगधृतिश्चैव विभूतेरपि धारणम् ॥
रुद्राक्षधारणं पश्चात्पंचाक्षरजपस्तथा ॥ २८ ॥

अर्थ–॥ २८ ॥ ४ दीक्षास्थल ५ लिंगधारणस्थल ६ विभूतिधारणस्थल ७ रुद्राक्षधारणस्थल ८ पंचाक्षरीजपस्थल.

श्लोकः–भक्तमार्गक्रिया चैव गुरोर्लिंगस्य चार्चनम् ॥
जंगमस्य तथा ह्येषां प्रसादस्वीकृतिस्तथा ॥ २९ ॥

अर्थ–॥ २९ ॥ ९ भक्तमार्गस्थल १० गुर्वर्चनस्थल ११ लिंगार्चनस्थल १२ जंगमार्चनस्थल ,१३ गुरुप्रसादस्थलं १४ लिंगप्रसादस्थल १५ जंगमप्रसाद-स्थल हे होत.

श्लोकः–अत्र दानत्रयं प्रोक्तमुपाधिनिरुपाधिनी ॥
सहजं चेति निर्दिष्टं समस्तागमपारगैः ॥ ३० ॥

अर्थ–॥ ३० ॥ ह्या भक्तस्थलांत ज्ञानी लोकांनीं तीनप्रकारचें दान सांगितलेलें आहे. त्यांनीं नांवें १ उपाधिदान २ निरुपाधिदान ३ सहजदान हीं होत.

श्लोकः–एतानि शिवभक्तस्य कर्तव्यानि प्रयत्नतः ॥
बहुजन्मकृतैः पुण्यैः प्रक्षीणे पापपंजरे ॥ ३१ ॥

व्याख्यानं—अत्र भक्तस्थले उत्तमाः आर्याः अवांतरस्थलानि पंचदशेत्याहुः तानि कानीत्यत्र पिंडतेत्यादि, पिंडस्थलं, पिंडज्ञानस्थलम्, संसारहेयस्थलम्, दीक्षालक्षणगुरुकारुण्यस्थलम्, लिंगधारणस्थलं, विभूतिधारणस्थलम्, रुद्राक्षधारणस्थलं, पंचाक्षरीजपस्थलम्, भक्तमार्गस्थलं, गुरुलिंगार्चनरूपोभयस्थलम्, जंगमार्चनलक्षणत्रिविधसंपत्तिस्थलम्, एतत्रयप्रसादस्वीकारलक्षणचतुर्विधसारायस्थलम्, अत्र भक्तस्थले, प्रोक्तदानत्रयमेव, उपाधिमाटं, निरुपाधिमाटं, सहजमाटं चेति, स्थलत्रयं एतान्येवांतररूपपंचदशस्थलानि, शिवभक्तस्य विधेयानीत्यर्थः ॥ ३१ ॥

अर्थ–॥ ३१ ॥ हीं तिन्हीं दानें शिवभक्तानें अवश्य करावीं, अनेक जन्मांत केलेल्या पुण्यामुळें त्याचा पातकांचा समुदाय नाश पावला असल्यास त्यास हीं दानें करण्याची बुद्धि होते.

अवतरणिका–समस्तवेदागमशिरःसिद्धांगषट्स्थललिंगषट्स्थलांतर्गतत्वेन समाचरणीयपिंडतादिवृत्तिज्ञानशून्यांतैकोत्तरशतस्थलानां मुख्यं पिंडस्थलं निरूपयति—

श्लोकः–शुद्धांतःकरणो देही पिंडशब्देन गीयते ॥
शिवशक्तिसमुत्पन्ने प्रपंचेऽस्मिन्विकल्प्यते ॥ ३२ ॥

व्याख्यानं—अनेकजन्मकृतधर्मैर्मनोवाक्कायकर्मकृतपापसमूहे नष्टे सति निर्मलांतःकरणवानात्मा पिंडशब्देन कथ्यत इत्यर्थः “पुनर्जन्मांतरकर्मयोगात्स एव जीव इति” श्रुतेः उक्तप्रकारेण शुद्धांतःकरणस्स एव जीवः पिंडाभिधान इति

यावत् अत्र पिंडस्थलं साधनं, वक्ष्यमाणपिंडज्ञानादिशतस्थलानि साध्यानि, नेत्रे द्वे अपि यथा दर्शनमेकं पादौ द्वावपि यथा गमनमेकं तथा आत्मलाभान्न परं विद्यते नात्मनः परदेवतेति श्रुत्यागमप्रतिपाद्यपिंडस्थलं गुरूपदेशस्वानुभावाभ्यामेकं सद्भि- र्ज्ञेयमिति भावः ॥ ३२ ॥

अर्थ–॥ ३२ ॥ शंकरपार्वतीपासून उत्पन्न झालेल्या ह्या संसारांत निष्पाप- मनाच्या प्राण्यास पिंड ह्मणतात व तो सर्वांपेक्षां श्रेष्ठ होतो.

अवतरणिका–नन्वयं पिंडशब्दवाच्यः किं लोकसाधारणो वा तद्विशिष्टो वेत्यत्राह—

श्लोकः–पुण्याधिकः क्षीणपापः शुद्धात्मा पिंडनामकः ॥
एक एव शिवः साक्षाच्चिदानंदमयो विभुः ॥ ३३ ॥

व्याख्यानं—शिवशक्तिसमुत्पन्ने "लिंगांकितं पश्य जगद्भगांकमिति" व्यास- वचनात् शिवशक्तिभ्यामुत्पन्ने अस्मिन् प्रपंचे पुण्याधिक्यात् पापक्षयात् शुद्धात्मा निर्मलांतःकरणः पिंडाभिधानः पुरुषः विशिष्यते इतरजनापेक्षया श्रेष्ठो भवती- त्यर्थः ॥ ३३ ॥

अर्थ–॥ ३३ ॥ ज्याचें पुण्य ज्यास्त आहे, ज्याचें पाप नाहींसें झालें आहे, ज्याचें मन शुद्ध आहे तो पिंड समजावा, असा पिंड प्रत्यक्ष एक शंकरच आहे. तो चित्स्वरूप असून परमेश्वर आहे.

अवतरणिका–ननु तर्ह्ययं पिंडनामकः शिवो वा तदन्यो वा इत्यत्राह—

श्लोकः–निर्विकल्पो निराकारो निर्गुणो निष्प्रपंचकः ॥
अनाद्यविद्यासंबंधात्तदंशो जीवनामकः ॥ ३४ ॥

व्याख्यानं—चिदानंदमयः स्वतंत्रप्रकाशः अतएव साक्षात् अहमिति देश- कालाद्यचुंबितत्वेन सर्वलोकप्रत्यक्षः "उतैनं गोपा अदृशन्नित्यादिश्रुतेः" विभुः पूर्णः निर्विकल्पः भेदरहितः अतएव निष्प्रपंचकः मायिकप्रपंचशून्यः निराकारः नील- पीताद्याकाररहितः निर्गुणः मायिकसत्वरजस्तमोगुणरहितः शिवः अकुंठितेच्छाद्य- नेककल्याणपूर्णः परमात्मा एक एव "एकमेवाद्वितीयमिति" श्रुतेः शिवातिरेकेण पदार्थांतरम् नास्तीत्यर्थः तथापि अनाद्यविद्यासंबंधात् जीवब्रह्मविभागवद्वक्ष्यमाण- स्वविमर्शशक्त्यनादिपरिकल्पितमायासंबंधात् तदंशः ज्ञानक्रियासामरस्यात्मनः शि- वस्य अंशः चित्क्रियालक्षणः जीवनामकः जीव इत्यभिधानवानित्यर्थः "ममै- वांशो जीवलोके जीवभूतः सनातनः" इति भगवदुक्तेः अंशो नानाव्यपदेशादिति ब्रह्मसूत्रस्थितेश्च ॥ ३४ ॥

अर्थ—॥ ३४ ॥ त्यास विकल्प नाहीं, तो निराकार आहे, तो निर्गुण आहे, तो निष्प्रपंच आहे. अनादिकालाच्या अज्ञानाच्या संबंधामुळें त्या पिंडाचा अंश, जीव असें नांव पावला.

अवतरणिका—अथ कथं शिवस्तदंतरंगे तिष्ठतीत्यत्राह—

श्लोकः—देवतिर्यङ्मनुष्यादिजातिभेदे व्यवस्थितः ॥
मायी महेश्वरस्तेषां प्रेरको हृदि संस्थितः ॥ ३५ ॥

व्याख्यानं—स जीवः देवतिर्यङ्मनुष्यादिजातिभेदेऽप्यवस्थितः "देवाः षोडशलक्षाणि नवलक्षाणि मानुषाः॥ दशभिर्दशभिस्तद्वज्जलजा विहगा मृगाः ॥१॥ सरीसृपास्तु लक्षाणि एकादश चरेतराः॥ अष्टौ च दशलक्षाणि सप्तजन्मान्यमूनि वै ॥२॥" अत्र सरीसृपाः सर्पाः स्पष्टमन्यत् इति स्कांदवचनात् सुरनरोरगादिनानाजातिभेदे तिष्ठतीत्यर्थः महेश्वरः उक्तलक्षणः परशिवः "मायामायिनं तु महेश्वरमिति" श्रुतेः उक्तलक्षणमायाशक्तिसहितः सन् तेषामुक्तविधजीवानां प्रेरकः धर्माऽधर्मगोचरबुद्धिवृत्तिप्रेरकः सन् हृदि तदंतरंगे संस्थितः तिष्ठतीत्यर्थः ॥ ३५ ॥

अर्थ—॥ ३५ ॥ देव, पशु, पक्षी, मनुष्य वगैरे अनेकप्रकारच्या निरनिराळ्या जातींत तो मायामहेश्वर (मायेसहवर्तमान परमेश्वर) त्यांच्या मनांत राहतो. व त्यांस तशा तशा रीतीनें वागण्यास लावतो.

अवतरणिका—एवंरूपायां स्थितौ जीवेश्वरौ न ब्रह्मातिरिक्तौ किंतु ब्रह्मणि जीवत्वं ईश्वरत्वं च कल्पितमाह—

श्लोकः—चंद्रकांते यथा तोयं सूर्यकांते यथाऽनलः ॥
बीजे यथांकुरः सिद्धस्तथात्मनि शिवः स्थितः ॥ ३६ ॥

व्याख्यानं—जीवे शिवस्तादात्म्यसंबंधेन तिष्ठतीत्यर्थः ॥ ३६ ॥

अर्थ—॥ ३६ ॥ चंद्रकांत मण्यामध्यें जसें पाणी असतें, सूर्यकांत मण्यामध्यें असा अग्नि असतो, धान्याच्या बीजामध्यें जसा अंकुर स्वाभाविकपणें असतोच, तसाच आत्म्यामध्यें शिव रहातो.

अवतरणिका—ननु प्रतिबिंबस्य दर्पणाद्युपाधिकृतत्वेन प्रतिबिंबत्वं तन्निरूपितबिंबत्वं च सूर्ये कल्पितमिति वक्तुं युक्तं ब्रह्मणि तद्व्यतिरिक्तोपाधिर्नास्तीति तदयुक्तमिति दृष्टांतोऽयं विषम इत्यत्राह—

श्लोकः—आत्मत्वमीश्वरत्वं च ब्रह्मण्येकत्र कल्पितम् ॥

बिंबत्वं प्रतिबिंबत्वं यथा पूषणि कल्पितम् ॥ ३७ ॥

व्याख्यानं—एकत्र एकस्मिन्नित्यर्थः शिष्टं स्पष्टं ॥ ३७ ॥

अर्थ–॥ ३७ ॥ ज्याप्रमाणें सूर्यामध्यें बिंबपणा आणि प्रतिबिंबपणा हे दोन्ही गुण राहतात त्याचप्रमाणें ब्रह्मस्वरूपामध्यें एके ठिकाणीं जीवपणा आणि ईश्वरपणा हे दोन्ही गुण राहतात.

अवतरणिका–ननु शुद्धचिद्रूपे परमशिवे सात्विकादिगुणत्रयसंबंधो नास्तीत्युक्तत्वात् कथमुक्तार्थसिद्धिरित्यत्राह—

श्लोकः–गुणत्रयविभेदेन परतत्वे चिदात्मनि ॥
भोक्तृत्वं चैव भोज्यत्वं प्रेरकत्वं च कल्पितम् ॥ ३८ ॥

व्याख्यानं—सात्विकादिगुणत्रयभेदेन परतत्वे चिदात्मनि शुद्धचैतन्ये भोक्तृत्वं भोज्यत्वं प्रेरकत्वं च कल्पितमित्यर्थः ॥ ३८ ॥

अर्थ–॥ ३८ ॥ श्रेष्ठ तत्व अशा चित्स्वरूपांत भोक्तृत्व (उपभोग घेणाराचा गुण), भोग्य (उपभोग घेण्याचा गुण), प्रेरकत्व (प्रेरणा करण्याचा गुण) हे तिन्हीही कल्पिलेले आहेत.

श्लोकः–गुणत्रयात्मिका शक्तिर्ब्रह्मनिष्ठा सनातनी ॥
तद्वैषम्यात्समुत्पन्ना तस्मिन्वस्तुत्रयाभिधा ॥ ३९ ॥

व्याख्यानं—ब्रह्मनिष्ठासंयोगस्य क्रियापूर्वत्वात् अन्यतरोभयकर्मजश्च संयोगस्तावच्छिन्नदेशस्थितयोरेवोपपद्यत इति ब्रह्मबाह्यदेशाभावेन संयोगस्य संभवात् अक्रियापूर्वसंयोगस्याप्रसिद्धत्वाद्विष्णोरविच्छिन्नप्रसरत्वेन विच्छेदशून्यतया संधिबंधानवकाशश्च "रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोरिति" भगवदुक्तेः "औष्ण्यं हुताश इव शीतलिमानमिंदौ शय्यासु मार्दवमिवाश्मसु कर्कशत्वम् ॥ बाह्येषु मोह इव योगिषु च प्रबोध स्वातंत्र्यमस्ति हि नियंत्रयितुर्महस्तः" इत्यभियुक्तैश्च सामरस्याभेदलक्षणतादात्म्यसंबंधेन वर्तमाना नातो भेदाभेदयोर्विरोधः सार्वत्रिकः सनातनी नित्या शक्तिः ज्ञानक्रियासामरस्यात्मिका स्वाभाविकी विमर्शशक्तिः अस्तीति शेषः अन्यथा प्रकाशरूपत्वेऽपि ब्रह्मणः प्रतिबिंबनक्षमत्वादिस्वस्वरूपपरामर्शशून्याच्च स्फटिकमणिमुकुरादिप्रकाशवत्सच्चिदानंदात्मकस्वरूपपरामर्शशून्यत्वेन जडतापत्तिरनिवार्यैवेति सा पराऽस्य शक्तिर्विविधैव श्रूयते "स्वाभाविकी ज्ञानबलक्रिया चेति" श्रुतेः चिदानंदेच्छा ज्ञानक्रियादिनामारूपिणी चकारस्यानुक्तार्थप्रकाशकत्वात् तत्र चिदानंदयोरखंडत्वेन विक्षोभाभावात् इच्छादिशक्तीनां सविषयत्वेन विक्षोभसंभवात् भेदाभेदस्फुरणमयी मयूरांडरसगतपादपक्षवर्णवैचित्र्यन्यायेन स्वतादात्म्यक्रोडीकृतचराचरविश्वमयी एवंरूपिणी विमर्शशक्तिरविभा-

गपरामर्शदशायां स्वस्थाविभागपरामर्शदशायां गुणत्रयात्मिका भवति कथमिति चेत् उच्यते तद्विमर्शशक्तेरंशमात्रे घृतकाठिण्यन्यायेन क्रियांशस्य ज्ञातृतावियोगात् ज्ञानांशस्य कर्तृतावियोगात् उत्तमकर्तृताविनिर्मुक्तज्ञानांशात्सत्वगुणात्मिका विद्या शक्तिरुत्पन्ना भवति तादृशज्ञातृताविनिर्मुक्तक्रियांशात्किंचित्सत्वतमोमिश्ररजोगुणशक्तिराविर्भवति जानामीतिव्यवहारे ज्ञानस्य क्रियाभिन्नत्वात्करोमीत्यत्र कर्तृताया अपि स्फुरद्रूपत्वाज्ज्ञानक्रिययोर्वस्तुत ऐक्येऽपि विभागपरामर्शमहिमा ज्ञानं क्रिया न भवति क्रियाज्ञानं न भवतीत्यन्योन्याभावबुद्धिरेव तमोगुणशक्तिरित्येवं गुणत्रयात्मिका सती तद्वैषम्याद्गुणत्रयतारतम्यात्तस्मिन् शुद्धचिद्रूपे परमशिवे वस्तुत्रयाभिधाभोज्यभोक्तृप्रेरकलक्षणनामरूपक्रियावती सती समुत्पन्ना प्रतिस्फुरणगत्या मायाख्ययाविर्भूतेत्युक्तार्थसिद्धिरिति भावः अनेन सर्वं विश्वमंडरसन्यायेन विभागपरामर्शरूपेणास्तीति सूचितमिति न परिणामवादकृतशंकावकाशः "चिदात्मैव हि देवोंऽतःस्थितमिच्छावशाद्बहिः योगीव निरुपादानमर्थजातं प्रकाशयेदिति" श्रीमदीश्वरप्रत्यभिज्ञोक्तेश्च असदुत्पत्त्यसंभवादतिप्रसंगात् "नासतो विद्यते भाव इति" गीतत्वाच्च नन्वेवं चेद्विश्वस्य सत्यतापत्त्या बंधनिवृत्तिर्न स्यात् "नाभावो विद्यते सत इति" गीतत्वादिति चेन्न आद्यंतकोठ्योश्चिदेकरूपत्वेनाकार्यकारित्वादिच्छाभूमिप्रविष्टघटादिवन्मुक्तस्यापि न पुनर्बंधः ईश्वरेच्छायास्तत्र नियामकत्वादिति नन्वनाद्यविद्यासंबंधादिति पूर्वमुपक्रांतत्वेन निर्वचनीयसंबंधेन ब्रह्मनिष्ठा सनातनी ब्रह्मसमा न सत्ताका गुणत्रयमयी शक्तिः अध्यासरूपिण्यनाद्यविद्याशक्तिरस्ति तद्वैषम्यात्तद्गुणवैषम्यात्तस्मिन् ब्रह्मणि वस्तुत्रयाभिधा वस्तुत्रयमित्यभिधा समुत्पन्नेति व्याख्यातुं शक्यत्वात्किमित्येतावान्प्रयास इति चेन्न "तदीया परमाशक्तिः सच्चिदानंदलक्षणा समस्तलोकनिर्माणसमवायस्वरूपिणी तदिच्छयाभवत्साक्षात्तत्स्वरूपानुकारिणीति" ततोऽपि पूर्वोपक्रांतवचनविरोधाद्ब्रह्मांडशतकोटीनां सर्गस्थितिलयान्प्रति "स्थानभूतो विमर्शो यस्तद्ब्रह्मांडस्थलमुच्यते ॥ पराहंतासमावेशपरिपूर्णविमर्शवान् ॥ सर्वज्ञः सर्वगः साक्षी सर्वकर्त्ता महेश्वरः ॥ विश्वाधारं महासंवित्प्रकाशपरिपूरितम् ॥२॥ पराहंतामयं प्राहुर्विमर्शं परमात्मनः ॥ यथा चंद्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी ॥ तथा शक्तिर्विमर्शात्मा प्रकाशे ब्रह्मणि स्थिता ॥३॥ इति" वक्ष्यमाणभांडभाजनस्थलवचनविरोधाच्च अत्र शक्तेः शिवाभिन्नत्वेन निरवयवत्वात् कथं सांशप्रपंचोपादानकारणत्वं संभवतीति नाशंकनीयं यथा परमाणूनां निरवयवत्वेऽपि तत्कार्यरूपद्व्यणुकादेस्सावयवताप्राप्त्या विश्वोपादानत्वमंगीक्रियते तथा तत्स्वातंत्र्यपरिकल्पिताया मायाशक्तेः सावयवत्वसंभवाद्विश्वोपादानत्वं संभवतीति शक्तेरघटनघटनापटीयस्त्वादथ भवदंगीकृता विद्यांगीकारोऽपि न संभवति तस्य दोषरूपत्वेन ब्रह्मणस्तदाश्रयत्वे दोषित्वप्रसंगात् ननु शुक्तिकाशकलभासमानरजतस्य यथा तत्संपर्को न विद्यते तथा ब्रह्मणि भासमानाविद्याया अपि तत्संपर्काभावान्नोक्तदोष इति चेत्तर्हि जीवेश्वरविवेक एव न स्यात् अविद्यासंपर्काभावात् नच प्रतिबिंबद्वारा तद्विवेकः संभवतीति वाच्यं मुखादि-

बिंबबाह्यदर्पणादिवद्बिंबरूपब्रह्मबाह्यदेशे दर्पणस्थानापन्ना विद्या स्थित्यंगीकारासंभवाद्ब्रह्मबाह्यदेशाभावाज्जलप्रविष्टमुखवद्दर्पणरेखावच्च तत्रैव मग्नस्य तत्रैव प्रतिफलनासंभवाद्ब्रह्मापेक्षया अविद्याया अस्वच्छत्वाच्च तथाऽपि दर्पणप्रतिबिंबितमह्यादिवत्प्रतिबिंबितपदार्थस्यार्थक्रियाशून्यत्वेन भोक्तृत्वादेर्निराश्रयत्वप्रसंगः । नच दर्पणप्रतिबिंबितादित्यस्य नेत्रचंचुत्ववत्संभवतीति वाच्यं तद्वद्बिंबरूपे ब्रह्मणि भोक्तृत्वादेरभावात् नच हरिद्राचूर्णयोगेनानुभयनिष्ठलौहित्यभासनमिव संभवतीति वाच्यं तद्वदविद्याप्रतिबिंबयोः साक्षाद्वस्तुत्वाभावात्संयोजकांतरशून्यत्वाच्च मुख्यप्रकाशस्यासंगत्वादनेनैव लोहमणिदृष्टांतस्यापि दूरीकृतत्वात्तथापि प्रतिबिंबस्य दर्पणाद्युपाधिनिबंधनत्वेन निश्चिततया मायाकार्यत्वेन मिथ्यात्वात्प्रत्यगैक्यं न संभवतीति तत्वमसीत्युपदेशो निरर्थक एव स्यात् नन्वविद्यानिवृत्तिद्वारा तस्यापि निवृत्तिर्जायत इतीदमेव प्रत्यगैक्यमिति चेदात्महानिरपुरुषार्थ इति कस्यापि भवदभिमतमुक्तौ प्रवृत्तिरेव न स्यादिति संक्षेपः अथ तद्विशिष्टत्वमपि न संभवति दोषित्वप्रसक्त्या ब्रह्मणस्तत्संपर्काभावादित्युक्तत्वात् तथाप्यंशे वा साकल्ये वा नाद्यः ब्रह्मणो निरंशत्वेनोर्ध्वाधस्तिर्यग्भागभेदशून्यत्वात्कल्पितांशभेदोऽपि न संभवति कुत्र स्थित्वा कल्पयत्यविद्येति विज्ञातुमशक्यत्वाद्ब्रह्मबाह्यदेशाभावात् नच निरंशेऽप्याकाशे नक्षत्रादिस्थितिरिव संभवतीति वाच्यं तस्या वाय्वाधारत्वादाकाशस्यापि जन्यद्रव्यत्वेन सांशत्वांगीकारेण तत् दृष्टांतस्यानुभयवादिसिद्धत्वाच्च नन्वघटनघटनापटीयसी सेति चेत्सत्यं तद्भावस्य चैतन्याश्रयबलाधीनत्वेनोक्तरीत्या तदसंभवादन्यथा चैतन्यं खंडितमेव भवेत्सांख्यमतप्रवेशापत्तिश्च नापि द्वितीयः शुद्धाशुद्धविभागासंभवात् ननु संसारावस्थायामशुद्धत्वं मुक्त्यवस्थायां शुद्धत्वमिति चेन्न "जीव ईशो शुद्धचित्तस्तथा जीवेशयोर्भिदा अविद्यातच्चितोर्योगः षडस्माकमनादयः इति" संसारावस्थायामेव शुद्धाशुद्धविभागस्यांगीकृतत्वान्नन्वेवं निर्वक्तुमशक्यत्वेऽपि "तम आसीदित्यादि" श्रुत्यादिप्रमाणबलादविद्यांगीकरणीयैवेति चेत्तेषां श्रुत्यादिप्रमाणानां सत्यत्वप्रसंगः प्रमाणप्रमेययोर्घटं प्रतिचक्षुरादिरिव तद्विजातीयताया अंगीकरणीयत्वान्न च व्यवसायं प्रत्यनुव्यवसायस्य प्रामाण्यांगीकारान्नायं नियम इति वाच्यं ज्ञानस्य ज्ञातृविश्रांतत्वेन कदापीदमिति प्रमेयपदनिष्ठत्वाभावेनानुव्यवसायस्य व्यवसायभूतघटहृदयंगमीकरणप्रवीणत्वादन्यथा व्यवस्थाहानिरनवस्थापत्तिः घटोऽपि घटांतरविषयः स्यादित्यतिप्रसंगश्चेति तद्दृष्टांतस्यानुभयवादिसिद्धत्वात् अविद्यायाश्च सत्यत्वप्रसंगः अनादिभावत्वेनांगीकृतत्वात् न चाप्रयोजकोऽयं हेतुः यदि स सत्यत्वं न स्यात्तर्ह्यनादिभावत्वं च न स्यात् घटवदिति व्यतिरेकी दृष्टांतस्यापि विद्यमानत्वात् ब्रह्मातिरिक्तत्वेनांगीकृतत्वादसत्कल्पतापत्तिश्च तद्भिन्नस्य तद्बाह्यतानियमेनास्तीत्यत्र मानाभावात् सकलप्रमाणशेषिमहाप्रकाशबाह्यत्वात् नच घटगतरूपादिदृष्टांतः तद्वदसमवेतत्वात् नापि घटाकाशदृष्टांतः "आत्मन आकाशः संभूत इत्यादि" श्रुतेः पवनादीनां साक्षात्परंपरया तत्कार्यत्वेन तदंतर्गतत्वसंभ-

वात् नेह तथा द्वयोरप्यनादित्वात् नापि क्षीरनीरन्यायः आद्यंतकोट्योः परस्परबाह्ययोर्मध्यकोटौ प्रमात्रा संयोजितत्वेन क्षीरस्य नीरांतर्गतत्वात् नेह तथा चैतन्यस्यासंगत्वात् तद्वत्सजातीयत्वाभावाच्च यथा कथंचिदंगीकारेऽपि तस्याः प्रमेयत्वात् प्रमेयस्य प्रमाद्वारा प्रमातृविश्रांतिरंगीकरणीयेति विद्यैव भवेत् अविद्येति वार्तैव न स्यात् अन्यथा नष्टघटविषयिणी स्मृतिर्न स्यात् नच संस्कारात्संभवतीति वाच्यं तस्यापि सविषयत्वेनैवात्मसमवेतत्वात् एवं भवदभिमताविद्यायां मानाभावात् अंगीकारेऽपि निर्वाहाभावाद्बाधकाविर्भावाच्चानुपपन्नत्वेन ब्रह्मणो जडतानिवृत्त्यर्थबलात्तत्स्वभावभूतविमर्शशक्तेरंगीकरणीयत्वेन तस्या विश्वोपादानकारणीभूतमायारूपत्वमुपपादयितुं प्रयासोऽयं सार्थक इति नन्वेवं चेत् ब्रह्मणि किं प्रमाणं स्वातिरिक्तमानांतराभावात् अन्यथा ब्रह्म सदैव भवेदिति चेन्न तस्य स्वप्रकाशत्वेनाहं परामर्शमयस्वानुभूतिप्रमाणस्य जागरूकत्वात् विमर्शशक्तेः प्रकाशाभिन्नत्वेऽप्यघटनघटनापटीयस्त्वात् स्वस्वातंत्र्यपरिकल्पितसामरस्याभेदसद्भावात्प्रमेयप्रमाणव्यवहारः संभवतीति न काचिदनुपपत्तिः स्वातिरिक्तमानांतरगम्यत्वे घटवज्जडत्वापत्तिः श्रुत्यादिप्रमाणानां "चत्वारि वाक्परिमितापदानीति" श्रुतेः आरंभविवक्षाध्यवसायोक्तिरूपे विमर्शमयत्वेन विभागपरामर्शदशायां तन्माहात्म्यप्रकाशनपरत्वात् श्रुत्यादिप्रसिद्धाविद्यादिशब्दानां स्वातंत्र्यपरिकल्पितमायापरत्वसंभवात्सर्वं समंजसम् ॥३९॥

अर्थ-॥ ३९ ॥ त्या परब्रह्मस्वरूपामध्यें सत्वरजस्तमोमय (त्रिगुणात्मिका) शक्ति ही अनादि सिद्ध आहे, तिच्या विषमपणामुळें त्या परब्रह्मस्वरूपांत तीन वस्तूंचा निराळेपणा झाला.

अवतरणिका–अथ केन गुणेन किं वस्तु जातमित्यत्राह—

श्लोकः–किंचित्सत्वरजोरूपं भोक्तृसंज्ञकमुच्यते ॥
अत्यंततामसोपाधिर्भोज्यमित्यभिधीयते ॥ ४० ॥

व्याख्यानं—रजोगुणस्य किंचित्सत्वतमोमिश्रत्वात् "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागश इति" भगवदुक्तेः तादृग्रजोगुणमिश्रचैतन्यं भोक्तृजीवचैतन्यमित्यर्थः अत्यंततामसोपाधिविशिष्टचैतन्यं भोज्यरसादिरूपं परतत्वमयोपाधिः आभ्यामुत्कृष्टत्वेन परतत्वरूपसत्वगुणोपाधिविशिष्टचैतन्यप्रेरकीभूतमहेश्वर इत्यर्थः ॥ ४० ॥

अर्थ-॥ ४० ॥ रजोगुणांत थोडे सत्व आणि थोडे तामस गुण असल्यास त्यास भोक्तृ (जीवचैतन्य) असें नांव आहे, अतिशय तामसपणाच्या उपाधियुक्त चैतन्याला भोज्य (रस वगैरे) ह्मणतात.

अवतरणिका–अथोक्तमर्थं दृढयति—

श्लोकः–भोक्ता भोज्यं प्रेरयिता वस्तुत्रयमिदं स्मृतम् ॥

अखंडे ब्रह्मचैतन्ये कल्पितं गुणभेदतः ॥ ४१ ॥

व्याख्यानं—स्पष्टम् ॥ ४१ ॥

अर्थ–॥ ४१ ॥ भोक्ता, भोज्य आणि प्रेरयिता ह्या तीन वस्तु (वस्तुत्रय) होत. ब्रह्मस्वरूप अखंड आहे तरी त्याच्यांत सत्वगुण, रजोगुण, तमोगुण ह्यांच्या संबंधानें हें वरील वस्तुत्रय मानिलेलें आहे.

श्लोकः–अत्र प्रेरयिता शंभुश्शुद्धोपाधिर्महेश्वरः ॥

समिश्रोपाधयः सर्वे भोक्तारः पशवः स्मृताः ॥ ४२ ॥

अर्थ–॥ ४२ ॥ ह्या ब्रह्मस्वरूपांत प्रेरणा करणारा शंकर शुद्धउपाधि (शुद्ध स्वरूप) असून त्यास महेश्वर ह्मणतात. मिश्रासहित असणाऱ्या उपाधि ह्या सर्व भोक्ते होत, त्यांस पशु ह्मणतात.

अवतरणिका–अथ तेषां गुणनामांतराण्याह—

श्लोकः–भोज्यमव्यक्तमित्युक्तं शुद्धतामसरूपकम् ॥

सर्वज्ञः प्रेरकः शंभुः किंचिज्ज्ञो जीव उच्यते ॥

अत्यंतगूढचैतन्यं जडमव्यक्तमुच्यते ॥ ४३ ॥

व्याख्यानं—अधिकसत्वोपाधिकत्वात् महेश्वरः सर्वज्ञः सुखभोक्ता शंभुः किंचित्तमोमिश्रत्वात् संहारकृत्यप्रवीणः क्रोधयुक्तः जीवास्तु किंचित्सत्वतमोमिश्ररजोपाधिकत्वात् किंचिज्ज्ञाः ज्ञानाज्ञानसंमिलिताः अतएव सुखदुःखभोक्तारः शुद्धतामसोपाधिकं भोज्यमव्यक्तं प्रकृतिरित्यर्थः किमिदमव्यक्तमित्यत्राह अत्यंतेति वृक्षादीनां इंद्रियप्राणादिशून्यत्वेन केवलजडत्वेऽपि पिपासाया विद्यमानत्वात् सस्यादीनां शिलादीनां वृद्धिदर्शनात् अव्यक्तचैतन्यमिति व्यवहारः अव्यक्तं प्रकृतिर्मायेति पर्यायः॥

अर्थ–॥ ४३ ॥ जें स्पष्ट नव्हें तें भोज्य होय, तें निव्वळ तमोगुणी आहे, प्रेरणा करणारा शंकर हा सर्वज्ञ आहे जीवास अल्पज्ञ असें ह्मटलें आहे. ज्याचें चैतन्य फारच गुप्त आहे अशा जडास अव्यक्त ह्मणतात.

अवतरणिका–एवं मायागुणभेदरूपोपाधित्रयं प्रदर्श्यानंतरम् लिंगांगरूपशिवजीवस्वरूपं सुलक्षयितुं पूर्वोक्तमायोपाधिं द्विधा विभज्य दर्शयति—

श्लोकः–उपाधिः पुनराख्यातश्शुद्धाशुद्धविभेदतः ॥

शुद्धोपाधिपरा माया स्वाश्रया मोहकारिणी ॥ ४४ ॥

व्याख्यानं—"पिंडस्थलम्" उपाधिः पूर्वोक्तमायोपाधिः पुनः शुद्धाशुद्धभेदेन द्विधा भवति, तत्र शुद्धोपाधिपरा माया स्वाश्रयामोहकारिणीत्यूर्ध्वमायेत्यर्थः ॥४४॥

अर्थ-॥ ४४ ॥ उपाधीचे दोन भेद आहेत, एक शुद्धउपाधि आणि दुसरी अशुद्ध उपाधि, शुद्ध उपाधि ही श्रेष्ठ माया होय, ती आपल्याच स्वरूपाच्या आश्रयानें राहते व मोहांत पाडते.

श्लोकः-अशुद्धोपाधिरप्येवमविद्याश्रयमोहिनी ॥
अविद्याशक्तिभेदेन जीवा बहुविधाः स्मृताः ॥ ४५ ॥

व्याख्यानं—अशुद्धोपाधिः अविद्या आश्रयमोहिनीत्यधोमायेत्यर्थः अविद्या शक्तिभेदेन अंशभेदेनेत्यर्थः जीवा बहुविधाः स्मृताः ॥ ४५ ॥

अर्थ-॥ ४५ ॥ अशुद्ध उपाधि ही अविद्या होय, त्या अविद्येच्या संबंधानें परमात्मा मोहांत पडतो अविद्या शक्तीच्या भेदामुळें हे अनेक प्रकारचे जीव निर्माण झालेले आहेत असें समजावें.

श्लोकः-मायाशक्तिवशादीशो नानामूर्तिधरः प्रभुः ॥
सर्वज्ञः सर्वकर्त्ता च नित्यमुक्तो महेश्वरः ॥ ४६ ॥

व्याख्यानं—ईशः शुद्धोपाधिमहेश्वरः मायाशक्तिवशात् महामायाशक्तिवशात् सद्योजातादिनानामूर्तिधरः जीवानां बुद्धिप्रेरकः प्रभुः कर्तुमकर्तुमन्यथा कर्तुं समर्थः सर्वज्ञः सदसत्सकलपदार्थविषयकानादिज्ञानशक्तिमान् सर्वकर्त्ता च सकलप्रपंचनिर्माणनिमित्तकारणीभूतः नित्यमुक्तः आणवाद्यनादिमलसंबंधरहितः "सर्वज्ञः सर्वकर्त्ता च सर्वज्ञः पंचकृत्यसंपन्नः सर्वेश्वर ईश इति" वृद्धजाबालश्रुतेः ॥ ४६ ॥

अर्थ-॥ ४६ ॥ मायाशक्तीच्या सामर्थ्यानें परमेश्वर अनेक प्रकारचे अवतार घेतो. तो सर्वज्ञ आहे, सर्वकर्ता आहे, नित्यमुक्त आहे व महेश्वर आहे हें सर्व खरें आहे परंतु त्यास मायेमुळें अवतार घ्यावेच लागतात.

श्लोकः-किंचित्कर्त्ता च किंचिज्ज्ञो बद्धोऽनादिशरीरवान् ॥
अविद्यामोहिता जीवा ब्रह्मैक्यज्ञानवर्जिताः ॥ ४७ ॥

व्याख्यानं—अथ जीवस्वरूपमाह, किंचित्कर्तेति, किंचित्कर्ता किंचिऽज्ञः बद्धः आणवाद्यनादिमलपाशबद्धः ईशप्रेरितस्स जीवः अनादिशरीरवान् अनादितः प्राप्तशरीराभिमानवान् "तज्ज्ञाज्ञौ द्वावजावीशानीशावजो ह्येको भोगार्थयुक्तः अनीशस्वात्मा बाध्यते भोक्तृभावात् ज्ञात्वादेवं मुच्यते सर्वपाशैरिति" श्वेताश्वतरश्रुतेः "अनादिमलसंबंधात्किंचिज्ज्ञोऽणुमेयोदितः॥अनादिमलयुक्तत्वात् सर्वज्ञोऽसौ शिवः स्मृत इति" किरणागमोक्तेश्च एवंरूपा जीवाः अविद्यामोहिताः संतः ब्रह्मैकज्ञानवर्जिताः अहंब्रह्मास्मीति तादात्म्यज्ञानशून्याः ॥ ४७ ॥

अर्थ-॥ ४७ ॥ जीव हा लहानसहान कर्में करणारा असून अल्पज्ञ आहे,

बद्ध आहे अनादि कालापासून तो देहधारी बनलेला आहे, त्या अविद्येनें भुलून गेलेले प्राणिमात्र (जीव) ब्रह्मैक्याचें ज्ञान न झाल्यामुळें.

श्लोकः–परिभ्रमंति संसारे निजकर्मानुसारतः ॥
देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः ॥ ४८ ॥

व्याख्यानं—संतः निजकर्मानुसारतः देवतिर्यङ्मनुष्यादिनानायोनिभेदमधिगम्य संसारे परिभ्रमंतीत्यर्थः अत्र सृष्टेः प्राक् कर्माभावात्कथमिति नाशंकनीयं, सद्वादमर्यादया सर्वं विश्वमंडरसन्यायेन, परब्रह्मण्यविभागपरामर्शात्मनास्तीत्यंगीकृतत्वात् ॥ ४८ ॥

अर्थ–॥ ४८ ॥ आपापल्या कर्माप्रमाणें देव, पशु, पक्षी, मनुष्य वगैरे चौऱ्यांशी लक्ष योनींमध्यें जन्मून संसारांत फिरत असतात.

अवतरणिका–अथ कथं भ्रमंतीत्यत्राह—

श्लोकः–चक्रनेमिक्रमेणैव भ्रमंति हि शरीरिणः ॥
जात्यायुर्भोगवैषम्यकारणं कर्म केवलम् ॥ ४९ ॥

व्याख्यानं—रथांगमस्तकगतलोहवलयवद्भ्रमंतीत्यर्थः ॥ ४९ ॥

अर्थ–॥ ४९ ॥ चाकाची धाव (वाटोळी चाकावरील लोखंडी पट्टी) वाटेवर जातांना चाकाप्रमाणें सदोदित सारखी फिरत असते, त्याप्रमाणेंच हे देहधारी जीव संसारांत सदोदित फिरत असतात. त्या प्राण्यांस जाति, आयुष्य, भोग, वैषम्य सुख दुःख वगैरे कमज्यास्ती करण्यास कर्म कारण (मूळ) आहे. (कर्माप्रमाणें त्यांस जाति, आयुष्य, सुख दुःख भोगावें लागतें.)

अवतरणिका–ननु जीवाः कर्मानुसारेण परिभ्रमंति तेषां जात्यायुर्भोगवैषम्यकारणं केवलं कर्मैवेत्युक्तत्वादीश्वरः किमर्थमंगीकरणीय इत्यत्राह—

श्लोकः–एतेषां देहिनां साक्षी प्रेरकः परमेश्वरः ॥
एतेषां भ्रमतां नित्यं कर्मयंत्रनियंत्रणे ॥ ५० ॥

व्याख्यानं—कर्मसूत्रबद्धे संसारचक्रे सदा परिभ्रमतामेतेषां विचित्रदेहिनां एतेषां कर्मणामिति शेषः परमेश्वरः प्रेरकः कर्मणां जडत्वेन प्रेरकत्वासंभवात् प्रेरकत्वेन साक्षित्वेनेश्वरोऽगीकरणीय इत्यर्थः ॥ ५० ॥

अर्थ–॥ ५० ॥ कर्मरूप यंत्राच्या फेऱ्यांत सांपडून गरगर फिरणाऱ्या ह्या प्राणिमात्रांचा परमेश्वर (शिव) प्रेरक (प्रेरणा करणारा) व साक्षी (साक्षीदार आहे.

अवतरणिका—अथवास्य नैतावन्मात्रं विशेषोऽप्यस्तीत्याह—

श्लोकः—देहिनां प्रेरकः शंभुर्हितमार्गोपदेशकः ॥
पुनरावृत्तिरहितमोक्षमार्गोपदेशकः ॥ ५१ ॥

व्याख्यानं—स्पष्टं ॥ ५१ ॥

अर्थ—॥ ५१ ॥ प्राणिमात्रांचा शंकर हा प्रेरक असून कल्याणकारक मार्गाचा उपदेश करणारा आहे, जन्म मरण चुकवून मोक्षप्राप्तीचा उपदेश करणारा आहे.

अवतरणिका—कथमित्यत्राह—

श्लोकः—स्वकर्मपरिपाकेन प्रक्षीणमलवासनः ॥
शिवप्रसादाज्जीवोऽयं जायते शुद्धमानसः ॥ ५२ ॥

व्याख्यानं—अयं जीवः स्वकर्मपरिपाकेन "विज्ञानयोगसंन्यासैर्भोगाद्वा कर्मणः क्षय इति" शिवागमोक्तेः स्वस्वकर्मपरिपाकेन विनष्टमलवासनः सन् शिवप्रसादात् शुद्धांतःकरणो जायते ॥ ५२ ॥

अर्थ—॥ ५२ ॥ आपलें कर्म परिपक्व झालें (क्षय होण्याच्या स्थितीस येऊन पोंचलें) ह्मणजे वाईट वाईट इच्छांचा नाश होतो व नंतर शंकराचे कृपेनें ह्या जीवाचें मन शुद्ध होतें.

श्लोकः—शुद्धांतःकरणे जीवे शुद्धकर्मविपाकतः ॥
जायते शिवकारुण्यात्प्रस्फुटा भक्तिरैश्वरी ॥ ५३ ॥

व्याख्यानं—तस्मिन् शुद्धकर्मविपाकतः श्रुत्यागमोक्तशुद्धकर्मपरिपाकवशात् शिवस्य कृपा भवति शिवविषयिणी भक्तिः प्रस्फुटा भवति तद्द्वारा मोक्षमार्गोपदेश इत्यर्थः ॥ ५३ ॥

अर्थ—॥ ५३ ॥ शुद्ध कर्माचा उदय आला ह्मणजे जीवाचें अंतःकरण शुद्ध होतें व शंकराच्या कृपेनें त्याच्या हातून उत्तम प्रकारची शिवभक्ति घडते.

अवतरणिका—एवमुत्पन्नशिवभक्तिमान् चरमदेही पिंडशब्दाभिधेय इति पिंडस्थलं समापयति—

श्लोकः—जंतुरंत्यशरीरोऽसौ पिंडशब्दाभिधेयकः ॥ ५४ ॥

व्याख्यानं—असौ जंतुः एवमुत्पन्नशिवभक्तिमान् जीवः अंत्यशरीरः "तदस्य तृतीयं जन्मेति" श्रुतेः चरमशरीरवान् सन् पिंडशब्दाभिधेयकः पिंडशब्दाभिधानवानित्यर्थः ॥ इति पिंडस्थलं ॥ ५४ ॥

अर्थ—॥ ५४ ॥ जो जीव त्याच देहामध्यें (त्याच जन्मामध्यें) मोक्षास जातो त्या प्राण्यास पिंड ह्मणतात.

इति पिंडस्थलम् ॥

अथ पिंडज्ञानस्थलं निरूपयति ।

अवतरणिका–ननु शरीरात्मविवेकः किमित्यपेक्षित इत्यत्राह—

श्लोकः–शरीरात्मविवेकेन पिंडज्ञानी स कथ्यते ॥
शरीरमेव चार्वाकैरात्मेति परिकीर्त्यते ॥ १ ॥

व्याख्यानं—शरीरात्मविवेकेन शरीरशरीरिणोर्विवेकेन पिंडज्ञानीति शास्त्रज्ञैः कथ्यत इत्यर्थः एवंविधवादिभिरात्मतत्वस्य संदिग्धत्वात् संदिग्धेऽर्थे न्यायः प्रवर्तत इति शास्त्रकृद्भिरंगीकृतत्वात् शरीरात्मत्वे विवेक आवश्यक इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ शरीर आणि आत्मा (जीव) ह्याचें ज्याला ज्ञान असतें तो पिंडज्ञानी होय. चार्वाक (नास्तिक लोक) शरीरालाच आत्मा ह्मणतात.

श्लोकः–इंद्रियाणां तथात्मत्वमपरैः परिभाष्यते ॥
बुद्धितत्वगतैर्बौद्धैर्बुद्धिरात्मेति गीयते ॥ २ ॥

अवतरणिका–कथं तद्विवेक इत्यत्राह—

श्लोकः–नेंद्रियाणां न देहस्य न बुद्धेरात्मता भवेत् ॥
अहंप्रत्ययवेद्यत्वादनुभूतस्मृतेरपि ॥ ३ ॥

श्लोकः–शरीरेंद्रियबुद्धिभ्यो व्यतिरिक्तः सनातनः ॥
आत्मस्थितिविवेकी यः पिंडज्ञानी स कथ्यते ॥ ४ ॥

व्याख्यानं—अयं भावः गृहक्षेत्रादिनाशे सति दुःखदर्शनात् तदभिवृद्धौ सुखातिशयात् गृहक्षेत्रादिकमेवात्मेति विषयात्मवादिनो लौकिका मन्यंते ततोऽपि समधिकविवेकभाजः गृहक्षेत्रादीनां मृगपक्षिसरिद्गिरिग्रामादिविवेकाभावात् शरीरस्य तादृग्विवेकसद्भावात् शरीरमेवात्मेति चार्वाका मन्यंते शरीरे प्राणवायुपरिस्पंदाभावे ज्ञानानुदयात् न शरीरं प्राण एवात्मेति केचिद्वदंति, सुप्तिकाले प्राणस्पंदस्य विद्यमानत्वेऽपींद्रियव्यापाराभावेन ज्ञानशून्यत्वात् इंद्रियमेवात्मेवात्मेत्यपरे अत्र इंद्रियाणां बाहुल्यात् इंद्रियसमूह आत्मेत्युच्यते वा व्यष्टिरूपस्यात्मत्वमुच्यते वेति विकल्पः नाद्यः तत्रैकस्य द्वयोर्वा नाशे समुदायनाशेन ज्ञानानुदयप्रसंगात् न द्वितीयः जलमिदं स्वच्छं मधुरमिति प्रतीतिर्न स्यादिति एकैकार्थप्रकाशकत्वाद्यष्टेः एवं शरीरादेर्ज्ञानशून्यत्वेन जडत्वात् आत्मत्वं न संभवतीति बुद्धिरेवात्मा अत्र बुद्धेश्चक्षुरादिकरणसाध्यत्वात् करणानां कुठारादिवत्कर्त्रधीनत्वात् बुद्धयुत्तीर्णः कश्चित्कर्त्ताऽगीकरणीय इति नाशंकनीयम् करणजन्यस्य

जडत्वनियमेन बुद्धेर्जडतापत्त्यार्थग्रहणापटुत्त्वात् नेष्टापत्तिः जडबुद्धेरात्मनोऽपि जडतापत्तेरनिवार्यत्वात् लोकव्यवहारो विलुप्येतेति भवदभिमतात्मवद्बुद्धिः स्वतः सिद्धैवेत्यंगीकरणीयतया प्रथमं घटानुभवः ततो घटविकल्पः तदनंतरं तज्जनित-संस्कारात्द्भाविकोटिनिष्ठा स्मृतिः स्मृत्या लोकव्यवहार इति भिन्नकालभिन्नाकार-भिन्नविषयिणी क्षणिकज्ञानसंततिरेवात्मेति बुद्धिप्राधान्यवादिनो बौद्धा वदंति अत्रोत्तरं ॥ अहंप्रत्ययवेद्यत्वादनुभूस्मृतेरपि ॥ शरीरेंद्रियबुद्धिभ्यो व्यतिरिक्तः सनातनः ॥१॥ आत्माऽस्तीति मम शरीरं ममेंद्रियं मम बुद्धिर्मम स्मृतिः शरीर्यहं स्फुटेंद्रियोऽहं जानामि स्मरामीति शरीरेंद्रियबुद्ध्युत्तीऽर्णोऽहं प्रत्ययाधीनतया स्मृत्यादीनामपि भासमानत्वात्तद्व्यतिरिक्तः कश्चिदात्मास्तीत्यंगीकरणीय इत्यर्थः। नन्वहं प्रत्ययस्यास्माभिर्निर्विकल्पकसविकल्पकलक्षणज्ञानद्वयांतर्गतत्वेनांगीकृतत्वान्न तद्व्यतिरिक्तः न च तर्ह्ययमात्मव्यतिरिक्तं न किंचिद्विकल्पयतीत्यात्मा सिद्ध इति वाच्यं स्थूलोऽहं कृशोऽहं सुख्यहं दुःख्यहमिति रूपवेदनासंतानसंस्पर्शित्वेन शरीरादीन्विकल्पयतीति तस्मान्नास्मदंगीकृतरूपविवेदनसंज्ञानविज्ञान संस्कारलक्षणपंचसंतानोत्तीर्णः शरीरादिसंतानमूर्धन्योऽप्यहं प्रत्ययो नात्मा भवितुमर्हति रूपवेदनासंतानसंस्पर्शित्वेनानित्यत्वात् सुप्तिमूर्छादावभावाच्च न च घटमहं जानामीत्यत्र वेद्यरूपकर्मप्रकाशात् वेदनारूपज्ञानप्रकाशाच्चोत्तीर्णत्वेन भासमानत्वादहंप्रत्यय आत्मानमेव विकल्पयतीति वाच्यं तस्याहं प्रत्ययव्यतिरेकेणादृश्यत्वात् अहंप्रत्ययस्यानित्यत्वात् यदि प्रत्ययस्य सविषयताऽन्यथाऽनुपपत्त्या तद्व्यतिरिक्त आत्मानुमीयते तर्हि कोऽयमनुमाता अहं प्रत्ययो वा तद्व्यतिरिक्तो वा नाद्यः अनित्येहं प्रत्ययस्यानुमातृतांगीकारेणास्मन्मतप्रवेशापत्तेः तव्द्यतिरिक्तस्यानुमातुरदृश्यत्वात् यदि दृश्यस्तर्हि तस्य बुद्धितुल्यत्वप्रसंगाद्बुद्धिरेवात्मेति चेत् मैवं बुद्धेः क्षणिकत्वेन, भिन्नकालभिन्नविषयभिन्नाकारत्वेनांगीकृतत्वात्, नीलं, पीताद्भिन्नं पीतं नीलाद्भिन्नं नीलमहं जानामि पीतमहं जानामि योऽहं बाल्ये पितरावन्वभूवं स एवाहमिदानीं पुत्रदाराननुभवामीत्येकसंविल्लग्नतया बाह्याभ्यंतरानुसंधानासंभवात् क्षणद्वयावगाहि संविदंतरानंगीकारात् रूपसंस्कारेण रसस्मृत्यनुदयात् स्मृतेः स्वसमानविषयताव्यवस्थापकत्वेन संस्कारस्य कृतार्थत्वात् स्मृतिजनकं न किंचित्पश्याम इति स्मृतेर्गगनकुसुमायमानत्वेन तन्मूलकस्य सर्वस्यापि लोकव्यवहारस्योच्छित्तिप्रसंगाच्च तस्मान्नित्यः कश्चिदात्मानुसंधाता ज्ञानस्मृत्यपोहनशक्तिमानंगीकरणीयः मत्तः स्मृतिर्ज्ञानमपोहनं चेत्येतदभिप्रायेणैव भगवताऽपि गीतत्वात् सचाहं प्रत्ययस्वरूप एव तद्भिन्नस्यादृश्यत्वादिति सूक्तत्वात् तस्य सुप्तिमूर्छादावभावान्नानित्यत्वमाशंकनीयम् तदा तस्य शून्यस्थाननिमग्नत्वेन तदीयस्वप्रकाशस्य तिरोहितत्वात् अन्यथोत्थितस्य सुखमहमस्वापमिति सुखस्मृत्यनुदयप्रसंगः स्मृतेरनुभवमूलत्वात् स्वतंत्रांशीभूतप्राणवायुपरिस्पंदस्य विद्यमानत्वेन तस्य हानादानादिरूपतया कर्तृनिरूपितत्वात् कर्तृज्ञानपुरःसरत्वा-

दिसंक्षेपः नन्वेतावता शरीरी कश्चित् जीवात्मा सिद्धः न तत्प्रेरक ईश्वर इति चेत् लोके विदारणादिक्रियाणां कुठारादिकरणसाध्यत्वात् करणानां कर्मेंद्रियाधीनत्वात् तेषां ज्ञानेंद्रियाधीनत्वात् तेषामंतरिन्द्रियाधीनत्वात् तेषां शरीर्यधीनत्वात् तस्य देशकालादिपरतंत्रत्वात् स्वतंत्रेण विना न संभवतीति व्यवहारान्यथानुपपत्त्यैव सोऽपि सिद्ध इति वदंतो वैय्यासिकाश्च प्रत्युक्ता इति मंतव्यं ॥ ३-३-४ ॥

अर्थ-॥ २ ॥ चार्वाकमताच्या योग्यतेचे दुसरे कोणी मतवाले इंद्रियांच्या समुदायास आत्मा ह्मणतात. बुद्धि हेंच मुख्य तत्व मानण्यावरून ज्यांस बौद्ध असें नांव पडलें आहे ते बौद्ध बुद्धीलाच आत्मा ह्मणतात.

अर्थ-॥ ३ ॥ इंद्रियांस किंवा शरीरास किंवा बुद्धीस आत्मा मुळीच ह्मणतां येत नाहीं कां तर मी असा शब्द करणारा कोणी तरी निराळा आहे असें उघड उघड रीतीनें दिसून येतें.

अर्थ-॥ ४ ॥ सारांश, शरीर, बुद्धि आणि इंद्रिय ह्यांहून आत्मा हा निराळा आहे आणि तो चिरकालापासून आहे. असा आत्मस्वरूपाचा ज्याला विचार आहे त्याला पिंडज्ञानी ह्मणावें.

श्लोकः-नश्वराणि शरीराणि नानारूपाणि कर्मणा ॥
आश्रितो नित्य एवासाविति जंतोर्विवेकिता ॥ ५ ॥

व्याख्यानं—कर्मवशात्प्राप्तानि नानारूपाणि शरीराणि नश्वराणीति जीवस्य विवेकिता पिंडविवेकः तादृक्पिंडश्रितो जीवः नित्य इति विवेकिता पिंडज्ञ-विवेकः ॥ ५ ॥

अर्थ-॥ ५ ॥ कर्माप्रमाणें अनेक तऱ्हेचीं घ्यावीं लागणारीं रूपें (शरीरें) हीं नश्वर (नाशिवंत) आहेत त्या शरीरांत राहणारा आत्मा हा नित्य आहे त्याचा नाश होत नाहीं असा विचार करणें त्याला शहाणपण (पिंडज्ञान) ह्मणावें.

अवतरणिका-नन्वयं विवेकः सांख्यमतसदृशो जात इ-त्यत्राह—

श्लोकः-शरीरात्पृथगात्मानमात्मभ्यः पृथगीश्वरम् ॥
प्रेरकं यो विजानाति पिंडज्ञानीति कथ्यते ॥ ६ ॥

व्याख्यानं—स्पष्टम् ॥ अयमेव नित्यानित्यलक्षणक्षेत्रक्षेत्रज्ञविवेकः क्षेत्रज्ञे जीवे प्रेरकत्वेनेश्वरस्य चंद्रकांते यथा तोयमित्याद्युक्तदृष्टांतेन तादात्म्येन विद्यमा-नत्वात् उक्तंच गीतायाम् "इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते। एतद्यो वेद तं प्राहुः क्षेत्रज्ञ इति तद्विदः। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम। क्षेत्रज्ञं चापि मां विद्धि

सर्वक्षेत्रेषु भारतेति" "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यं अंतःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यंति यतयः क्षीणपापाः। इति" मंडूकश्रुतेः "अशरीरं यदात्मानं पश्यंति ज्ञानचक्षुषा। तदा भवति शांतात्मा सर्वतो विगतस्पृहः। इति" देवीकालोत्तरवचनाच्च देहदेहिस्वरूपं अंगांगिनोर्जीवेश्वरयोः स्वरूपं च विज्ञेयमिति पिंडज्ञानस्थलम्" ॥ ६ ॥

अर्थ-॥ ६ ॥ शरीराहून आत्मा वेगळा आत्म्याहून ईश्वर वेगळा आणि तो ईश्वरच प्रेरक आहे त्या ईश्वराला जो जाणतो त्याला पिंडज्ञानी ह्मणावें.

श्रीशिवाय नमः

अवतरणिका-अथैवंरूपपिंडज्ञानिन उत्पद्यमानसंसारहेयस्थलं निरूपयति—

श्लोकः-निरस्तहृत्कलंकस्य नित्यानित्यविवेकिनः ॥
संसारहेयता बुद्धिर्जायते वासनाबलात् ॥ १ ॥

व्याख्यानं—उक्तप्रकारेणानेकजन्मार्जितसुकृतवशात्प्रक्षीणपापत्वेन शुद्धांतःकरणस्य नित्यानित्यविवेकिनः पुण्याधिक्येन सत्संस्कारबलात् संसारे त्यागबुद्धिरुत्पद्यत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ ज्याच्या मनोरूप कमलांतील (मनांतील) वाईट वासना सर्व नाहींशा झाल्यामुळें जो प्राणी आत्मा नित्य आहे शरीर अनित्य आहे असा मनामध्यें नेहमीं विचार करितो त्याला चांगली बुद्धि उत्पन्न झाली ह्मणजे तिच्या सामर्थ्यानें संसार सोडून द्यावा असें वाटूं लागतें.

अवतरणिका-कुत इत्यत्राह—

श्लोकः-ऐहिके क्षणिके सौख्ये पुत्रदारादिसंभवे ॥
क्षयित्वादियुते स्वर्गे कस्य वांच्छा विवेकिनः ॥ २ ॥

व्याख्यानं—पुत्रदारादिजायमानसुखस्य नश्वरत्वं प्रत्यक्षेणानुभूयते ज्योतिष्टोमादियागजन्यस्वर्गसुखस्यापि "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंतीति" भगवदुक्तेर्नश्वरतावगम्यते एवंरूपैहिकाष्मिकसुखयोः नित्यानित्यविवेकिनः कस्य वांच्छा भवेत् न कस्यापीत्यर्थः। नश्वरत्वात् हेयबुद्धिरेव भवेदिति भावः ॥ २ ॥

अर्थ-॥ २ ॥ ह्या लोकांत (मृत्युलोकांत) मुलें बायको वगैरेपासून होणारें सुख क्षणभंगुर आहे असें समजून आल्यावर स्वर्गलोकांत तरी जन्म मरण

आहेतच तेव्हां स्वर्गसुखाविषयीं आवड कोणता शहाणा मनुष्य करील? कोणीं करणार नाहीं. (मृत्युलोकाच्या सुखाप्रमाणेंच स्वर्गलोकाचें सुख क्षण-भंगुर आहे.

अवतरणिका– ननु सांसारिकसुखस्यानित्यत्वात्परित्यागो युक्तः संसारः किमर्थं त्यजनीय इत्यत्र दोषानुद्भावयति—

श्लोकः–जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥
जंतुर्मरणजन्मभ्यां परिभ्रमति चक्रवत् ॥ ३ ॥

व्याख्यानं—विश्रांत्यभावादिति भावः ॥ ३ ॥

अर्थ–॥ ३ ॥ जो जन्मला त्याला मरण आहेच जो मेला त्याला पुन्हा जन्म आहेच. सारांश, प्राणी जन्ममरणामुळें चाकासारखा फिरत असतो.

अवतरणिका–अस्मिन्नर्थे कर्माधीनपुरुषदृष्टांतमप्याह—

श्लोकः–मत्स्यकूर्मवराहांगैर्नृसिंहमनुजादिभिः ॥
जातेन निधनं प्राप्तं विष्णुनापि महात्मना ॥ ४ ॥

व्याख्यानं—दुष्टदैत्यनिबर्हणार्थं भक्तानुग्रहार्थं च मत्स्यकूर्मादिशरीरैः सह जातेन अवतारं धृतवता महात्मना महापुरुषेण कर्माधीनेन विष्णुनापि नारायणेनापि निधनं मरणं प्राप्तमित्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ विष्णु महासामर्थ्यवान् आहे खरा. परंतु कर्म कोणास चुकलें नाहीं मत्स्य, कूर्म, वराह, नारसिंह, दाशरथि राम, परशुराम वगैरे अनेक जन्म त्यानें घेतले तो महासामर्थ्यवान् होता परंतु मरण त्यासही चुकलें नाहीं. जितके वेळ जन्मास आला तितकेच वेळ मरण पावला.

अवतरणिका–एवंस्थिते पराधीनो जंतुस्तापत्रयाद्दह्यत एवेत्याह—

श्लोकः–भूत्वा कर्मवशाज्जंतुर्ब्राह्मणादिषु जातिषु ॥
तापत्रयमहावह्निसंतापाद्दह्यते भृशम् ॥ ५ ॥

व्याख्यानं—दह्यते तप्यत इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ कर्माच्या स्वाधीन असणारा प्राणी ब्राह्मण, क्षत्रिय, वैश्य, शूद्र वगैरे जातीमध्यें जन्मला तरी आध्यात्मिक, आधिभौतिक, आधिदैविक ह्या तीन प्रकारच्या तापरूप अग्नीमध्यें भाजून सारखा तळमळत असतो.

अवतरणिका–ननु तापत्रयानुवृत्तिविच्छित्तिरस्मिन्संसारे कदाप्यस्ति वा नवेत्यत्राह—

श्लोकः–कर्ममूलेन दुःखेन पीड्यमानस्य देहिनः ॥
आध्यात्मिकादिना नित्यं कुत्र विश्रांतिरिष्यते ॥ ६ ॥

व्याख्यानं—कर्ममूलेनाध्यात्मिकादिना दुःखेन सदा बाध्यमानस्य प्राणिनः कुत्र कस्मिन्नधिकरणे विश्रांतिः विश्रमणं इष्यते इच्छाविषयीक्रियते न क्वापीत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ दुःखाचें मूळ कारण कर्म आहे. त्या आध्यात्मिक, आधिभौतिक, आधिदैविक नांवाच्या तीन प्रकारच्या दुःखानें गांजून गेलेल्या मनुष्यास विश्रांति कोठून मिळणार?

अवतरणिका–अथ किं तत्तापत्रयमित्यत्राह—

श्लोकः–आध्यात्मिकं तु प्रथमं द्वितीयं चाधिभौतिकम् ॥
आधिदैविकमन्यच्च दुःखत्रयमिदं स्मृतम् ॥ ७ ॥

अर्थ–॥ ७ ॥ त्या तीन प्रकारच्या दुःखापैकीं आध्यात्मिक नांवाचें (आत्म्यापासून होणारें) दुःख पहिलें होय, आधिभौतिक (इतर लोकांपासून होणारें) दुसरें असून आधिदैविक (देवादिकांपासून भूतपिशाचांपासून होणारें) दुःख तिसरें होय, अशीं तीन प्रकारचीं दुःखें आहेत.

अवतरणिका–अथ तत्स्वरूपं लक्षयति—

श्लोकः–आध्यात्मिकं द्विधा प्रोक्तं बाह्याभ्यंतरभेदतः ॥
वातपित्तादिजं दुःखं बाह्यमाध्यात्मिकं मतम् ॥ ८ ॥

व्याख्यानं—स्पष्टम् ॥ ८ ॥

अर्थ–॥ ८ ॥ आध्यात्मिकाचें दोन भेद आहेत एक बाह्य आणि एक अभ्यन्तर, वात, पित्त, कफ वगैरेपासून उत्पन्न होणारें बाह्याऽध्यात्मिक दुःख होय.

श्लोकः–रागद्वेषादिसंपन्नमांतरं परिकीर्त्यते ॥
आधिभौतिकमेतद्धि दुःखं राजादिभूतजम् ॥ ९ ॥

अर्थ–॥ ९ ॥ काम, क्रोध, राग, द्वेष, वगैरे षड्रिपूंपासून उत्पन्न होणारें दुःख अभ्यन्तराध्यात्मिक होय. राजा वगैरे इतर लोकांपासून उत्पन्न होणारें दुःख आधिभौतिक होय.

श्लोकः–आदिदैविकमाख्यातं ग्रहयक्षादिसंभवम् ॥
दुःखैरेतैरुपेतस्य कर्मबद्धस्य देहिनः ॥
स्वर्गे वा यदि वा भूमौ सुखलेशो न विद्यते ॥ १० ॥

अर्थ–॥ १० ॥ ग्रह, यक्ष, भूत, पिशाच इत्यादिकांपासून उत्पन्न होणारें दुःख आधिदैविक होय. ह्या तीन प्रकारच्या दुःखांनीं पीडलेल्या कर्मबद्ध मनुष्याला तो स्वर्गांत असो किंवा मृत्युलोकीं असो त्याला सुख ह्मणून मिळत नाहीं.

अवतरणिका–अथ राज्यादिसंपत्तिः सुखं नास्ति वेत्यत्र नास्तीति दृष्टांतपूर्वकमाह—

श्लोकः–तटित्सु वीचिमालासु प्रदीपस्य प्रभासु च ॥
संपत्सु कर्ममूलासु कस्य वा स्थिरता मतिः ॥ ११ ॥

व्याख्यानं—विद्युत्सु तरंगमालासु दीपशिखासु यथा स्थिरता बुद्धिर्नास्ति तथा कर्ममूलासु संपत्स्वपि स्थिरता बुद्धिर्विवेकिनो नास्तीत्यर्थः ॥ ११ ॥

अर्थ–॥ ११ ॥ विजांमध्यें, पाण्याच्या लाटांमध्यें, दिव्याच्या प्रकाशामध्यें तसेंच कर्माप्रमाणें प्राप्त होणाऱ्या संपत्तीविषयीं स्थिरपणाची बुद्धि कोणाची असेल? विजा, पाण्याच्या लाटा, दिव्याचा उजेड आणि संपत्ति ह्या सर्व चंचळ आहेत असें सर्वांस कळून चुकलें आहे.

अवतरणिका–ननु विद्युदादिविलक्षणत्वात् सुखसाधानत्वात् शरीरं वांच्छाविषयमस्त्वित्यत्र भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिते विण्मूत्रवातपित्तकफसंघाते दुर्गंधे निःसारे किं कामोपभोगैरिति मैत्रेयश्रुत्यनुसारेणाह—

श्लोकः–मलकोशे शरीरेऽस्मिन् महादुःखविवर्धने ॥
तडिदंकुरसंकाशे को वा रुच्येत पंडितः ॥ १२ ॥

व्याख्यानं–मलकोशे मलमूत्राद्याधारभूते क्षणिके अस्मिन् शरीरे को वा पापपिंडो विवेकी प्रीतिं कुर्यात् न कोपि कुर्यादित्यर्थः ॥ १२ ॥

अर्थ–॥ १२ ॥ हें शरीर विष्ठा, मूत्र, वगैरे दुर्गंधि पदार्थांचें कोठार आहे, त्यापासून आत्म्यास अनेक प्रकारचीं मोठमोठीं दुःखें सोसावीं लागतात. व तसेंच हें शरीर विजेप्रमाणें चंचळ आहे ह्याविषयीं कोणता शाहाणा अभिमान धरील व ह्यावर प्रीति करील? ह्या शरीरावर कोणताही शहाणा प्रीति करणार नाहीं.

अवतरणिका–ननु शरीरस्यैव परमप्रेमास्पदत्वात् तत्र रुचिरस्त्वित्यत्राह—

श्लोकः–नित्यानंदचिदाकारमात्मतत्त्वं विहाय कः ॥
विवेकी रमते देहे नश्वरे दुःखभाजने ॥ १३ ॥

व्याख्यानं—नित्यानंदस्वरूपस्यात्मतत्वस्य विद्यमानत्वात् तस्यैव परमप्रेमास्पदत्वात् तद्विहाय नश्वरे दुःखपात्रे शरीरे को विवेकी रमते न कोपि रमत इत्यर्थः ॥ १३ ॥

अर्थ–॥ १३ ॥ आत्मतत्व नित्यानंदस्वरूप असून चित्स्वरूप आहे त्या तत्वाचा त्याग करून कोणता शहाणा मनुष्य नाशिवंत अशा आणि अनेक प्रकारचीं दुःखें भोगण्यास लावणाऱ्या शरीरावर प्रेम करील? शाहाणा मनुष्य शरीरावर प्रेम करून आत्मस्वरूपाकडे दुर्लक्ष्य कधींही करणार नाहीं.

अवतरणिका–अथ विवेकिनो नश्वरे शरीरमात्र एव विरक्तिरिति न तत्संबंधिषु सर्वेष्वपि विरक्तिरित्याह—

श्लोकः–विवेकी शुद्धहृदयो निश्चितात्मसुखोदयः ॥
दुःखहेतौ शरीरेऽस्मिन् कलत्रे च सुतेषु च ॥ १४ ॥

व्याख्यानं—शुद्धहृदयः निर्मलांतःकरणः अत एव निश्चितात्मसुखोदयः श्रुतिगुरुस्वानुभवैर्निश्चितनित्यानित्यसुखस्फूर्तिमान् विवेकी नित्यानित्यवस्तुविवेकी दुःखहेतौ उक्तलक्षणसकलदुःखकारणे अस्मिन् शरीरे कलत्रे स्त्रीषु सुतेषु ॥ १४ ॥

अर्थ–॥ १४ ॥ ज्याचें मन निष्पाप आहे व ज्याला आत्मस्वरूपाचा वास्तविक अनुभव आला आहे तो विचारी मनुष्य दुःखांचें मूळ अशा आपल्या स्वतःचे शरीराविषयीं, स्त्रियेविषयी, मुलांबाळांविषयीं,

श्लोकः–सुहृत्सु बंधुवर्गेषु धनेषु कुलपद्धतौ ॥
अनित्यबुद्ध्या सर्वत्र वैराग्यं परमश्नुते ॥ १५ ॥

व्याख्यानं—सुहृत्सु मित्रेषु बांधवसमूहेषु कुलपद्धतौ कुलक्रमे धनेषु गोधनादिधनेषु सर्वत्र एतद्व्यतिरिक्तसकलवस्तुष्वपि अनित्यबुद्ध्या परं वैराग्यं अश्नुते आश्रयतीत्यर्थः ॥ १५ ॥

अर्थ–॥ १५ ॥ मित्राविषयीं, नातलगांविषयीं, द्रव्याविषयीं वंशाच्या रीतीविषयीं हें सर्व क्षणभंगुर आहेत असें समजून त्यांवर प्रेम न करितां उदासीनपणें राहून वैराग्य धारण करितो.

अवतरणिका–अथैवमाद्यनित्यवस्तुविरक्तस्य नित्यवस्तुरागिणः संसारदुःखविच्छेदहेतौ बुद्धिरुत्पद्यत इत्याह—

श्लोकः–विवेकिनो विरक्तस्य विषयेष्वात्मरागिणः ॥
संसारदुःखविच्छेदहेतौ बुद्धिः प्रवर्तते ॥ १६ ॥

व्याख्यानं—स्पष्टम् ॥ १६ ॥

अर्थ–॥ १६ ॥ जो विचारी आहे व विषयसुखाविषयीं निरिच्छ आहे, आत्मस्वरूपाची आवड करणारा आहे त्या मनुष्याला संसारांतील दुःखाचा नाश व्हावा अशी बुद्धि उत्पन्न होते.

अवतरणिका–अथ कोऽयं संसारदुःखच्छेदहेतुरित्यत्र पिंडपिंडज्ञानस्थलार्थं गर्भीकृत्य वृत्तेनाह—

श्लोकः–नित्यानित्यविवेकिनः सुकृतिनश्शुद्धाशयस्यात्मनो
ब्रह्मोपेंद्रमहेंद्रमुख्यविभवेष्वस्थायितां पश्यतः ॥
नित्यानंदपदे निराकृतजगत्संसारदुःखोदये
सांबे चंद्रशिरोमणौ समुदयेद्भक्तिर्भवध्वंसिनी ॥ १७ ॥

इति श्रीवीरशैवधर्मनिर्णये सिद्धांतशिखामणौ भक्तस्थले पिंडज्ञान संसारहेयस्थलप्रसंगो नाम पंचमपरिच्छेदः समाप्तः ॥

व्याख्यानं—सुकृतिनः निगमागमोक्तसत्कर्मिणः शुद्धाशयस्य निर्मलांतःकरणस्य आत्मनः पिंडशब्दवाच्यस्य नित्यानित्यविवेकिनः क्षेत्रज्ञाक्षेत्रज्ञविवेकिनः पिंड ज्ञानिनः ब्रह्मोपेंद्रमहेंद्रमुख्यसमस्तदेवसंपत्सु अस्थायितां क्षणिकत्वं पश्यतः जानतः अतएव संसारहेयबुद्धिमतः नित्यानंदपदे नित्यपरिपूर्णसच्चिदानंदाश्रये निराकृतजगत्संसारदुःखोदये सांबे उमासमेते चंद्रशिरोमणौ "चंद्रललाटाय कृत्तिवाससे नमो नम इत्यथर्वणश्रुतेः" चंद्रधरादिनानालीलाविग्रहकारणीभूतमहालिंगे भक्तिः अष्टविधा भवध्वंसिनी सती समुदयेत् प्रकाशयतीत्यर्थः अत्र शुद्धांतःकरणस्य नित्यानित्यवस्तुविवेकिनः ऐहिकामुष्मिकफलभोगविरागद्वारा रागद्वेषादिशब्दाद्यंतर्बाह्येंद्रियविषयवैमुख्येन शमदमादिसंपत्त्या मुमुक्षुत्वेन संसारदुःखनिवृत्त्युपायभूते महालिंगे भक्तिरुत्पद्यत इति उक्तं भवति ॥ १७ ॥ इति संसारहेयस्थलम् ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धांतशिखामणिव्याख्यायां भक्तस्थले पिंडज्ञानसंसारहेयस्थलप्रसंगो नाम पंचमपरिच्छेदः समाप्तः ॥ ५ ॥

अर्थ–॥ १७ ॥ जो मनुष्य नित्य काय? आणि अनित्य काय? ह्याचा विचार करितो, जो वेदशास्त्रांत सांगितलेलीं सत्कर्मे करितो ज्याचें मन निष्पाप आहे, ज्याला ब्रह्मदेव, विष्णु, इंद्र वगैरे मुख्य मुख्य देवांचें ऐश्वर्य देखील क्षणभंगुर असल्यामुळें तुच्छ वाटतें त्या मनुष्याला नित्य आनंदमय असणाऱ्या, सर्व जगांतील लोकांच्या संसारदुःखाचा नाश करणाऱ्या, चंद्र मस्तकावर धारण केलेल्या शंकराविषयीं भक्ति उत्पन्न होते. ती भक्ति संसारदुःखाचा नाश करिते.

ह्याप्रमाणें वीरशैवांच्या धर्माचा निर्णय असलेल्या सिद्धान्तशिखामणींतील भक्तस्थलांतील पिंडज्ञान आणि संसारहेयस्थल (संसार सोडून देण्याची बुद्धि होणें) हें वर्णन असलेला हा पांचवा भाग संपूर्ण झाला.

श्रीशिवाय नमः ॥

अथ षष्ठपरिच्छेदप्रारंभः ।

अवतरणिका–"अथ तद्विज्ञानार्थं सद्गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति" मुंडकश्रुतेः पूर्वोक्तपिंडपिंडज्ञानसंसारहेयस्थलसंपन्नः संसारनाशकरमहालिंगं जिज्ञासुः श्रीगुरुमुपैतीति कुंभजं प्रति दीक्षालक्षणगुरुकारुण्यस्थलं निरूपयति श्रीरेणुकः—

श्लोकः–ततो विवेकसंपन्नो विरागी शुद्धमानसः ॥
जिज्ञासुः सर्वसंसारदोषध्वंसकरं शिवम् ॥ १ ॥
उपैति लोकविख्यातं लोभमोहविवर्जितम् ॥
आत्मतत्त्वविचारज्ञं विमुक्तविषयभ्रमम् ॥ २ ॥
शिवसिद्धांततत्त्वज्ञं छिन्नसंदेहविभ्रमम् ॥
सर्वतंत्रप्रयोगज्ञं धार्मिकं सत्यवादिनम् ॥ ३ ॥
कुलक्रमागताचारं कुमार्गाचारवर्जितम् ॥
शिवध्यानपरं शांतं शिवतत्त्वविवेकिनम् ॥ ४ ॥
भस्मोद्धूलननिष्णातं भस्मतत्त्वविवेकिनम् ॥
त्रिपुंड्रधारणोत्कंठं धृतरुद्राक्षमालिकम् ॥ ५ ॥

लिंगधारणसंयुक्तं लिंगपूजापरायणम् ॥
लिंगांगयोगतत्वज्ञं निरूढाद्वैतवासनम् ॥ ६ ॥
लिंगांगस्थलभेदज्ञं श्रीगुरुं शिववादिनम् ॥

अवतरणिका-एवं सद्गुरुमधिगम्य तत्सेवा कर्तव्येत्याह—

सेवेत परमाचार्यं शिष्यो भक्तिभयान्वितः ॥ ७ ॥

व्याख्यानं—अत्र ततः संसारहेयबुद्ध्युत्पत्त्यनंतरं शुद्धमानसः निर्मलांतःकरणत्वेन पिंडशब्दवाच्यः, । विवेकसंपन्नः शरीरात्मविवेकेन पिंडज्ञानवान्, । विरागी, अनित्यसुखवैमुख्येन संसारहेयबुद्धिमान् साधकः, । सर्वसंसारदोषध्वंसकरं, दोषः दुःखमित्यर्थः, सांसारिकसकलदुःखनिवारकं शिवम्, परब्रह्मापरपर्यायपरशिवमहालिंगं, जिज्ञासुः सन्, शिववादिनं महालिंगस्वरूपमुपदेष्टारं, श्रीगुरुमुपैतीति योजना ॥ स कीदृश इत्यत्राह, लोकविख्यात इत्यादिना सर्वलोकप्रसिद्धः, लोभमोहविवर्जितः मोहः अज्ञानमित्यर्थः आत्मतत्वविचारज्ञः देहेंद्रियादिवैलक्षण्येनात्मयाथार्थ्यस्वरूपज्ञः विमुक्तविषयभ्रमः॥ यस्य यस्य पदार्थस्य या या शक्तिरुदीरिता ॥ सा सा सर्वेश्वरी देवी स स सर्वो महेश्वरः॥ इति सर्वमंगलागमस्थितेः॥ शब्दजालमशेषं तु धत्ते शर्वस्य वल्लभा ॥ अर्थजालमशेषं तु धत्ते मुग्धेंदुशेखरः॥ इति वायुसंहितोक्तेश्च सर्वस्यापि विश्वस्य शिवशक्तिमयत्वात् तयोरभेदात् विगलितविषयगतभेदभ्रांतिरित्यर्थः अतएव निरूढाद्वैतवासनः दृढीभूताद्वैतसंस्कारविशिष्टः शिवसिद्धांततत्वज्ञः शिवागमसिद्धांताभिज्ञः छिन्नसंदेहविभ्रमः निराकृतसंशयविपर्ययवानित्यर्थः सर्वतंत्रप्रयोगज्ञः चतुःषष्टितंत्रप्रयोगज्ञः धार्मिकः शिवधर्मनिष्ठः सत्यवादी कुलक्रमगताचारः गुरुवंशक्रमानुगताचारवान् कुमार्गाचारवर्जितः कुलप्राप्तसमयाचारवर्जितः शिवध्यानपरः शिवलिंगचिंतानिष्ठः शांतः रागद्वेषरहितः शिवतत्वविवेकी शिवपरशिवस्वरूपज्ञः भस्मोद्धूलननिष्णातः तत्र कुशलीत्यर्थः भस्मतत्वविवेकी भस्मस्वरूपविवेकवान् त्रिपुंड्रधारणोत्कंठः तत्रोत्सुक इत्यर्थः धृतरुद्राक्षमालिकः लिंगधारणसंयुक्तः बाह्यांतर्लिंगधारणवान् लिंगपूजापरायणः बाह्यांतर्लिंगपूजानिष्ठः लिंगांगयोगतत्वज्ञः शिवजीवसंबंधतत्वज्ञः लिंगांगस्थलभेदज्ञः लिंगांगस्थलगतैकोत्तरशतस्थलभेदज्ञानवानित्यर्थः शिववादी मांगल्यवचनप्रयोक्ता एवंविधसल्लक्षणसंपन्नं श्रीमंतं सद्गुरुस्वामिनं संसारहेयबुद्धिमान् पक्वशिष्यः मुमुक्षुरिति यावत् उपैति उपायनपाणिः सन् अधिगच्छेदित्यर्थः ॥ १।२।३।४।५।६।७ ॥

अर्थ—॥ १ ॥ नंतर शिवभक्तीची आवड उत्पन्न झालेला, निष्पापमनाचा मनुष्य विचार करून करून वैराग्य उत्पन्न झाल्यावर शिवपरब्रह्म महालिंग समजून घेण्यासाठीं सर्व संसारांतील पातकांचा नाश करणाऱ्या शिवयोग्यास (श्रीगुरूला) शरण जातो. ॥ २ ॥ तो शिवयोगी (गुरु) सामान्य नव्हे तो सर्व

लोकांत प्रसिद्ध असा असतो, त्याला मोह आणि लोभ हे नसतात तो नेहमीं आत्मतत्वाचा विचार करीत असतो, त्याची विषयसुखाची भ्रांति दूर झालेली असते. ॥ ३ ॥ शिवसिद्धान्ताचें रहस्य त्यास कळून चुकलेलें असतें, त्याचे सर्व संशय आणि हौस वगैरे पुरलेली असते (त्याची कशांतही आशा गुंतलेली नसते) सर्व तंत्रें आणि त्याचे प्रयोग त्यास माहीत असतात. तो धार्मिक असून सर्वदा खरें बोलतो, ॥ ४ ॥ तो आपल्या वाडवडलांपासून चालत आलेली रीति कधीं सोडीत नाहीं तो वाईट रीतीनें कधींही वागत नाहीं तो नेहमीं शंकराचें ध्यान करण्यांत गुंतलेला असतो, त्याचा स्वभाव फार शांत असतो, तो नेहमीं शिवतत्वाचा विचार करीत असतो. ॥ ५ ॥ तो नेहमीं आपले आंगांस भस्म लावितो, व भस्माच्या रहस्याचा नेहमीं विचार करितो, त्याला त्रिपुंड्र लावण्याची फार आवड असते, व त्यानें गळ्यांत रुद्राक्षाच्या माळा घातलेल्या असतात. ॥ ६ ॥ तो नेहमीं लिंगधारण करितो, तो नेहमीं लिंगपूजा करण्यांत गुंतलेला असतो. लिंग, अंग आणि संबंध ह्याची त्याला माहिती असते त्याची शिवाच्या अद्वैत शास्त्रावर फार आवड असते. ॥ ७ ॥ लिंगांगस्थलांतील एकोत्तर शतस्थलाची त्यास माहिती असते, तो नेहमीं शिवनामाचा जप करीत असतो. त्या श्रेष्ठ आचार्याची गुरूची मन शुद्ध झालेला भक्त भक्तिपूर्वक व त्या गुरूच्या योग्यतेमुळें स्वाभाविकपणाच्या भीतीनें नम्रपणानें सेवा करितो.

श्लोकः-षण्मासान्वत्सरं वापि यावदेष प्रसीदति ॥

व्याख्यानं—आप्तस्थानांगसद्भावैः सेवेदित्यर्थः । शिष्टं स्पष्टं ॥

अवतरणिका-अथ तद्विज्ञापनप्रकारं सूत्रद्वयेन वर्णयति—

श्लोक प्रसंन्नं परमाचार्यं भक्त्या मुक्तिप्रदर्शकम् ॥ ८॥

श्लोकः-प्रार्थयेदग्रतः शिष्यः प्रांजलिर्विनयान्वितः ॥८॥

श्लोक: भो कल्याण महाभाग शिवज्ञानमहोदधे ॥ ९॥

श्लोकः-आचार्यवर्य संप्राप्तं रक्ष मां भवरोगिणम् ॥ ९॥

व्याख्यानं—भक्त्या सेवया प्रसन्नं अनुग्रहोन्मुखं मुक्तिप्रदर्शकम् परापरमोक्षप्रदर्शकम् परमाचार्यं महागुरुं विनयान्वितः भयभक्तिसमन्वितः शिष्यः प्रांजलिः मुकुलितकरः सन् अग्रतः पुरतः प्रार्थयेत् किमित्यत्र भो कल्याण मंगलात्मक महाभाग अतिश्रेष्ठ शिवज्ञानस्य समुद्र आचार्यवर्यगुरूत्तम भवरोगिणं संसारार्तं संप्राप्तं समागतं मां रक्ष पाहीति ॥ ८ ॥ ९ ॥

अर्थ-॥ ८ ॥ ती सेवा गुरु प्रसन्न होईपर्यंत सहा महिने किंवा वर्षभर देखील करावी लागते शिष्याच्या वर्ष सहा महिन्याच्या भक्तीनें गुरु प्रसन्न झाल्यावर त्या तत्वज्ञानाचा मार्ग दाखविणाऱ्या श्रेष्ठ आचार्यास (गुरूस). ॥ ९ ॥ नम्रतापूर्वक दोन्ही हात जोडून शिष्य प्रार्थना करितो कीं, हे गुरुश्रेष्ठा, तूं मोठा भाग्यवान् आहेस, शिवज्ञानाचा महासमुद्र आहेस.

अवतरणिका-एवं प्रार्थितवंतं शिष्यं गुरुरुपदेशांगभूत-दीक्षया योजयेदित्याह—

श्लोकः-इति शुद्धेन शिष्येण प्रार्थितः परमो गुरुः ॥
शक्तिपातं समालोक्य दीक्षया योजयेदमुम् ॥ १०॥

व्याख्यानं—इति एवंप्रकारेण शुद्धेन शुद्धांतःकरणेन शिष्येण प्रार्थितः विज्ञापितः परमो गुरुः महागुरुः तस्येति शेषः शक्तिपातं तीव्रतरशक्तिपातं समालोक्य सम्यगवलोक्य अमुं अग्रतः स्थितं शिष्यं दीक्षया योजयेत् संबंधयेदित्यर्थः ॥ १० ॥

अर्थ-॥ १० ॥ हे श्रेष्ठा गुरुवर्या, मी तुला शरण आलों आहें मला संसाररूप रोग झाला आहे तो बरा करून माझें रक्षण कर. ह्याप्रमाणें निष्पापमनाच्या शिष्यानें विनंति केल्यावर तो श्रेष्ठगुरु हा शिष्य शक्तिपात करण्यास योग्य आहे (अनुग्रह करण्यास योग्य आहे) असें जाणून त्याला दीक्षा देण्याचा विचार करितो.

अवतरणिका-का नाम दीक्षेत्यत्राह—

श्लोकः-दीयते च शिवज्ञानं क्षीयते पाशबंधनम् ॥
यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः ॥ ११॥

व्याख्यानं—यस्मात् दादानइति धातुगत्या शिवज्ञानं परब्रह्मपरशिवाख्यमहालिंगज्ञानं दीयते स्वात्माभेदेन प्रदास्यते पाशबंधनम् मलमायाकर्मबंधनम् क्षिक्षयइतिधातुगत्या क्षीयते अत इयं ज्ञानक्रियात्मिकाशक्तिरेव दीक्षेति विचक्षणैः शास्त्रज्ञैः सम्यगाख्यातेत्यर्थः ॥ ११ ॥

अर्थ-॥ ११ ॥ ज्या दीक्षेमध्यें शिष्याला गुरूकडून शिवज्ञान मिळतें व त्याचें संसाराचें बंधन तुटतें ह्मणून त्या संस्कारास शहाणे लोक दीक्षा असें ह्मणतात.

अवतरणिका-अथेयं दीक्षा त्रिविधेत्याह—

श्लोकः-सा दीक्षा त्रिविधा प्रोक्ता शिवागमविशारदैः ॥
वेधारूपा क्रियारूपा मंत्ररूपा च तापस ॥ १२॥

व्याख्यानं—स्पष्टं ॥ १२ ॥

अर्थ–॥ १२ ॥ अगस्त्यऋषे, शिवागम जाणणाऱ्यांनीं ती दीक्षा तीन प्रकारची मानलेली आहे, ती अशी, १ वेधारूपादीक्षा २ क्रियारूपादीक्षा ३ मंत्ररूपादीक्षा.

अवतरणिका–अथ तद्दीक्षात्रयलक्षणमाह—

श्लोकः–गुरोरालोकमात्रेण हस्तमस्तकयोगतः ॥ १३ ॥
यः शिवत्वसमावेशो वेधादीक्षेति सा मता ॥

व्याख्यानं—श्रीगुरोर्निरीक्षणमात्रेण हस्तमस्तकसंबंधात् यः ज्ञानक्रियात्मकशिवतत्वसमावेशोऽस्ति सा वेधादीक्षेति स्मृतेत्यर्थः गुरोर्दृष्टिगर्भे स्थित्वा करकमले समुत्पन्नस्यात्मनः चिन्मयस्वरूपोपदेशो वेधादीक्षेति तात्पर्यं ॥ १३ ॥

अर्थ–॥ १३ ॥ गुरूनें शिष्याकडे कृपादृष्टीनें पाहणें व त्याच्या मस्तकावर आपला वरद हात ठेवणें ह्यामुळें त्या शिष्याचे आंगीं जो शिवपणा येतो ती वेधादीक्षा होय.

श्लोकः-मांत्री दीक्षेति सा प्रोक्ता मंत्रमात्रोपदेशिनी ॥ १४ ॥

व्याख्यानं—मंत्रमात्रोपदेशिनी सोहमितिप्रणवमंत्रस्वरूपस्य प्राणिनः पंचाक्षरीमंत्रमात्रोपदेशो योऽस्ति सा मननत्राणधर्मिणी मांत्रीदीक्षेति कथितेत्यर्थः ॥ १४ ॥

अर्थ–॥ १४ ॥ ज्या दीक्षेमध्यें फक्त गुरु शिष्याला मंत्राचाच उपदेश करितो ती मांत्रीदीक्षा होय.

कुंडमंडलिकोपेता क्रियादीक्षा क्रियोत्तरा ॥

व्याख्यानं—कलशबंधस्वस्तिकमंडलसंयुक्ता क्रियापरा लिंगधारणक्रियासमेता क्रियादीक्षेत्यर्थः ॥

१५ कुंड, मंडल वगैरे क्रिया करून जी दीक्षा देतात ती क्रिया दीक्षा होय. ह्या दीक्षेनंतर लिंगधारण करावें लागतें ह्मणून तिला क्रियादीक्षा ह्मणतात.

अवतरणिका–अथ तत्प्रकारं पंचभिः श्लोकैः प्रदर्शयति—

श्लोकः–शुभमासे शुभतिथौ शुभकाले शुभेऽहनि ॥ १५ ॥
विभूतिं शिवभक्तेभ्यो दत्वा तांबूलपूर्वकम् ॥
यथाविधि यथायोगं शिष्यमानीय देशिकः ॥ १६ ॥

श्लोकः–स्नातं शुक्लांबरधरं दंतधावनपूर्वकम् ॥
मंडले स्थापयेच्छिष्यं प्राङ्मुखं तमुदङ्मुखः ॥ १७ ॥
शिवस्य नाम कीर्तिं च चिंतामपि च कारयेत् ॥

व्याख्यानं—शुभमासे माघादिशुभमासे शुभतिथौ भद्रादिशुभतिथौ शुभेऽहनि सोमशुक्रादिशुभवासरे शुभकाले अमृतयुक्तशुभमुहूर्ते विध्युक्तप्रकारेण शास्त्रोक्तक्रमेण शिवभक्तेभ्यस्तांबूलपूर्वकम् विभूतिं दत्वा आचार्यः दंतधावनपूर्वकम् स्नातं शुक्लांबरधरं शिष्यं स्वसमीपमाहूय प्राङ्मुखं कृत्वा स्वयमुदङ्मुखः सन् स्वस्तिकमंडले स्थापयेत् अनंतरम् "अपि वा यश्चांडालश्शिवेतिवाचं वदेत्तेन सह संवसेत्तेन सहसंविशेत्तेनसह भुंजीतेति" श्रुतेः सकलप्रायश्चित्तरूपशिवनामकीर्तनम् शिवध्यानं च कारयेदित्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥ अनन्तरम्

अर्थ—चांगल्या महिन्यांत चांगल्या तिथीस, चांगल्या दिंवशीं चांगल्या वेळीं ॥ १६ ॥ शिवभक्तांस अगोदर विडा देऊन नंतर विभूति देऊन विधिपूर्वक योग्यरीतीनें गुरु शिष्यास दीक्षा घ्यावयाच्या ठिकाणीं आणून

अर्थ—॥ १७ ॥ त्यास स्नान करण्यास सांगून स्नान करवितो, त्यास पांढरें वस्त्र नेसण्यास देतो. त्याचे दांत घांसून तोंड स्वच्छ धुणें झाल्यावर त्या शिष्याचें तोंड पूर्वेकडे करून त्याला मंडलावर बसवितो व आपण त्या मंडलावर उत्तरेकडे तोंड करून बसतो. ॥ १८ ॥ व शिवाचें नांव घेण्याचें सांगून त्याचेंच वारंवार चिंतन करावयाचें सांगतो.

श्लोकः—विभूतिपट्टं दत्वाग्रे यथास्थानं यथाविधि ॥ १८ ॥
पंचब्रह्ममयैस्तत्र स्थापितैः कलशोदकैः ॥
आचार्यः समम्रुत्विग्भिस्त्रिःशिष्यमभिषिंचयेत् ॥ १९ ॥

व्याख्यानं—प्रथमं यथाविधि यथास्थानं विभूतिधारणं कृत्वा तत्र तस्मिन्मंडले स्थापितैः पंचब्रह्ममयैः ईशानादिपंचब्रह्मस्वरूपैः कलशोदकैः पंचाक्षरात्मककलशोदकैः ऋत्विग्भिः भुवनप्रसिद्धपंचाचार्यसंप्रदायानुगैः ऋत्विग्भिः समं आचार्यः तत्संप्रदाय एवाचार्यपट्टाभिषिक्तः श्रीगुरुः शिष्यं त्रिरभिषिंचयेत् ॥ १८ ॥ १९ ॥

अर्थ—त्याचे कपाळीं विधीप्रमाणें योग्य ठिकाणीं विभूति लावतो.

अर्थ—॥ १९ ॥ नंतर पांच ब्रह्मस्वरूप ह्मणून तेथें स्थापन केलेल्या कलशांतील पाणी घेऊन गुरु ऋत्विजांकडून शिष्यास तीनवेळ सिंचन करवितो.

अवतरणिका—अथ मांसपिंडं मंत्रपिंडं विधातुं मंत्रोपदेशं कुर्यादित्याह—

श्लोकः—अभिषिच्य गुरुः शिष्यमासीनं परितः शुचिम् ॥
ततः पंचाक्षरीं शैवीं संसारभयतारिणीम् ॥ २० ॥

श्लोकः-तस्य दक्षिणकर्णे तु निगूढमपि कीर्तयेत् ॥
छंदो रूपमृषिं चास्य देवतान्यासपद्धतिम् ॥ २१ ॥

इतिगुरुकारुण्यस्थलम् ।

व्याख्यानं—अभिषिच्य ततः तदनंतरम् गुरुः । शुचिं समीपे स्थितम् शिष्यंप्रति तस्य दक्षिणकर्णे संसारभयतारिणीं शैवीं शिवसंबंधिनीं पंचाक्षरीं नमःशिवाय चेति श्रीरुद्रप्रसिद्धां विद्यां परतत्वप्रकाशिनीम् निगूढं परश्रुतिगोचरीभूतं यथा न भवति तथा कीर्तयेत् उपदिशेदित्यर्थः अस्याः पंचाक्षर्याः रूपं स्वरूपं छंदः ऋषिं मंत्रद्रष्टारम् महर्षिं देवतान्यासपद्धतिं अधिदेवताप्रत्यधिदेवतारूपपंचब्रह्मपंचसादाख्यपर्यायनामवदाचारादिपंचलिंगकरांगन्यासमार्गं न्यासक्रममित्यर्थः कीर्तयेदित्यनुषंगः आज्ञाचक्रस्थितप्रणवमयमहालिंगं करतले स्थापयितुं प्रथममाधारादिपंचचक्रेषु नकारादिबीजमयाचारादिलिंगपंचकं शिवागमोक्तप्रकारेणोपदिशेदिति रहस्यं "इति गुरुकारुण्यस्थलम्" ॥ २० ॥ २१ ॥

अर्थ-॥ २० ॥ शिष्यास ऋत्विजांनीं सिंचन केल्यावर त्या मंडलावर बसलेल्या शुचिर्भूत अशा त्या शिष्यास संसाराच्या भयापासून सोडविणाऱ्या शिवपंचाक्षरी मंत्राचा उपदेश

अर्थ-॥ २१ ॥ त्याचे उजव्या कानांत करितो. तो मंत्र कोणास ऐकूं न जाईल इतका हळू स्वरानें करितो, त्या मंत्राचा ऋषि, छंद स्वरूप त्याची देवता व त्याचा न्यास करण्याचा क्रम वगैरे सर्व सांगतो. येथें गुरुकारुण्य स्थल संपलें.

अथ लिंगधारणस्थलम् ॥

अवतरणिका-अथैतत्सोमस्य सूर्यस्य सर्वलिंगं स्थापयति पाणिमंत्रं पवित्रमिति श्रुत्युक्तप्रकारेण श्रीगुरुविधीयमानलिंगधारणस्थलं निरूपयति पाणौ मननात्त्रायत इति पाणिमंत्र इत्यर्थः—अत्रादौ धारणीयलिंगस्वरूपं निर्दिशति—

श्लोकः-स्फाटिकं शैलजं वापि चंद्रकांतमयं तु वा ॥
बाणं वा सूर्यकांतं वा लिंगमेकं समाहरेत् ॥ १ ॥

व्याख्यानं—शैलजं श्रीशैलादिमहापर्वतशिलासंभवमित्यर्थः शिष्टं स्पष्टं एतेष्वेकं परीक्ष्य गृह्णीयादित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ नंतर गुरु त्या शिष्याकरितां स्फटिकाचें किंवा पर्वतावरील एखाद्या उत्तम दगडाचें किंवा चंद्रकांत मण्याचें, नर्मदानदींत सांपडणाऱ्या बाणाचें किंवा सूर्यकांत मण्याचें एक लिंग आणवितो.

अवतरणिका–अथ तल्लिंगे शिवकलामावाहयेदित्याह—

श्लोकः–सर्वलक्षणसंपन्ने तस्मिंल्लिंगे विशोधिते ॥
पीठस्थितेऽभिषिक्ते च गंधपुष्पादिपूजिते ॥ २ ॥
मंत्रपूते कलां शैवीं योजयेद्विधिना गुरुः ॥

व्याख्यानं—शिल्पशास्त्रोक्तसर्वलक्षणसंपन्ने पंचगव्यैः परिशुद्धे पंचामृताभिषिक्ते सुगंधपुष्पादिना परिपूजिते मूलपंचाक्षरीमंत्रसंस्कृते करपीठस्थिते तस्मिन् लिंगे गुरुः आचार्यः शैवीं कलां शिष्यमस्तकस्थितां शिवकलां विध्युक्तप्रकारेण आवाहयेदित्यर्थः तत्प्रकार इत्थं शिष्यमस्तके सुगंधेन पंचारचक्रं विलिख्य मध्ये प्रणवं पंचदलेषु पंचाक्षराणि विभाव्य "नित्यानंदां निरुपमपदां निष्कलां निर्विशेषां निर्व्याजेनोर्ध्वमायाविरचितवपुषं विश्ववंद्यां परां तां ॥ आधारामादिशक्तिं गुणगणनमितां देवदेवीं शिवाख्यां वंदे हृत्पद्मपीठे परमशिवपदां श्रीमतीमूर्ध्वसंज्ञां" इति सकलजगद्व्यवहारप्रवृत्तिकां चराचरचैतन्यतेजोरूपिणीं शिवकलां ध्यात्वा गंधादिनाभ्यर्च्य प्रदीपाद्दीपांतरमिव क्रोमित्यंकुशमुद्रयाऽऽकृष्यावाह्य तदारं विचिंत्य पुनर्गंधाद्युपचारैः संपूजयेत् इति॥२॥

अर्थ–॥ २ ॥ लिंग कोणत्याही तऱ्हेनें दोष देण्यास योग्य नसून निर्दोष असलें ह्मणजे तें पुन्हा शुद्ध करून सिंहासनावर ठेवून त्यास अभिषेक करितो व त्यास गंध आणि फूल वाहतो. व शिष्याचा प्राण त्या लिंगांत स्थापन करितो.

अवतरणिका–अथ लिंगप्राणसामरस्यं कृत्वा तल्लिंगं शिष्यहस्ते स्थापयेदित्याह—

श्लोकः–शिष्यस्य प्राणमादाय लिंगे तत्र निधापयेत् ॥ ३ ॥
तल्लिंगं तस्य तु प्राणे स्थापयेदेकभावतः ॥
एवं कृत्वा गुरुर्लिंगं शिष्यहस्ते निधापयेत् ॥ ४ ॥

व्याख्यानं—तत्र लिंगे शिवकलाभरितलिंगे शिष्यस्य जीवकलारूपं प्राणं आदाय आकृष्य निधापयेत् प्रतिष्ठापयेत् तल्लिंगं शिवकलापूरितलिंगं तस्य शिष्यस्य प्राणे प्रणवरूपत्वेन जीवकलारूपे प्राणे एकभावतः तादात्म्येन स्थापयेत् नियोजयेदित्यर्थः एवंप्रकारेण गुरुर्लिंगं शिवजीवकलासामरस्यात्मकं कृत्वा शिष्यकरकमले स्थापयेदित्यर्थः ॥ ३ ॥ ४ ॥

अर्थ–॥ ३ ॥ नंतर तें लिंग मंत्रानें पवित्र झालें ह्मणजे गुरु त्या लिंगांत शिवकला शिष्यमस्तकांतील (शिवशक्ति) योग्य रीतीनें स्थापन करितो.

अर्थ–॥ ४ ॥ तें लिंग त्या शिष्याचे प्राणांत दृढ निश्चयानें स्थापन करितो. इतकें करून गुरु शिष्याच्या हातांत लिंग देतो.

अवतरणिका–शिष्यं शिक्षयति—

श्लोकः–प्राणवद्धारणीयं तत्प्राणलिंगमिदं तव ॥
कदाचित्कुत्रचिद्वापि न वियोजय देहतः ॥ ५ ॥

व्याख्यानं—भो शिष्य तदिदं प्राणलिंगं तवं त्वया प्राणवद्धारणीयं जातु क्वापि देहतो न वियोजय शरीराद्वियुक्तं मा कुर्वित्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ हें लिंग तूं प्राणासारखें जपत जा, केव्हांही व कोठेंही तुझ्या शरीराची आणि ह्या लिंगाची तुटातूट होऊं देऊं नकोस. नेहमीं शरीरावर हें लिंग राहूं दे.

अवतरणिका–यदि प्रमादेन शरीराद्विमुक्तं चेत्तदा किं कर्तव्यमित्यत्राह—

श्लोकः–यदि प्रमादात्पतिते लिंगे देहान्महीतले ॥
प्राणान्विमुंच सहसा प्राप्तये मोक्षसंपदः ॥ ६ ॥

व्याख्यानं—स्पष्टं बलात्कारेण प्राणत्यागे दुर्मरणं किं नस्यादित्यत्रोक्तं प्राप्तये मोक्षसंपद इति अन्यथा नरक एवेति भावः ॥ ६ ॥

अर्थ–॥ ६ ॥ एखादे वेळीं हयगयीमुळें तुझ्या शरीरावरून खालीं जमीनीवर लिंग पडेल तर लागलाच जीव दे ह्मणजे तुला मोक्षप्राप्ति होईल.

श्लोकः–इति संबोधितः शिष्यो गुरुणा शास्त्रवेदिना ॥
धारयेच्छांकरं लिंगं शरीरे प्राणयोगतः ॥ ७ ॥

व्याख्यानं—यावत्पर्यंतं शरीरे प्राणस्तिष्ठति तावत्पर्यंतं वीरशैवशास्त्रज्ञेन गुरुणा बोधितः शिष्यः शांकरं लिंगं धारयेदित्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ असा उपदेश दिल्यावर शास्त्र जाणणाऱ्या गुरूच्या आज्ञेप्रमाणें त्या शिष्यानें शंकराच्या शक्तीनें युक्त असणारें तें लिंग आपल्या प्राणासारखें धारण करावें (त्या लिंगास प्राणासारखें जपावें.)

अवतरणिका–अथ किमस्य धारणेन प्रयोजनं कैरंगीकृतमित्यत्राह—

श्लोकः–लिंगस्य धारणं पुण्यं सर्वपापप्रणाशनम् ॥
आदृतं मुनिभिः सर्वैरागमार्थविशारदैः ॥ ८ ॥

व्याख्यानं—वीरशैवागमाभिज्ञैर्मुनिभिः सर्वैरप्यंगीकृतमित्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ लिंगाचें धारण करणें हें पुण्यकारक असून त्यापासून सर्व पातकांचा नाश होतो असें आगमाचा अर्थ जाणणारे सर्व ऋषीश्वर मानतात.

अवतरणिका-अथैवं लिंगधारणं मोक्षकांक्षिभिर्मुनिभिर्द्वि-धांगीकृतमित्यत्राह—

श्लोकः-लिंगधारणमाख्यातं द्विधा सर्वार्थसाधकैः ॥
बाह्यमाभ्यंतरं चेति मुनिभिर्मोक्षकांक्षिभिः ॥ ९ ॥

व्याख्यानं—सर्वार्थसाधकं भोगमोक्षप्रदमित्यर्थः शिष्टं स्पष्टं ॥ ९ ॥

अर्थ-॥ ९ ॥ सर्व प्रकारचे मनोरथ पूर्ण करूं इच्छिणाऱ्या, मोक्षप्राप्तीची इच्छा करणाऱ्या, मुनीश्वरांनीं बाह्य आणि अभ्यंतर असे लिंगधारणाचे दोन प्रकार मानिले आहेत.

अवतरणिका-किमिदमांतरमित्यत्राह—

श्लोकः-चिद्रूपं परमं लिंगं शांकरं सर्वकारणम् ॥
यत्तस्य धारणं चित्ते तदांतरमुदाहृतम् ॥ १० ॥

व्याख्यानं—चिद्रूपं सच्चिदानंदात्मकं परमं अत एव देशकालोत्तीर्णं सर्वकारणं देशकालाकारलक्षणविश्वकारणं शांकरं शिवसंबंधि यल्लिंगमस्ति तस्यमहालिंगस्य चित्ते स्वहृत्कमले यद्धारणं ध्यानरूपेण धारणं तत् आंतरम् अंतर्लिंगधारणमित्युदाहृतमित्यर्थः ॥ १० ॥

अर्थ-॥ १० ॥ चित्स्वरूप हें शंकराचें श्रेष्ठ लिंग असून सर्व जगाला कारण आहे तें चित्स्वरूपलिंग जो मनामध्यें धारण करितो तें आभ्यंतर लिंगधारण होय.

अवतरणिका-अथैतत्स्वरूपं बहुधा प्रकाशयति—

श्लोकः- चिद्रूपं हि परं तत्वं शिवाख्यं विश्वकारणम् ॥
निरस्तविश्वकालुष्यं निष्कलं निर्विकल्पकम् ॥ ११ ॥

श्लोकः-सत्तानंदपरिस्फूर्तिसमुल्लासकलामयम् ॥
अप्रमेयमनिर्देश्यं मुमुक्षुभिरुपासितम् ॥ १२ ॥
परं ब्रह्म महालिंगं प्रपंचातीतमव्ययम् ॥

व्याख्यानं—जडविलक्षणत्वाच्चिद्रूपं जीवविलक्षणत्वात्परं अत एव चराचरप्रपंचकारणं निरस्तसमस्तदोषं निरवयवं भेदरहितम् नित्यानंदप्रकाशात्मकत्वेन व्याप्रियमाणतुर्यातीतसप्तदशकलास्वरूपं प्रत्यक्षादिप्रमाणागम्यं वक्तुमशक्यं मोक्षकांक्षिभिर्भजनीयं विश्वातीतं कालत्रयाबाध्यं शिवाख्यं परब्रह्ममहालिंगं हि महालिंगमिति प्रसिद्धमित्यर्थः ॥ ११ ॥ १२ ॥

अर्थ-॥ ११ ॥ चिद्रूप हें श्रेष्ठ तत्व आहे, त्याला शिव ह्मणतात, तें सर्व

जगाला कारण आहे, विश्वांतील (जगांतील) अनेक प्रकारच्या पातकांचा तें नाश करितें, तें निष्कल (कलाहीन) असून त्यास विकल्प नाहीं.

अर्थ-॥ १२ ॥ अक्षय आनंदमय असून प्रकाशमय असल्यामुळें ज्याचा प्रकाश जिकडे तिकडे व्यापलेला आहे, अतएव तुर्य पदार्थाच्या पलीकडे असणाऱ्या ज्या सप्तदशकला (सतरा कला) त्या कलांनीं व्याप्त आहे, असें ब्रह्मरूपाचें वर्णन करतात. त्याचें प्रमाण करतां येत नाहीं, तें अमुक प्रकारचें आहे ह्मणून दाखवितां येत नांहीं. मुक्ति प्राप्त व्हावी ह्मणून इच्छा करणारे लोक त्या चित्स्वरूपाची उपासना करितात.

अवतरणिका-नन्वेतादृशस्य महालिंगस्य स्थानध्यानशून्यत्वात्कथमुपासनीयं स्यादित्यत्राह—

श्लोकः-तदेव सर्वभूतानामंतस्त्रिस्थानगोचरम् ॥ १३ ॥

श्लोकः-मूलाधारे च हृदये भ्रूमध्ये सर्वदेहिनाम् ॥

ज्योतिर्लिंगं सदा भाति यद्ब्रह्मेत्याहुरागमाः ॥ १४ ॥

व्याख्यानं—तदेव पूर्वोक्तमहालिंगमेव समस्तप्राणिनामंतः त्रिस्थानगोचरं स्थानत्रयवदित्यर्थः यत् शिवागमप्रसिद्धमहालिंगतत्त्वं आगमाः उपनिषदः ब्रह्मेत्याहुः तज्ज्योतिर्लिंगं सर्वदेहिनां समस्तप्राणिनां पूर्वहृदये मूलाधारे मध्यहृदये हृदये ऊर्ध्वहृदये भ्रूमध्ये सदा भाति गुरूपदेशाद्विज्ञेयमित्यर्थः ॥ १३ ॥ १४ ॥

अर्थ-॥ १३ ॥ तें लिंग ब्रह्मस्वरूप असून तें श्रेष्ठ आहे, तें प्रपंचातीत (निष्प्रपंच) आहे, त्यास नाश नाहीं.

अर्थ-॥ १४ ॥ हेंच लिंग सर्व प्राणिमात्रांच्या मनांत स्थूल, सूक्ष्म व कारण ह्या शरीरांत परिपूर्णपणानें भरलेलें आहे. तें महालिंग सर्व प्राणिमात्राच्या पूर्ण हृदयांत, मध्य हृदयांत, भोंवयांच्या मध्यभागीं नेहमीं राहतें त्याला सर्व आगम ब्रह्म असें ह्मणतात.

अवतरणिका-नन्वखंडितस्य महालिंगस्य खंडितत्वं कथमित्यत्राह—

श्लोकः-अपरिच्छिन्नमव्यक्तं लिंगं ब्रह्म सनातनम् ॥

उपासनार्थमंतस्थं परिच्छिन्नं स्वमायया ॥ १५ ॥

व्याख्यानं—अखंडितमप्रकटं नित्यं ब्रह्मशब्दाभिधेयं अंतस्थलिंगं एकमपि उपासनार्थं भक्तानां ध्यानपूजार्थं स्वमायया स्वस्वातंत्र्यापरपर्यायमायाशक्त्या परिच्छिन्नं स्थानभेदेन लिंगत्रयरूपं जातमित्यर्थः ॥ १५ ॥

अर्थ—॥ १५ ॥ लिंग हें परिपूर्ण आहे, त्याचे भाग होत नाहींत, तें उघड रीतीनें दिसत नाहीं, तें सनातन आहे तरी भक्त लोकांस उपासना करितां यावी ह्मासाठीं तें लिंग आपल्या मायेच्या सामर्थ्यानेंच इष्ट, प्राण आणि भाव असें तीन रूपांचें झालें आहे.

अवतरणिका—ननु परब्रह्मलिंगरूपमिति कथं व्यवह्रियत इत्यत्राह—

श्लोकः—लयं गच्छति यत्रैव जगदेतच्चराचरम् ॥
पुनः पुनः समुत्पत्तिं तल्लिंगं ब्रह्म शाश्वतम् ॥ १६ ॥

व्याख्यानं—यत्र ब्रह्मणि एतच्चराचरं जगत् लयं गच्छति पुनःपुनरुत्पत्तिं गच्छतीति तच्छाश्वतं ब्रह्मलिंगमित्यर्थः ॥ १६ ॥

अर्थ—॥ १६ ॥ हें सर्व स्थावर जंगम विश्व ज्यांत लय पावतें व पुन्हा पुन्हा जन्मास येतें (उदय पावतें) तें हें लिंग ब्रह्मस्वरूप असून शाश्वत आहे.

अवतरणिका—उक्तार्थं निगमयति—

श्लोकः—तस्माल्लिंगमिति ख्यातं सत्तानंदचिदात्मकम् ॥
बृहत्वाद्बृंहणत्वाच्च ब्रह्मशब्दाभिधेयकम् ॥ १७ ॥

व्याख्यानं—तस्मात् सच्चिदानंदात्मकं लिंगं महालिंगं बृहत्वात् महत्वात् बृंहणत्वात् विश्वसृष्ट्युन्मुखत्वाच्च ब्रह्मशब्दाभिधेयकमिति ख्यातं प्रख्यातमित्यर्थः एवं परब्रह्मैव महालिंगं महालिंगमेव परब्रह्मेति भावः ॥ १७ ॥

अर्थ—॥ १७ ॥ ह्मणूनच ह्माला लिंग ह्मणतात. तें लिंग सत्तास्वरूप, आनंदस्वरूप आणि चित्स्वरूप आहे. त्यांत मोठेपणा व सृष्टि उत्पन्न करण्याची शक्ति असल्यामुळें त्यास ब्रह्म ह्मणतात.

अवतरणिका—अथोक्तस्थानेष्वेकत्र ज्योतिर्लिंगानुसंधानमांतरलिंगधारणमित्याह—

श्लोकः—आधारे हृदये वापि भ्रूमध्ये वा निरंतरम् ॥
ज्योतिर्लिंगानुसंधानमांतरं लिंगधारणम् ॥ १८ ॥

व्याख्यानं—स्पष्टं ॥ १८ ॥

अर्थ—॥ १८ ॥ आधाराच्या ठिकाणीं, हृदयाचे ठिकाणीं, किंवा दोन्ही भोंवयांचे मध्यभागीं तेजःपुंज लिंगाचें ध्यान करणें हें अभ्यंतरलिंगधारण होय.

अवतरणिका–अथ केनप्रकारेणानुसंधेयमित्यत्राह—

श्लोकः–आधारे कनकप्रख्यं हृदये विद्रुमप्रभम् ॥
भ्रूमध्ये स्फटिकच्छायं लिंगं योगी विभावयेत् ॥ १९ ॥

व्याख्यानं—स्पष्टं ॥ १९ ॥

अर्थ–॥ १९ ॥ आधारस्थलांत शिवयोग्यानें सुवर्णासारखें लिंग मानून त्याचें ध्यान करावें. हृदयांत पोंवळ्यासारखें लिंग आहे असें मानून त्याचें ध्यान करावें, दोन्ही भोंवयांच्या मध्यें स्फटिकासारखें स्वच्छ लिंग आहे असें मानून त्याचें ध्यान करावें.

अवतरणिका–अथेदमंतर्लिंगधारणं बाह्यलिंगधारणापेक्षया विशिष्टमित्याह—

श्लोकः–निरुपाधिकमाख्यातं लिंगस्यांतरधारणम् ॥
विशिष्टं कोटिगुणितं बाह्यलिंगस्य धारणात् ॥ २० ॥

व्याख्यानं—इति स्पष्टं ॥ २० ॥

अर्थ–॥ २० ॥ आभ्यंतर लिंग धारण करणें ह्याला निरुपाधिक (उपाधिरहित) लिंगधारण असें ह्मटलें आहे. हें आभ्यंतर लिंगधारण बाह्य लिंगधारणापेक्षां कोटिपटीनें ज्यास्त श्रेयस्कर आहे.

श्लोकः–ये धारयंतिहृदये लिंगं चिद्रूपमैश्वरम् ॥
न तेषां पुनरावृत्तिर्घोरसंसारमंडले ॥ २१ ॥

व्याख्यानं—परमुक्तिरेवेत्यर्थः ॥ २१ ॥

अर्थ–॥ २१ ॥ जे पुरुष चित्स्वरूप शंकराचें लिंग हृदयांत धारण करितात त्यांस ह्या भयंकर संसारचक्रांत पुन्हा जन्म घ्यावा लागत नाहीं.

अवतरणिका–तत्कथमित्यत्राह—

श्लोकः–अंतर्लिंगानुसंधानमात्मविद्यापरिश्रमः ॥
गुरूपासनशक्तिश्च कारणं मोक्षसंपदाम् ॥ २२ ॥

व्याख्यानं—"आत्मलाभान्न परं विद्यत इति" श्रुतेः नाहमीश्वर इत्यज्ञाननिवारकीभूतात्मविद्यानैशित्यगुरुभजनसामर्थ्ययोरप्यंतर्लिंगानुसंधानं मोक्षसंपत्कारणमित्यर्थः ॥ २२ ॥

अर्थ–॥ २२ ॥ आभ्यंतर लिंगधारण करणें, आत्मविद्येचा परिश्रम करणें, गुरूची सेवा करण्यांत आपली सर्व शक्ति खर्च करणें ह्या तीन गोष्टी मोक्षरूपसंपत्ति प्राप्त होण्यास कारण आहेत. (ह्या तीन गोष्टींमुळें मोक्षप्राप्ति होते.)

अवतरणिका–तस्मादचंचलहृदयानां शिवयोगिनां अंतर्लिंगानुसंधानमेव रुचिर्न बाह्य इत्याह—

श्लोकः–वैराग्यज्ञानयुक्तानां योगिनां स्थिरचेतसाम् ॥
अंतर्लिंगानुसंधाने रुचिर्बाह्ये न जायते ॥ २३ ॥

व्याख्यानं—स्पष्टं ॥ २३ ॥

अर्थ–॥ २३ ॥ जे लोक स्वतः वैराग्यवान् असून ज्यांस तत्वज्ञान झालें आहे, ज्यांचें मन स्थिर आहे, त्यांची बुद्धि अभ्यंतर लिंगाचें ध्यान करण्याकडे लागते, बाह्यलिंगाकडे लागत नाहीं.

अवतरणिका–किमुत परिपक्वब्रह्मादयोऽपि सुज्ञानयोगेनैव ज्योतिर्लिंगं पश्यंतीत्याह—

श्लोकः–ब्रह्मा विष्णुश्च रुद्रश्च वासवाद्याश्च लोकपाः ॥
मुनयः सिद्धगंधर्वा दानवा मानवास्तथा ॥ २४ ॥

श्लोकः–सर्वे च ज्ञानयोगेन सर्वकारणकारणम् ॥
पश्यंति हृदये लिंगं परमानंदलक्षणम् ॥ २५ ॥

व्याख्यानं—अत्र "ब्रह्मविष्णुरुद्रेंद्रास्ते संप्रसूयंतइति" श्रुतेः कार्यकोटिप्रविष्टरुद्रो विवक्षितः न तु त्रिमूर्तिकारणीभूतमहालिंगरुद्र इत्यनुसंधेयम् ॥ २४ ॥ २५ ॥

अर्थ–॥ २४ ॥ ब्रह्मदेव, विष्णु, रुद्र, इंद्र वगैरे लोकपाळ सर्व मुनि, सिद्ध, गंधर्व, दानव, मानव तसेच.

अर्थ–॥ २५ ॥ सर्व प्राणी ज्ञानाच्या साधनानें सर्व कारणांस कारण असणारें परमानंद ज्याचें लक्षण आहे असें लिंग आपल्या हृदयांत ध्यान करितात (पाहतात).

अवतरणिका–तस्मात्सांसारिकदुःखनिवृत्त्यर्थमंतर्लिंगानुसंधानमेव कुर्यादित्याह—

श्लोकः-तस्मात्सर्वप्रयत्नेन शांकरं लिंगमुत्तमम् ॥
अंतर्विभावयेद्विद्वानशेषक्लेशमुक्तये ॥ २६ ॥

व्याख्यानं—स्पष्टं ॥ २६ ॥

अर्थ–॥ २६ ॥ ह्यासाठीं हरएक प्रकारानें शंकराचें तें उत्तम लिंग सर्व प्रकारचे कष्ट दूर होण्यासाठीं विद्वान् मनुष्यानें हृदयांत आठवावें (ध्यान करावें).

अवतरणिका-नन्वेवं चेत् बाह्यलिंगधारणं किमर्थमित्याकांक्षायामाह—

श्लोकः-अंतर्धारयितुं लिंगमशक्तश्शक्त एव वा ॥
बाह्यं च धारयेल्लिंगं तद्रूपमिति निश्चयात् ॥ २७ ॥

व्याख्यानं—अंतर्लिंगधारणे यद्यशक्तः शक्त एव वा, स्फटिकशिलादिनिर्मितबाह्यलिंगं तद्रूपमिति हृदयकमलाश्रितचिन्मयमहालिंगस्वरूपवदिति निश्चयात् संदेहराहित्येन धारयेत्, "बिंदुस्वरूपामलमूलपीठं नादस्वरूपं स्फुरदूर्ध्वपीठं, कलात्मतिर्यग्गतगोमुखाढ्यं चिद्रूपलिंगं हृदयाब्जसंस्थमिति" शिवालोकवचनात् तद्रूपबाह्यलिंगमंतर्लिंगस्मरणार्थं, वीरशैवो धारयेदित्यर्थः ॥ २७ ॥

अर्थ-॥ २७ ॥ मनांत लिंगधारण करण्यास जो कोणी असमर्थ असेल किंवा समर्थ असूनही तसें करण्यास कांहीं अडचण असेल तर त्यानें बाह्यलिंगधारण करावें तें आभ्यंतर लिंगाचेंच स्वरूप आहे असें पक्कें ओळखावें.

अवतरणिका-अथ महालिंगभेदं निरूपयति—

श्लोकः-लिंगं तु त्रिविधं प्रोक्तं स्थूलं सूक्ष्मं परात्परम् ॥
इष्टलिंगमिदं स्थूलं यद्बाह्ये धारयेत्तनौ ॥ २८ ॥

व्याख्यानं—लिंगं तु महालिंगमित्यर्थः, तत् स्थूलं सूक्ष्मं परात्परमिति त्रिविधं तत्र यद्बाह्ये तनौ धार्यते तदिदमिष्टलिंगं स्थूलं यत् यल्लिंगं अंतः हृदयकमले, भावनामयं सन्मात्रभावनारूपं, तत् प्राणलिंगं सूक्ष्मं, यत् यल्लिंगं परात्परमिति प्रोक्तं, तत् तृप्तिलिंगमित्युच्यत इत्यर्थः ॥ २८ ॥

अर्थ-॥ २८ ॥ महालिंगाचे तीन भेद आहेत, ते असे-स्थूल, सूक्ष्म आणि परात्पर हे होत. स्थूल लिंगास इष्टलिंग ह्मणतात तें लिंग बाह्य शरीरावर (आंगावर) धारण करावें लागतें.

अवतर०-नन्विदं स्थूललिंगं किमर्थं धारणीयमित्यत्राह—

श्लोकः-भावनातीतमव्यक्तं परब्रह्मशिवाभिधम् ॥
इष्टलिंगमिदं साक्षादनिष्टपरिहारतः ॥
धारयेदवधानेन शरीरे सर्वदा बुधः ॥ २९ ॥

व्याख्यानं—अव्यक्तं रूपाद्यभावाद्बाह्येंद्रियगोचरं, समलमानसवृत्त्यगम्यत्वात् भावनातीतं, शिवाभिधं, परब्रह्म, निगमागमप्रसिद्धशिवाख्यपरब्रह्मैव, अनिष्टपरिहारतः संसारपाशलक्षणानिष्टपरिहारतः, इष्टरूपपरात्परमुक्तिप्रदानतः, साक्षात् प्रत्यक्षीभूतेष्टलिंगं, इदं, "इष्टमूर्जं तपसानुयच्छत" इत्यथर्वशिरःसिद्धं लिंगं, बुधः निगमागमनिपुणः, शरीरे सावधानेन सदा धारयेदित्यर्थः ॥ २९ ॥

अर्थ—॥ २९ ॥ इष्टलिंग भक्ति करण्यास योग्य असून त्याची जितकी भक्ति करावी तितकी थोडीच आहे, ते स्पष्ट दिसत (समजत) नाहीं, त्याला श्रेष्ठ शंकर असें नांव आहे. ह्यापासून (इष्टलिंग धारण केल्यापासून) सर्व संकटें दूर होतात, ह्यासाठीं ज्ञानी मनुष्यानें नेहमीं इष्टलिंग आपल्या शरीरावर धारण करावें.

अव०—अथेदमिष्टलिंगं शरीरे कुत्र धारणीयमित्यत्राह—

श्लोकः—मूर्ध्नि वा कंठदेशे वा कक्षे वक्षःस्थलेऽपि वा ॥
कुक्षौ हस्तस्थले वापि धारयेल्लिंगमैश्वरम् ॥ ३० ॥

व्याख्यानं—स्पष्टं ॥ ३० ॥

अर्थ—॥ ३० ॥ शंकराची शक्ति असणारें तें इष्टलिंग डोकीवर किंवा गळ्यांत किंवा काखेंत किंवा उरावर किंवा कमरेस किंवा हातास तरी बांधावें. लिंग धारण केल्यावांचून राहूं नये.

अवतरणिका—अथ निषेधस्थानमाह—

श्लोकः—नाभेरधस्ताल्लिंगस्य धारणं पापकारणम् ॥
जटाग्रे त्रिकभागे च मलस्थाने न धारयेत् ॥ ३१ ॥

व्याख्यानं—त्रिकभागः पृष्ठभाग इत्यर्थः शिष्टं स्पष्टं ॥ ३१ ॥

अर्थ—॥ ३१ ॥ बेंबीच्या खालीं लिंग धारण केल्यास (बांधल्यास) पाप लागतें. तसेंच जटांच्या शेंड्यास (केशांच्या टोंकास), पाठीस किंवा मलमूत्र विसर्जन करण्याच्या इंद्रियांस लिंग बांधूं नये.

अवतरणिका—अथेदं लिंगं कुत्र पूजनीयमित्यत्राह—

श्लोकः—लिंगधारी सदा शुद्धो निजलिंगं मनोरमम् ॥
अर्चयेद्गंधपुष्पाद्यैः करपीठे समाहितः ॥ ३२ ॥

व्याख्यानं—स्पष्टं ॥ ३२ ॥

अर्थ—॥ ३२ ॥ लिंग धारण करणारा मनुष्य नेहमीं पवित्र असतो. त्यानें आपलें मनोहर लिंग जीवापेक्षां ज्यास्त जपावें व आपल्या हस्तरूपी सिंहासनावर गंध, फुलें वाहून त्याची पूजा करावी.

श्लोकः—बाह्यपीठार्चनादेतत्करपीठार्चनं वरम् ॥
सर्वेषां वीरशैवानां मुमुक्षूणां निरंतरम् ॥ ३३ ॥

व्याख्यानं—स्पष्टं ॥ ३३ ॥

अर्थ-॥ ३३ ॥ दुसरें इतर धातूंचें सिंहासन करण्यापेक्षां हें हाताचें सिंहासन फार चांगलें आहे, सर्व वीरशैव लोक आणि मोक्षप्राप्तीची इच्छा करणारे मुमुक्षु लोक आपल्या हस्तरूप सिंहासनावरच इष्टलिंगाची पूजा करितात.

अवतरणिका-अथेदं लिंगधारणं कैरंगीकृतमित्यत्राह—

श्लोकः-ब्रह्मविष्ण्वादयो देवा मुनयो गौतमादयः ॥
धारयंति सदा लिंगमुत्तमांगे विशेषतः ॥ ३४ ॥
लक्ष्म्यादिशक्तयः सर्वाः शिवभक्तिविभाविताः ॥
धारयंत्यलिकाग्रेषु शिवलिंगमहर्निशम् ॥ ३५ ॥

व्याख्यानं—अनेन स्त्रीपुरुषयोरपि लिंगधारणमुक्तं भवति ॥ ३४ ॥ ३५ ॥

अर्थ-॥ ३४ ॥ ब्रह्मदेव, विष्णु वगैरे देव, गौतमादिक मुनीश्वर नेह्मीं बहुत करून आपल्या मस्तकावर इष्टलिंग धारण करितात.

अर्थ-॥ ३५ ॥ लक्ष्मी वगैरे सर्व शक्ति शिवभक्तीची फार आवड असल्यामुळें नेह्मीं आपल्या डोकीवर लिंगधारण करितात.

अवतरणिका-अथेदं लिंगधारणं कुत्रोक्तमित्यत्राह—

श्लोकः-वेदशास्त्रपुराणेषु कामिकाद्यागमेषु च ॥
लिंगधारणमाख्यातं वीरशैवस्य निश्चयात् ॥ ३६ ॥

अर्थ-॥ ३६ ॥ वेद शास्त्र पुराण व कामिकागम वगैरे आगमांत वीरशैवांनीं लिंगधारण अवश्य केलें पाहिजे ह्मणून सांगितलें आहे.

अवतरणिका-अथ श्रुतौ कुत्र प्रसिद्धमित्यत्राह—

श्लोकः-ऋगित्याह पवित्रं ते विततं ब्रह्मणस्पते ॥
तस्मात्पवित्रं तल्लिंगं धार्यं शैवमनामयम् ॥ ३७ ॥

व्याख्यानं—"पवित्रं ते विततं ब्रह्मणस्पते इति" ऋग्वेद आह भो ब्रह्मणस्पते ते तव लिंगमिति शेषः, विततं शिवादिभूम्यंतं विस्तृतं पवित्रं पावनं, तस्मात् अनामयं दोषरहितं, शैवं तल्लिंगं धारयेदित्यर्थः ॥ ३७ ॥

अर्थ-॥ ३७ ॥ ऋग्वेद ह्मणतो, हे ब्राह्मणश्रेष्ठा, तुझें लिंगधारण करणें पवित्र असल्याबद्दल सर्वत्र प्रसिद्धि आहे. ह्यासाठीं तें आरोग्यकारक शिवलिंग अवश्य धारण करावें. तें पवित्र आहे.

अवतरणिका—ननु किमस्य धारणेनेत्याह—

श्लोकः—ब्रह्मेति लिंगमाख्यातं ब्रह्मणः पतिरीश्वरः ॥
पवित्रं तद्धि विख्यातं तत्संपर्कात्तनुः शुचिः ॥ ३८ ॥

व्याख्यानं—तत्पवित्रमिति तत्संपर्कात्, तनुः शरीरं, पवित्रं भवतीत्यर्थः ॥ ३८ ॥

अर्थ—॥ ३८ ॥ ब्रह्म ह्मणजे लिंग होय. ब्रह्माचा ह्मणजे लिंगाचा पति ईश्वर आहे, ह्यामुळें त्या लिंगाची प्रसिद्धि असून तें पवित्र आहे, तें शिवलिंग धारण केल्यानें मनुष्याचें शरीर पवित्र होतें.

अवत०—अथैतादृशं लिंगं दीक्षया रहितो न धारयेदित्याह—

श्लोकः—अतप्ततनुरज्ञो वै आमः संस्कारवर्जितः ॥
दीक्षया रहितः साक्षान्नाप्नुयाल्लिंगमुत्तमम् ॥ ३९ ॥

व्याख्यानं—अतप्ततनुः तपोरहितदेहः, आमः अपरिपक्वः, अवैराग्यशील इत्यर्थः, संस्कारवर्जितः शिवसंस्काररहितः, अज्ञः नित्यानित्यवस्तुविवेकशून्यः, दीक्षया रहितः गुरुकारुण्यरहितः, साक्षात् प्रत्यक्षं, उत्तमं श्रेष्ठलिंगं, नाप्नुयात् न धारयेत्, अस्मिन्नर्थे "अतप्ततनूर्न तदामो अश्नुत इति" श्रुतिः तत् आम इति विच्छेदः, तत् तल्लिंगमित्यर्थः, अनेन सुप्रसन्नेन गुरुणा, दत्तलिंगमेव, भोगमोक्षप्रदं स्वेच्छया धृतं, विफलमिति सूचितम् ॥ ३९ ॥

अर्थ—॥ ३९ ॥ ज्यानें तपश्चरण केलें नाहीं, जो अज्ञान आहे ज्यास पुरतें वैराग्य झालें नाहीं, ज्याला शिवमंत्राचा संस्कार झाला नाहीं, ज्यानें दीक्षा घेतलेली नाहीं, त्यानें इष्टलिंग कधींही धारण करूं नये.

अवतरणिका—अथ लिंगधारणे याजुषी श्रुतिरप्यस्तीत्याह—

श्लोकः—अघोरापापकाशीति याते रुद्र शिवा तनूः ॥
यजुषा गीयते यस्मात्तस्माच्छैवोऽघवर्जितः ॥ ४० ॥

व्याख्यानं—"या ते रुद्र शिवा तनूरघोरा पापकाशिनीति" श्रीरुद्रश्रुतिः अस्या श्रुतेरयमर्थः भो रुद्र, ते तव, शिवा मंगलस्वरूपा, या तनूः, "लिंगं तु शिवयोर्देह' इत्यागमोक्तेः शिवशक्त्या, लिंगमूर्तिः सा अघोरा, शांता, अपापकाशी, अपापेषु भक्तेषु काशत इति अपापकाशी, इष्टलिंगरूपेण तत्र स्थिता, इति यजुषा यजुर्वेदेन, यस्माद्गीयते, तस्मात् शैवः शिवलिंगसंबंधी, अघवर्जितः पापरहित इत्यर्थः ॥ ४० ॥

अर्थ—॥ ४० ॥ यजुर्वेदांत असें ह्मटलें आहे कीं, हे शंकरा, तुझें शरीर भयंकर नाहीं, निष्पाप स्वभावांच्या भक्तांच्या मनांत तें सदोदित शोभतें, तें तुझें

शरीर मंगलकारक आहे तेंच लिंग होय, तें लिंग ज्या अर्थीं वीरशैव आणि शैव धारण करितो त्या अर्थीं तो निष्पाप आहे. त्याला पातक मुळींच लागत नाहीं.

अवतरणिका-अथ लिंगधारणस्थलं समाप्य तत्संपन्नस्य भस्मधारणस्थलं सूचयति—

वृत्तंः-यो लिंगधारी नियतांतरात्मा नित्यं शिवाराधनबद्धचित्तः ॥

स धारयेत्सर्वमलापहत्यै भस्मामलं चारु यथाप्रयोगम् ॥४१॥

इति श्रीवीरशैवधर्मनिर्णये सिद्धांतशिखामणौ भक्तस्थले गुरुकारुण्यलिंगधारणप्रसंगो नाम षष्ठपरिच्छेदः समाप्तः

व्याख्यानं—यः पुरुषः लिंगधारी लिंगधारणसंपन्नः, नियतांतरात्मा निर्मलांतःकरणः, नित्यं शिवपूजाबद्धचित्तः सः शिवलिंगधारकः सर्वमलापहत्यै, सर्वदोषनिवृत्त्यै, चारु मनोहरं, अमलं निर्मलं, भस्म यथाप्रयोगं शास्त्रोक्तप्रकारेण धारयेदित्यर्थः ॥ ४१ ॥

श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां भक्तस्थले गुरुकारुण्यलिंगधारणप्रसंगोनाम षष्ठपरिच्छेदः समाप्तः

अर्थ–॥ ४१ ॥ जो मनुष्य इष्टलिंग धारण करितो, ज्यानें आपलीं इंद्रियें वश केलीं आहेत, जो नेहमीं आपलें लक्ष्य शिवपूजेकडे लावितो, त्यानें सर्व पातकांचा नाश व्हावयासाठीं भस्म लावण्याचा जसा विधि शास्त्रांत सांगितला आहे त्या विधीनें भस्म लावावें. भस्म हें चांगलें आणि पातक नाश करणारें आहे.

ह्याप्रमाणें वीरशैवधर्माचा निर्णय असलेल्या सिद्धान्तशिखामणिग्रंथांतील भक्तस्थलांतील गुरुकृपेनें लिंगधारण करण्याचा विधि सांगितला असलेला हा सहावा भाग संपला.

श्रीशिवाय नमः ॥

अथ सप्तमपरिच्छेदः प्रारभ्यते ।

विभूतिस्थलम् ।

अवतरणिका–अथ भूत्यै न प्रमुदितव्यमिति श्रुतिप्रसिद्धभस्मधारणस्थलं निरूपयति श्रीरेणुकः अत्रादौ निरुपाधिकभस्मधारणं सूत्रद्वयेन निरूपयति—

श्लोकः–भस्मधारणसंयुक्तः पवित्रो नियताशयः ॥
शिवाभिधानं यत्प्रोक्तं भासनाद्भसितं तथा ॥ १ ॥
महाभस्मेति संचित्य महादेवं प्रभामयम् ॥
वर्तते ये महाभागा मुख्यास्ते भस्मधारिणः ॥ २ ॥

व्याख्यानं—भस्मधारणसंयुक्तः शिवलिंगधारकः नियताशयः, भस्मध्यानात्संधानं भवति, भस्मध्यानात्पंचाक्षरीस्मरणं भवति, तस्मात् ध्यानात् स्थाणुत्वं च गच्छति "सएष भस्मज्योतिस्सएष भस्मज्योतिरिति' भस्मजाबालश्रुतेः भस्मज्योतिर्लिंगमयमिति नियमितचित्तः सन् पवित्रः शुद्धः यद्भस्मज्योतिर्लिंगं शिवाभिधानं परशिवपरब्रह्माभिधानं सत् प्रोक्तमिति प्रभामयं ज्योतिर्लिंगस्वरूपं तं महादेवं भासनात् प्रकाशनात् भसितं भसितमिति तथा महाभस्मेति संचित्य महाभागाः श्रेष्ठाः ये केचिल्लिंगधारका वर्तते ते मुख्याः मुख्यभस्मधारिणः निरुपाधिकभस्मधारिण इत्यर्थः ॥ १ ॥ २ ॥

॥ श्री सांबसदाशिवास नमस्कार असो. ॥ विभूतिस्थल—

अर्थ–॥ १ ॥ जो मनुष्य भस्म धारण करितो जो पवित्र असतो, ज्याचे इंद्रियगण नेहमीं त्याचे ताब्यांत असतात भस्माला शिव ह्मणतात. भस्म सुशोभित दिसतें ह्या त्याचे गुणावरून त्यास भसित ह्मणतात.

अर्थ–॥ २ ॥ शंकराचें सर्व आंग भस्मानें लेपन केलेलें असतें त्यामुळें तो महादेव तेजःपुंज दिसतो त्याचें स्मरण करून जे दैवशाली भस्म लावितात ते मुख्य आणि धन्य होत.

अवतरणिका–अथ सोपाधिकभस्मस्वरूपं निरूपयति—

श्लोकः–शिवाग्यादिसमुत्पन्नं मंत्रन्यासादियोगतः ॥
तदुपाधिकमित्याहुर्भस्मतंत्रविशारदाः ॥ ३ ॥

व्याख्यानं—यद्भस्म मंत्रन्यासादियोगतः पंचब्रह्ममंत्रन्यासादिसंबंधात् शिवाग्न्यादिसमुत्पन्नं शिवमंत्रसंस्कृताग्निसमुत्पन्नं भवति तत् तद्भस्म तंत्रविशारदाः शिवागमप्रवीणाः उपाधिकं भस्म सोपाधिकं भस्मेत्याहुरित्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ तंत्रवेत्ते (शिवागम चांगल्या तऱ्हेनें जाणणारे लोक) पंचब्रह्म मंत्रांच्या न्यासांमुळें शिवमंत्रसंस्कृत अशा अग्नीपासून जें भस्म तयार होतें त्यास उपाधिकभस्म असें ह्मणतात.

अवतरणिका–अथास्य भस्मनः कारणभेदेन नामपंचकमस्तीत्याह—

श्लोकः–विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः ॥
एतानि पंचनामानि हेतुभिः पंचभिर्भृशम् ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ विभूति, भसित, भस्म, क्षार, रक्षा हीं पांच नांवें पांच कारणांवरून भस्मास पडलेलीं आहेत.

अवतरणिका–तत्कारणमन्वर्थनाम कृत्वा कथयति—

श्लोकः–विभूतिर्भूतिहेतुत्वाद्भसितं तत्वभासनात् ॥
पापानां भर्त्सनाद्भस्म क्षरणात्क्षारमापदाम् ॥ ५ ॥
रक्षणात्सर्वभूतेभ्यो रक्षेति परिगीयते ॥

व्याख्यानं—अणिमाद्यष्टैश्वर्यकारणत्वाद्विभूतिः शिवतत्वप्रकाशनाद्भसितं पापानां मनोवाक्कायजन्यानां भर्त्सनात् भयोत्पादनाद्भस्म आपदां तापत्रयोत्पन्नविपदां क्षारणात् क्षयीकारणात् क्षारं सर्वभूतेभ्यः ग्रहपक्षादिभ्यः रक्षेति परिगीयत इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ भस्म लावल्यानें भूति (ऐश्वर्य) येते ह्मणून भस्मास विभूति असें नांव पडलें. भस्म लावल्यानें शिवरहस्याचें भासन होतें ह्मणून भस्मास भसित असें नांव पडलें. पातकांचें भर्त्सन (निंदा) करून त्या पातकास भस्म दूर पिटाळून लावितें ह्मणून त्यास भस्म ह्मणतात. भस्म धारण केल्यामुळें संकटें नाश पाऊं लागतात ह्मणून भस्मास क्षार असें नांव पडलें. ॥ ६ ॥ भस्म लावल्यापासून भूत, प्रेत, पिशाच वगैरेपासून आपलें रक्षण होतें. ह्मणून भस्मास रक्षा असें नांव पडलें.

अवतरणिका–नन्वेवंविधक्रियाभेदः किंनिबंधन इत्यत्र गोमूलक इत्याह—

श्लोकः–नंदा भद्रा च सुरभिस्सुशीला सुमनास्तथा ॥ ६ ॥
पंच गावो विभोर्जातास्सद्योजातादिवक्रतः ॥

व्याख्यानं—शिवस्य सद्योजातमुखान्नंदा वामदेववदनाद्भद्रा अघोरास्यात्सुरभिः तत्पुरुषवक्त्रात्सुशीला, ईशानाननात्सुमनाः एवं पंच गावो जाताः तत्कृतोयं कार्यभेद इत्यर्थः ॥ ६ ॥

अर्थ–नंदा, भद्रा, सुरभी, सुशीला, आणि सुमना. ॥ ७ ॥ ह्या पांच गाई शंकराच्या सद्योजात वगैरे पांच मुखांपासून पांचजणी उत्पन्न झाल्या, सद्योजात मुखापासून नंदा झाली, वामदेवमुखापसूना भद्रा झाली, अघोरमुखापासून सुरभि झाली, तत्पुरुषमुखापासून सुशीला झाली व ईशानमुखापासून सुमना उत्पन्न झाली.

अवतरणिका–तर्हि किमासां रूपमित्यत्राह—

श्लोकः–कपिला कृष्णा च धवला धूम्रा रक्ता तथैवच ॥ ७ ॥
नंदादीनां गवां वर्णाः क्रमेण परिकीर्तिताः ॥

व्याख्यानं—तथैव क्रमेणेति संबंधः ॥ ७ ॥

अर्थ–त्यांचें रूप अनुक्रमानें कपिल, काळें, पांढरें, धुरकट आणि लाल असें आहे. ॥ ८ ॥ नंदा कपिल वर्ण आहे, भद्रा काळी आहे, सुरभी पांढरी आहे, सुशीला धुरकट रंगाची असून सुमना लाल आहे.

अवतरणिका–अथ कया गवा कीदृशं भस्मोत्पन्नमित्यत्राह बृहज्जाबालश्रुत्यर्थमेव—

श्लोकः–सद्योजाताद्विभूतिश्च वामाद्भसितमेव च ॥ ८ ॥
अघोराद्भस्म संजातं तत्पुरुषात्क्षारनाम च ॥
रक्षाचेशानवक्त्राच्च नंदादिद्वारतो भवेत् ॥ ९ ॥

व्याख्यानं—सद्योजातमुखोत्पन्ननंदया विभूतिः वामदेवमुखोद्भूतभद्रया भसितं अघोरमुखसंजातसुरभिगवा भस्म तत्पुरुषमुखाविर्भूतसुशीलया क्षारं ईशानमुखनिर्गतसुमनसा रक्षा अभवदासीदित्यर्थः ॥ ८ ॥ ९ ॥

अर्थ–सद्योजातमुखापासून उत्पन्न झालेल्या नंदेपासून विभूति झाली, वामदेवमुखापासून उत्पन्न झालेल्या भद्रेपासून भसित झालें. ॥ ९ ॥ अघोरमुखापासून उत्पन्न झालेल्या सुरभीपासून भस्म झालें, तत्पुरुषमुखापासून उत्पन्न

झालेल्या सुशीलेपासून क्षार झालें. ईशानमुखापासून उत्पन्न झालेल्या सुमनेपासून रक्षा झाली व तें भस्म तयार होण्यास त्या त्या मुखापासून उत्पन्न झालेल्या नंदा, भद्रा, सुरभि, सुशीला आणि सुमना ह्या पांच गाई कारण आहेत.

अवतरणिका–अथैषां विनियोगमाह—

श्लोकः–धारयेन्नित्यकार्येषु विभूतिं च प्रयत्नतः ॥
नैमित्तिकेषु भसितं क्षारं कार्येषु सर्वदा ॥ १० ॥
प्रायश्चित्तेषु सर्वेषु भस्म नाम यथाविधि ॥
रक्षा च मोक्षकार्येषु प्रयोक्तव्या सदा बुधैः ॥ ११ ॥

व्याख्यानं—बुधैः वीरशैवमतप्रविष्टविद्वज्जनैः प्रयोक्तव्यं धार्यमित्यर्थः शिष्टं स्पष्टं ॥ १० ॥ ११ ॥

अर्थ–॥ १० ॥ नित्यकर्माचे वेळीं विभूति अवश्य लावावी, एखादेवेळीं कांहीं नैमित्तिककार्यें करणें झाल्यास भसित लावावें सामान्य कार्यांच्या वेळीं क्षार लावावें.

अर्थ–॥ ११ ॥ तसेंच विद्वान् मनुष्यांनीं कोणत्याही प्रकारचीं प्रायश्चित्तें करणें झाल्यास विधिपूर्वक भस्म लावावें आणि मोक्ष प्राप्त करून घ्यावयाचा असेल त्यावेळीं रक्षा लावावी.

अवतरणिका–अथैवंविधभस्मनां वर्णमाह—

श्लोकः–नंदादीनां तु ये वर्णाः कपिलाद्याः प्रकीर्तिताः ॥
त एव वर्णा विख्याता भूत्यादीनां यथाक्रमम् ॥ १२ ॥

व्याख्यानं—स्पष्टं ॥ १२ ॥

अर्थ–॥ १२ ॥ नंदा, भद्रा, सुरभि, सुशीला आणि सुमना ह्या पांच गाईंचे रंग कपिल, काळा, पांढरा, धुरकट आणि लाल ह्मणून सांगितला आहे त्याचप्रमाणें विभूतीचा कपिल रंग, भसिताचा काळा रंग, भस्माचा पांढरा रंग, क्षाराचा रंग धुरकट असून रक्षेचा रंग लाल असतो.

अवतरणिका–अथैतद्भस्मोत्पत्तिश्चतुर्विधेत्याह—

श्लोकः–भस्मोत्पादनमुद्दिष्टं चतुर्धा तंत्रवेदिभिः ॥
कल्पं चैवानुकल्पं तु उपकल्पमकल्पकम् ॥ १३ ॥
एषामादिममुत्कृष्टमन्यत्सर्वमभावतः ॥

व्याख्यानं—कल्पानुकल्पोपकल्पाकल्पाख्यचतुर्विधभस्मसु आदिमं प्राथमिकं कल्पं भस्मोत्कृष्टं अन्यत्सर्वं शिष्टत्रिविधभस्म अभावतः कल्पभस्मालाभादंगीकरणीयमित्यर्थः ॥ १३ ॥

अर्थ–॥ १३ ॥ आगमशास्त्र जाणणाऱ्यांनीं भस्माच्या उत्पत्ति चार प्रकारच्या मानिलेल्या आहेत त्या अशा १ कल्प, २ अनुकल्प, ३ उपकल्प आणि अकल्प ह्या होत. ॥ १४ ॥ ह्या चार जातींपैकीं कल्पजातीचें भस्म उत्तम आहे, बाकी तीन जाती उत्तम भस्म मिळालेंच नाहीं तर उपयोगांत आणाव्या.

अवतरणिका–अथ तेषां स्वरूपं क्रमेण कथयति—

श्लोकः–यथा शास्त्रोक्तविधिना गृहीत्वा गोमयं नवम् ॥ १४ ॥
सद्येन वामदेवेन कुर्यात्पिंडमनुत्तमम् ॥
शोषयेत्पुरुषेणैव दहेद्घोराच्छिवाग्निना ॥ १५ ॥
कल्पं तद्भस्म विज्ञेयमनुकल्पमथोच्यते ॥
वनेषु गोमयं यच्च शुष्कं चूर्णीकृतं तथा ॥ १६ ॥
दग्धं चैवानुकल्पाख्यमापणादिगतं तु यत् ॥
वस्त्रेणोत्तारितं भस्म गोमूत्राबद्धपिंडितम् ॥ १७ ॥
दग्धं प्रागुक्तविधिना भवेद्भस्मोपकल्पकम् ॥
अन्यैरापादितं भस्माप्यकल्पमिति निश्चितम् ॥ १८ ॥

व्याख्यानं—शास्त्रोक्तप्रकारेण नंदादिभिराविर्भूतनूतनगोमयं सद्येन सद्योजातमंत्रेणांतरे गृहीत्वा वामदेवमंत्रेण पिंडीकृत्य तत्पुरुषमंत्रेण शोषयित्वा शिवमंत्रसंस्कृताग्निना घोराद्घोरमंत्राद्दहेत् भस्मीकुर्यादित्यर्थः अथैशानमंत्रेण बिल्वादिपात्रे स्थापितं तद्भस्म कल्पमिति ज्ञातुं योग्यमित्यर्थः अरण्येषु यच्छुष्कं गोमयं चूर्णीकृत्य पूर्ववद्दग्धं भस्मानुकल्पाख्यमित्यर्थः, अत्र मंत्रत्रयलोपः आपणादिगतं यद्भस्मास्ति तद्वस्त्रेण संशोधितं सत् पुनर्गोमूत्रेण पिंडीकृतं सत् पश्चात् प्रागुक्तविधिना दग्धं चेत् उपकल्पाख्यं भस्म भवेत् स्यादित्यर्थः, अन्यैः अमंत्रज्ञैः, आपादितं संपादितं भस्म अकल्पमिति कल्पितं, कथितमित्यर्थः ॥१४॥१५॥१६॥१७॥१८

अर्थ–शेण गोळा करण्याच्या ज्या रीति शास्त्रांत सांगितल्या आहेत त्या रीतीप्रमाणें ताजें शेण जमा करावें. ॥ १५ ॥ सद्योजात मंत्रानें तें ताजें शेण जमीनीवर न पडूं देतां अधांतरींच धरावें आणि वामदेवमंत्रानें त्या ताज्या जमविलेल्या शेणाचे लहान लहान गोळे तयार करावे. तत्पुरुषमंत्रानें ते गोळे चांगले वाळवावे व वाळल्यानंतर अघोरमंत्रानें ते गोळे शिवमंत्रसंस्कृत झालेल्या अग्नीनें जाळून भस्म तयार करावें. ॥ १६ ॥ ईशानमंत्रानें तें भस्म बेलाच्या वगैरे पात्रांत ठेवावें त्या भस्मास कल्प (उत्तम भस्म) ह्मणतात. आतां अनुकल्प

कशास ह्मणतात तें सांगतों. रानांतील शेण वाळलेलें असेल तें आणून त्याचा चुरा करून. ॥ १७ ॥ तें पूर्वींच्या रीतीप्रमाणें जाळून जें भस्म तयार होतें तें अनुकल्प भस्म होय. बाजारांतील भस्म वस्त्रानें गाळून तें गोमूत्रांत पुन्हां चांगलें भिजवून त्याचे तयार केलेले गोळे. ॥ १८ ॥ वाळल्यावर पूर्वींच्या विधीप्रमाणें जाळले असतां जें भस्म तयार होतें तें उपकल्पक भस्म होय. दुसऱ्याकडून (मंत्रज्ञान नसणाऱ्याकडून) आयतें भस्म मागून आणावयाचें मग तें त्यानें कोणत्या तऱ्हेनें तयार केलें हें पाहावयाचें नाहीं त्या भस्मास अकल्पक भस्म ह्मणतात.

अवतरणिका–अथैवंविधभस्मना स्नानं कुर्यादित्याह—

श्लोकः–एष्वेकतममादाय पात्रेषु कलशादिषु ॥
त्रिसंध्यमाचरेत्स्नानं यथासंभवमेव वा ॥ १९ ॥

व्याख्यानं—कलशादिपात्रेषु भिन्नतया स्थापितेष्वेषु भस्मसु, एकतमं भस्मादाय, त्रिकालमेककालं वा स्नानं कुर्यादेवेत्यर्थः ॥ १९ ॥

अर्थ–॥ १९ ॥ हे भस्माचे चार प्रकार सांगितले त्यांपैकीं कोणत्याही एका प्रकारचें भस्म लहानशा कळशींत किंवा दुसऱ्या कोणत्या एखाद्या पात्रांत (करंड्यांत) निरनिराळें भरून ठेविलें असेल त्यापैकीं कोणत्यातरी एका भस्मानें तीनवेळ स्नान करावें किंवा जशी आपली शक्ति असेल त्याप्रमाणें एकवेळ तरी स्नान करावें. (तीनवेळ किंवा एकवेळ भस्म घेऊन आपल्या सर्व आंगास लावावें.)

अवतरणिका–कथं कर्तव्यमित्यत्राह—

श्लोकः–स्नानकाले करौ पादौ प्रक्षाल्य विमलांभसा ॥
वामहस्ततले भस्म क्षिप्त्वाच्छाद्यान्यपाणिना ॥ २० ॥
ऽष्टकृत्वाथ मूलेन मौनी भस्माभिमंत्र्य च ॥
शिरः ईशानमंत्रेण पुरुषेण मुखं तथा ॥ २१ ॥
हृत्प्रदेशमघोरेण वामदेवेन गुह्यकम् ॥
पादौ सद्येन सर्वांगं प्रणवेनैव सेचयेत् ॥ २२ ॥

व्याख्यानं—भस्मस्नानकाले स्वच्छोदकेन हस्तौ पादौ प्रक्षाल्य वामकरतले भस्म संस्थाप्य दक्षिणपाणिनाऽऽच्छाद्य दक्षिणोरौ निवेश्य मौनी भस्माभिमंत्रयेदिति शिवागमवचनात् मौनी भूत्वा मूलेनाष्टवारमभिमंत्र्य, शिरोमुखहृदयना-

भिपादेषु, प्रणतिपूर्वकैरीशानादिमंत्रैरभ्युक्षयेत् प्रणवेन सर्वांगं प्रोक्षयेदित्यर्थः ॥ २० ॥ २१ ॥ २२ ॥

अर्थ–॥ २० ॥ स्नान करावयाच्या वेळीं हात आणि पाय स्वच्छ पाण्यानें धुवावे, नंतर डाव्या हातावर भस्म घेऊन त्यावर उजवा हात झांकावा. ॥ २१ ॥ नंतर मौन धारण करून आठवेळ मूलमंत्रानें अभिमंत्रण करावें, नंतर ईशानमंत्रानें भस्म मस्तकास लावावें, तत्पुरुषमंत्रानें मुखास लावावें तसेंच. ॥ २२ ॥ अघोरमंत्रानें हृदयास भस्म लावावें, वामदेवमंत्र ह्मणून गुह्यस्थलास भस्म लावावें, सद्योजात मंत्रानें दोन्ही पायांस भस्म लावावें व ॐकार उच्चार करून सर्व आंगास भस्म लावावें. (सेचन करावें).

अवतरणिका–अथेदं जलस्नानादुत्कृष्टमित्याह—

श्लोकः–भस्मना विहितं स्नानमिदमाग्नेयमुत्तमम् ॥
स्नानेषु वारुणाद्येषु मुख्यमेतन्मलापहम् ॥ २३ ॥

व्याख्यानं—गंगोदकदिव्यवायव्यादिस्नानेषु, भस्मना विहितं स्नानं इदमाग्नेयमुत्तमम्, अग्नेः सर्वभस्मकत्वेनैतदाग्नेयस्नानं, सकलमलापहमिति मुख्यमित्यर्थः ॥ २३ ॥

अर्थ–॥ २३ ॥ हें भस्मस्नान झालें, हें आग्नेयस्नान (भस्मस्नान) उत्तम आहे, वारुणादिक (जलादिक) इतर स्नानांमध्यें हें स्नान उत्तम असून त्यामुळें पातकाचा नाश होतो.

अवतरणिका–ननु जलादिस्नानस्य सकलमलनिवर्तकत्वं नास्ति वेत्यत्राह—

श्लोकः–भस्मस्नानवतां पुंसां यथायोगं दिने दिने ॥
वारुणाद्यैरलं स्नानैर्बाह्यदोषापहारिभिः ॥ २४ ॥

व्याख्यानं—यथायोगं शास्त्रोक्तप्रकारमनतिक्रम्य प्रतिदिनं भस्मस्नानवतां पुंसां बाह्याभ्यंतरमलक्षयात् भस्मनो ज्ञानांगत्वात् बाह्यमलमात्रनिवर्तकैर्जलादिस्नानैरलं किं प्रयोजनमित्यर्थः ॥ २४ ॥

अर्थ–॥ २४ ॥ दररोज नियमानें विधिपूर्वक भस्मस्नान करणाऱ्या पुरुषांस शरीराचा फक्त मळ दूर करणाऱ्या इतर जलस्नानांचें कांहींएक कारण नाहीं.

अवतरणिका–अतएव यतिभिर्जलस्नानादाग्नेयमेव श्रेष्ठमिति भस्मस्नानमेव विधीयत इत्याह—

श्लोकः–आग्नेयं भस्मना स्नानं यतिभिस्तु विधीयते ॥

आर्द्रस्नानात्परं भस्म आर्द्रे जंतुवधो ध्रुवम् ॥ २५ ॥

व्याख्यानं—भस्मना स्नानमाग्नेयमिति यतिभिर्विधीयते, वह्नेः प्रकाशकत्वेन ज्ञानप्रदत्वात्, भस्मस्नानं, यतिभिः, आर्द्रस्नानात्परं श्रेष्ठं, आर्द्रे जलस्नाने जंतुवधः इति, ध्रुवम् निश्चयः, जलचरप्राणिपीडनया शैत्येन च प्राणिहिंसाकरमित्यर्थः अत्र तादृशदोषाभावाच्च ॥ २५ ॥

अर्थ-॥ २५ ॥ भस्मस्नानास आग्नेयस्नान ह्मणतात, तें संन्यासी लोकांनीं करावें, पाण्याच्या स्नानापेक्षां भस्मस्नान श्रेष्ठ आहे, कां तर पाण्याच्या स्नान करण्यामध्यें जसा जीवनाश होतो तसा भस्मस्नानांत होत नाहीं.

अवतरणिका-अथ जलस्य दोषांतरमुद्भावयति—

श्लोकः-आर्द्रं तु प्रकृतिं विंद्यात्प्रकृतिं बंधनं विदुः ॥
प्रकृतेस्तु प्रहाणार्थं भस्मना स्नानमिष्यते ॥ २६ ॥

व्याख्यानं—आर्द्रं जलं प्रकृतिं गर्भवासप्रकृतिं विंद्यात्, रक्तशुक्लयोर्जलमयत्वात् "स वा एष पुरुषोऽन्नरसमय इति" श्रुतेः प्रकृतिं बंधनं, भोज्यभोजनरूपेण पुरुषस्य पाशरूपं विदुः, अभिज्ञाः जानंति, "पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणानिति" भगवदुक्तेः पुरुषस्य प्रकृतिबद्धत्वात्, प्रकृतेस्तु प्रहाणार्थं, जलस्नानोत्थदोषनिवृत्त्यर्थं, भस्मना स्नानमिच्छाविषयीक्रियत इत्यर्थः ॥ २६ ॥

अर्थ-॥ २६ ॥ जल हें गर्भवासाचा संबंध (प्रकृति) जुळविण्यास कारण आहे, तो गर्भवासाचा संबंध (प्रकृति) बंधन होय असें मानतात, ते ह्मास्तव त्या प्रकृतीचा नाश होण्यासाठीं (जलस्नानानें होणारे दोष दूर होण्यासाठीं) भस्मस्नान करणें योग्य आहे.

अवतरणिका-अथेदं भस्मना स्नानं कैरंगीकृतमित्यत्राह—

श्लोकः-ब्रह्माद्या विबुधाः सर्वे मुनयो नारदादयः ॥
योगिनः सनकाद्याश्च बाणाद्या दानवा अपि ॥ २७ ॥
भस्मस्नानयुतास्सर्वे शिवभक्तिपरायणाः ॥
निर्मुक्तदोषकलिला नित्यशुद्धा भवंति हि ॥ २८ ॥

व्याख्यानं—कलिलाः समूहा इत्यर्थः शिष्टं स्पष्टं ॥ २७ ॥ २८ ॥

अर्थ-॥ २७ ॥ ब्रह्मादिक सर्व देव नारदादिक सर्व ऋषि सनकसनंदन वगैरे योगी आणि बाणासुर वगैरे दैत्य. ॥ २८ ॥ हे सर्वजण भस्मस्नान करीत

असत व ते मोठे शिवभक्त होते, त्यांचें पातक सर्व लयास गेलें असून ते नेहमीं निष्पाप झालेले होते.

अवतरणिका–अथ भस्मोद्धूलनं त्रिपुंड्रधारणं च कर्तव्य-मित्याह—

श्लोकः–नमश्शिवायेति भस्म कृत्वा सप्ताभिमंत्रितम् ॥
उद्धूलयेत्तेन देहं त्रिपुंड्रं चापि धारयेत् ॥ २९ ॥

व्याख्यानं—भस्म नमश्शिवायेति मंत्रेण सप्ताभिमंत्रितं सप्तजन्मकृतदोष-निवृत्त्यर्थं, सप्तवारमभिमंत्रितं कृत्वा, तेन भस्मना देहमुद्धूलयेत्, त्रिपुंड्रं चापि देहे रचयेदित्यर्थः ॥ २९ ॥

अर्थ–॥ २९ ॥ "नमः शिवाय" असा मंत्र ह्मणून सात वेळ भस्माचें अभिमंत्रण करावें. मग तें भस्म आंगास लावावें. व कपाळास त्या भस्माचा त्रिपुंड्र करावा.

अवतरणिका–अत्रोद्धूलनापेक्षया त्रिपुंड्रस्याधिक्यमाह—

श्लोकः–सर्वांगोद्धूलनं चापि न समानं त्रिपुंड्रकैः ॥
तस्मात्त्रिपुंड्रमेवैकं लिखेदुद्धूलनं विना ॥ ३० ॥

व्याख्यानं—स्पष्टं ॥ ३० ॥

अर्थ–॥ ३० ॥ सर्वांगास भस्म लाविलें तरी त्रिपुंड्र केल्याची बरोबरी होत नाहीं ह्यासाठीं सर्व आंगास भस्म सारविण्यापेक्षां एक त्रिपुंड्र केलेला बरा.

अवतर०–अथ त्रिपुंड्रं कदा कथं कुत्र धारणीयमित्यत्राह—

श्लोकः–त्रिपुंड्रं धारयेन्नित्यं भस्मना सलिलेन च ॥
स्थानेषु पंचदशसु शरीरे साधकोत्तमः ॥ ३१ ॥

व्याख्यानं—स्पष्टं ॥ ३१ ॥

अर्थ–॥ ३१ ॥ भस्मांत पाणी घालून दररोज त्या भस्माचा त्रिपुंड्र करावा. शिवभक्तीचें साधन करणाऱ्यानें आपल्या शरीरावर पंधरा ठिकाणीं त्रिपुंड्र करावे.

अवतरणिका–तानि कानीत्यत्राह—

श्लोकः–उत्तमांगे ललाटे च श्रवणद्वितये तथा ॥
गले भुजद्वये चैव हृदि नाभौ च पृष्ठके ॥ ३२ ॥
बाहुयुग्मे ककुद्देशे मणिबंधद्वये तथा ॥
त्रिपुंड्रं भस्मना धार्यं मूलमंत्रेण साधकैः ॥ ३३ ॥

व्याख्यानं—त्रियायुषत्रियंबकप्रणवपंचाक्षरमंत्रैर्धारयेत्, " शिरोललाटकंठस्कं-

धवक्षस्थलेषु, त्रियायुषत्रियंबकैस्तिस्रो रेखाः कुर्वीत, व्रतमेतच्छांभवमिति" श्रुतेः ॥ ३२ ॥ ३३ ॥

अर्थ–॥ ३२ ॥ मस्तकावर, कपाळावर, दोन्ही कानांवर, दोन गळ्यावर, दोन्ही हातांवर, उरावर, बेंबीवर, पाठीवर, ॥ ३३ ॥ दोन्ही दंडांवर, दोन्ही खांद्यांवर, दोन्हीं तळहातांच्या वरच्या भागावर साधकांनीं मूलमंत्रानें भस्मानें त्रिपुंड्र करावें.

अवतरणिका–अथ तदभिमंत्रणप्रकारपूर्वकं समंत्रकत्रिपुंड्रधारणस्य फलमाह—

श्लोकः–वामहस्ततले भस्म क्षिप्त्वाच्छाद्यान्यपाणिना ॥
अग्निरित्यादिमंत्रेण स्पृशन्वाराभिमंत्र्य च ॥ ३४ ॥
त्रिपुंड्रमुक्तस्थानेषु दध्यात्सजलभस्मना ॥
शिवं शिवंकरं शांतं स प्राप्नोति न संशयः ॥ ३५ ॥

व्याख्यानं—अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं हवा इदं भस्म मन एतानि चक्षूंषि भस्मानीति मंत्रेण स्पृशन् वारा उदकेन सप्तवारं मूलेनाभिमंत्रयेदित्यर्थः ॥ ३४ ॥ ३५ ॥

अर्थ–॥ ३४ ॥ डाव्या तळहातावर भस्म घेऊन त्यावर उजवा हात झांकावा, नंतर "अग्निरिति भस्म" ह्या मंत्रानें त्यास स्पर्श करून त्यावर पाण्यानें अभिमंत्रण करावें. ॥ ३५ ॥ नंतर पाण्यानें भिजलेलें भस्म घेऊन वर जीं त्रिपुंड्र करण्याचीं स्थलें सांगितलेलीं आहेत त्या त्या ठिकाणीं भस्माचें त्रिपुंड्र करावें असें त्रिपुंड्र करणारा मनुष्य त्या कल्याण करणाऱ्या शांतस्वभावाच्या शंकराच्या स्वरूपास जाऊन मिळतो.

अवतरणिका–अथ त्रिपुंड्ररचनाप्रकारमाह—

श्लोकः-मध्यांगुलित्रयेणैव स्वदक्षिणकरस्य तु ॥
षडंगुलायतं मानमपि वालिकमानकम् ॥ ३६ ॥
नेत्रयुग्मप्रमाणेन फाले दध्यात्त्रिपुंड्रकम् ॥

व्याख्यानं—स्पष्टं ॥ ३६ ॥

अर्थ–॥ ३६ ॥ आपल्या उजव्या हाताच्या तीन बोटांनींच सहा अंगुलेंपर्यंत

लांब किंवा सर्व कपाळभर त्रिपुंड्र लावावें. ॥ ३७ ॥ दोन्ही डोळ्यांची जितकी मर्यादा आहे तितक्या कपाळाच्या मध्यभागीं

अवतरणिका–अथ प्रकारांतरेण त्रिपुंड्रीकरणमाह—

श्लोकः–मध्यमानामिकांगुष्ठैरनुलोमविलोमतः ॥ ३७ ॥
धारयेद्यस्त्रिपुंड्रांकं स रुद्रो नात्र संशयः ॥

व्याख्यानं—मध्यमानामिकाभ्यां अनुलोमतः प्रदक्षिणतः रेखाद्वयं तन्मध्ये अंगुष्ठेन विलोमतः, अप्रदक्षिणतः, एकां रेखां रचयेत्, एवं धृतत्रिपुंड्रो रुद्र इत्युक्तत्वात्, पूर्वापेक्षया विशेष इत्यर्थः ॥ ३७ ॥

अर्थ–मध्यमा (मधलें बोट) अनामिका (करंगळीजवळचें बोट) आणि आंगठा ह्यांनीं उलटें सुलटें त्रिपुंड्र धारण करावें. ॥ ३८ ॥ जो मनुष्य असें त्रिपुंड्र धारण करितो तो प्रत्यक्ष रुद्र आहे ह्यांत कांहीं संशय नाहीं.

अवतरणिका–अथ तल्लक्षणं कथयति—

श्लोकः–ऋजुश्वेतमनुव्याप्तं स्निग्धं श्रोत्रप्रमाणकम् ॥ ३८ ॥
एवं सल्लक्षणोपेतं त्रिपुंड्रं सर्वसिद्धिदम् ॥

व्याख्यानं—ऋजु सरलं, श्वेतं शुभ्रं, अनुव्याप्तं, अविच्छिन्नं, स्निग्धं सांद्रं, श्रोत्रप्रमाणकं श्रवणपरिमितमित्यर्थः ॥ ३८ ॥

अर्थ–तें त्रिपुंड्र सरळ, पांढरें शुभ्र, एकमेकास न चिकटलेलें ठळक आणि कानापर्यंत लांब गेलेलें असावें. ॥ ३९ ॥ ह्याप्रमाणें सर्व लक्षणांनीं युक्त असणारें त्रिपुंड्र धारण केलें ह्मणजे सर्व मनोरथ पूर्ण होतात.

अवतरणिका–अथास्य त्रिपुंड्रस्य महत्वं सूत्रद्वयेन सूचयति—

श्लोकः–प्रातःकाले च माध्यान्हे सायान्हे च त्रिपुंड्रकम् ॥ ३९ ॥
कदाचिद्भस्मना कुर्यात्स रुद्रो नात्र संशयः ॥
एवंविधं विभूत्या च कुरुते यस्त्रिपुंड्रकम् ॥
स रौद्रधर्मसंयुक्तस्त्रयीमय इति श्रुतिः ॥ ४० ॥

व्याख्यानं—यः विभूत्या च भस्मना एवंविधं ऋजुश्वेतादिसल्लक्षणोपेतं त्रिपुंड्रकं कुरुते सः रौद्रधर्मसंयुक्तः रुद्रसंबंधी यो धर्मः शिवाचारः तेन संयुक्तः सन्, त्रयीमयः वेदत्रयस्वरूपः इति श्रुतिः, "य इदं त्रिपुंड्रं धरते स वेदत्रयधारी भवति स संततं त्रेताग्निर्भवति स पुष्करत्रयस्नातो भवति, यस्त्रिपुंड्रधारी पुरुषः स रुद्रः स परमेष्ठी य इदं त्रिपुंड्रं धृतवंतं पुरुषं पश्यति स सर्वपापेभ्यो विनिर्मुक्तो

भवति स सर्ववेदाध्ययनजन्मफलवान्भवतीति" वृद्धजाबालादिबहुश्रुतिसिद्धोऽयमर्थः, तस्मात् प्रातरादिकालत्रये, कदाचित्त्रिपुंड्रं यः कुर्यात् स रुद्रः शिव एव न संशय इत्यर्थः ॥ ३९ ॥ ४० ॥

अर्थ–सकाळीं, दुपारीं आणि संध्याकाळीं असेंच विभूतीचें त्रिपुंड्र करावें. ॥ ४० ॥ एखादेवेळीं भस्माचें त्रिपुंड्र केलें तरी तो प्रत्यक्ष शंकरच होतो ह्यांत संशय नाहीं. तो मनुष्य शिवधर्म पाळणारा असून ऋग्वेद, यजुर्वेद, सामवेद ह्याची प्रत्यक्ष मूर्ति होय असें वेद सांगतो.

अवतरणिका–अथैतादृशं त्रिपुंड्रं कैर्धृतमित्यत्राह—

श्लोकः–ब्रह्मा विष्णुश्च रुद्रश्च देवाः शक्रपुरोगमाः ॥
त्रिपुंड्रं धारयंत्येव भस्मना परिकल्पितम् ॥ ४१ ॥
वसिष्ठाद्या महाभागा मुनयः श्रुतिकोविदाः ॥
धारयंति सदाकालं त्रिपुंड्रं भस्मना कृतम् ॥ ४२ ॥

व्याख्यानं—स्पष्टं ॥ ४१ ॥ ४२ ॥

अर्थ–॥ ४१ ॥ ब्रह्मदेव, विष्णु, रुद्र आणि इंद्रादिक तेहतीस कोटी देव भस्मानें तयार केलेले त्रिपुंड्र लावतात. ॥ ४२ ॥ वेद उत्तम तऱ्हेनें जाणणारे वसिष्ठ वगैरे मोठमोठे भाग्यवान् ऋषीश्वर देखील नेहमीं भस्मानें केलेला त्रिपुंड्र धारण करितात.

अवतरणिका–अथेदं कुत्र विहितमित्यत्राह—

श्लोकः–शैवागमेषु वेदेषु पुराणेष्वखिलेषु च ॥
स्मृतीतिहासकल्पेषु विहितं भस्मपुंड्रकम् ॥
धारणीयं समस्तानां शैवानां च विशेषतः ॥ ४३ ॥

व्याख्यानं—कल्पेषु कल्पसूत्रेष्वित्यर्थः शिष्टं स्पष्टं ॥ ४३ ॥

अर्थ–॥ ४३ ॥ शिवागमांत, वेदांत आणि सर्वप्रकारच्या पुराणांत, स्मृति इतिहास वगैरे ग्रंथांत भस्माचे त्रिपुंड्र करावे ह्मणून सांगितलें आहे. त्रिपुंड्र सर्व जातीच्या लोकांनीं लावावें त्यांत शैवधर्मी लोकांनीं तर अवश्य लावावें.

अवतरणिका–अथ अनेन त्रिपुंड्रधारणेन सकलपापक्षय इत्युक्त्वा भस्मधारणस्थलं समापयति—

श्लोकः–नास्तिको भिन्नमर्यादो दुराचारपरायणः ॥

भस्मत्रिपुंड्रधारी चेन्मुच्यते सर्वकिल्बिषैः ॥ ४४ ॥

व्याख्यानं—वेदविरुद्धाचारनिष्ठः नास्तिकः, शरीरेंद्रियबुद्धिव्यतिरेकेण कश्चिदात्मा नास्तीति वदन् चार्वाकादिः, अतएव दुराचारपरायणः तादृशोऽपि भस्मत्रिपुंड्रधारी चेत्, सर्वकिल्बिषैः समस्तपापैर्मुच्यत इत्यर्थः ॥ ४४ ॥

"इति भस्मधारणस्थलम्"

अर्थ–॥ ४४ ॥ कोणी नास्तिक असला कोणी जातिभ्रष्ट झालेला असला किंवा कोणी वाईट रीतीनें वागणारा असला तरी त्यानें भस्म धारण केलें किंवा भस्माचें त्रिपुंड्र केलें तर तो सर्व पातकांपासून मुक्त होतो.

॥ अथ रुद्राक्षधारणस्थलं निरूपयति ॥

श्लोकः–भस्मना विहितस्नानस्त्रिपुंड्रांकितमस्तकः ॥
शिवार्चनपरो नित्यं रुद्राक्षमपि धारयेत् ॥ १ ॥

व्याख्यानं—मस्तको ललाट इत्यर्थः, शिष्टं स्पष्टं ॥ १ ॥

अर्थ–॥ १ ॥ भस्मानें स्नान करून कपाळास भस्माचा त्रिपुंड्र लाविल्यावर शिवपूजन करणाऱ्यानें नेहमीं रुद्राक्ष देखील धारण केले पाहिजेत.

अवतरणिका–किमनेन प्रयोजनमित्यत्राह—

श्लोकः–रुद्राक्षधारणादेव मुच्यंते सर्वपातकैः ॥
दुष्टचित्ता दुराचारा दुष्प्रज्ञा अपि मानवाः ॥ २ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥

अर्थ–॥ २ ॥ ज्यांचीं मनें वाईट आहेत, ज्यांची वागणूक वाईट आहे, ज्यांचीं बुद्धि वाईट आहे अशा मनुष्यांनीं रुद्राक्ष धारण केले तर त्यांचें देखील सर्व पाप नाहींसें होतें.

अवतरणिका–नन्वेते रुद्राक्षाः कथमुत्पन्नाः कुत एतादृक् सामर्थ्यमित्यत्राह—

श्लोकः–पुरा त्रिपुरसंहारे त्रिनेत्रो जगतां पतिः ॥
उदपश्यत्पुरां योगमुन्मीलितविलोचनः ॥ ३ ॥
निपेतुस्तस्य नेत्रेभ्यो बहवो जलबिंदवः ॥
तेभ्यो जाता हि रुद्राक्षा रुद्राक्षा इति कीर्तिताः ॥ ४ ॥

रुद्रनेत्रसमुत्पन्ना रुद्राक्षा लोकपावनाः ॥

व्याख्यानं—पूर्वं त्रिपुरसंहारप्रस्तावे जगतां पतिः विश्वपतिः त्रिनेत्रः सोमसूर्याग्निनयनः शिवः उन्मीलितविलोचनः संहारकाल एव ललाटनेत्रस्योन्मेषात् विकसितनेत्रत्रयः सन् पुरां त्रिपुराणां योगं संबंधं, उदपश्यत् ऊर्ध्वं दृष्टवान् तस्य नेत्रेभ्यः बहवो जलबिंदवः उदककणाः निपेतुः भूमौ पतिताः तेभ्यो जलबिंदुभ्यो रुद्राक्षा जाताः हि यस्मात् कारणात् रुद्रनेत्रसमुत्पन्नाः तस्मात् कारणात् रुद्राक्षा इति कीर्तिताः तत एव लोकपावना इत्यर्थः, "अत्र पुरा त्रिपुरवधायोन्मीलिताक्षोऽहं तेभ्यो जलबिंदवो भूमौ पतिताः ते रुद्राक्षाः जाताः सर्वानुग्रहार्थाय तेषां नामोच्चारणेन दशशतगोदानफलं भवति दर्शनस्पर्शनाभ्यां द्विगुणं त्रिगुणं फलं भवति अत ऊर्ध्वं वक्तुं न शक्यमिति बृहज्जाबालादिश्रुतिः ॥ ३ ॥ ४ ॥

अर्थ-॥ ३ ॥ पूर्वीं त्रिपुरें दहन करण्याच्या वेळीं तीन नेत्र असणारा, त्रैलोक्याचा ईश्वर शंकर त्यांचीं (दैत्यांचीं) नगरें कोणत्या रीतीनें बांधलेलीं आहेत हें डोळे उघडून पाहूं लागला: ॥ ४ ॥ त्यावेळीं त्याच्या डोळ्यांतून पुष्कळ पाण्याचे थेंब पडले त्यापासून रुद्राक्ष झाले ह्मणून त्यांस रुद्राक्ष ह्मणतात. ॥ ५ ॥ रुद्राक्ष शंकराच्या नेत्रापासून उत्पन्न झाले ह्मणून ते सर्व लोकांत पवित्र आहेत.

अवतरणिका-एवं रुद्रनेत्रसमुत्पन्नत्वात् तत्कलाभेदेनाष्टत्रिंशत्प्रकारेणोत्पत्तिं भजंत इत्याह—

श्लोकः-अष्टत्रिंशत्प्रभेदेन भवंत्युत्पत्तिभेदतः ॥ ५ ॥

व्याख्यानं—स्पष्टं ॥ ५ ॥

अर्थ-त्यांच्या उत्पत्तीच्या निरनिराळेपणावरून अडतीस भेद झाले आहेत.

अवतरणिका-अथ कस्मान्नेत्रात्कियंत उत्पन्ना इत्यत्राह—

श्लोकः-नेत्रात्सूर्यात्मनः शंभोः कपिला द्वादशोदिताः ॥
श्वेताः षोडशसंजातास्सोमरूपाद्विलोचनात् ॥ ६ ॥
कृष्णा दशविधा जाता वह्निरूपाद्विलोचनात् ॥
एवमुत्पत्तिभेदेन रुद्राक्षा बहुधा स्मृताः ॥ ७ ॥

व्याख्यानं—शिवस्य सूर्यात्मनो नेत्रात् कपिलाः कपिलवर्णा द्वादश द्वादश भेदवंतो रुद्राक्षा उदिताः उत्पन्ना इत्यर्थः, सूर्यनेत्रस्य, तपिन्यादिद्वादशकलात्मकत्वात्, सोमरूपाद्विलोचनात् चंद्रनयनात्, श्वेताः शुभ्रवर्णाः षोडश षोडशभेदवंतः संजाताः उत्पन्नाः तन्नेत्रस्यामृतादिषोडशकलात्मकत्वात्, वन्हिरूपाद्विलो-

चनात् वन्हिनयनात् कृष्णाः कृष्णवर्णाः दशविधाः दशभेदवंतः जाताः उत्पन्नाः तन्नेत्रस्य धूम्रार्चिःप्रभृतिदशकलात्मकत्वात् एवमुत्पत्तिभेदेन रुद्राक्षाः बहुधा बहुविधाः स्मृता इत्यर्थः ॥ ६ ॥ ७ ॥

अर्थ-॥ ६ ॥ शंकरास तीन नेत्र आहेत त्यापैकीं सूर्यनांवाच्या शंकराच्या नेत्रापासून कपिल वर्णाचे बारा प्रकारचे रुद्राक्ष उत्पन्न झाले. शंकराच्या चंद्रनांवाच्या नेत्रापासून सोळा प्रकारचे पांढरे रुद्राक्ष उत्पन्न झाले. ॥ ७ ॥ शंकराच्या अग्नि-नांवाच्या नेत्रापासून काळे दहा प्रकारचे रुद्राक्ष उत्पन्न झाले. ह्याप्रमाणें उत्पत्तीच्या निरनिराळेपणावरून रुद्राक्षाच्या अनेक जाति झाल्या आहेत.

अवतरणिका-अथ धार्यरुद्राक्षलक्षणमाह—

श्लोकः-अच्छिद्रं कनकप्रख्यमनन्यधृतमुत्तमम् ॥
रुद्राक्षं धारयेत्प्राज्ञः शिवपूजापरायणः ॥ ८ ॥

व्याख्यानं—अच्छिद्रमकृमिचुंबितमित्यर्थः शिष्टं । स्पष्टं ॥ ८ ॥

अर्थ-॥ ८ ॥ ज्याला किड्यानें पाडलेलें भोंक नसून त्याचा रंग सोन्यासारखा असेल व तो रुद्राक्ष त्यापूर्वीं कोणी धारण केला नसेल तो उत्तम समजावा. शिवाची मनोभावानें पूजा करणाऱ्या शहाण्या मनुष्यानें रुद्राक्षधारण केलें पाहिजे.

अवतरणिका-अत्र कुत्र कथं कति धारणीया इत्यत्राह—

श्लोकः-यथास्थानं यथावक्त्रं यथायोगं यथाविधि ॥
रुद्राक्षधारणं वक्ष्ये रुद्रसायुज्यसिद्धये ॥ ९ ॥

व्याख्यानं—स्पष्टं ॥ ९ ॥

अर्थ-॥ ९ ॥ तो रुद्राक्ष योग्य ठिकाणीं, जिकडे त्याचें तोंड करावयास पाहिजे तिकडे तोंड करून, रुद्राक्ष धारण करण्याची जी रीति आहे त्या रीती-प्रमाणें व योग्य विधीप्रमाणें रुद्राक्ष धारण करावें. रुद्राक्षधारण कसें करावें तें सांगतो. रुद्राक्षधारण केल्यानें शिवाचें सायुज्य प्राप्त होतें.

अवतरणिका-प्रतिज्ञाय स्थानं संख्यां चाह—

श्लोकः-शिखायामेकमेकास्यं रुद्राक्षं धारयेद्बुधः ॥
द्वित्रिद्वादशवक्त्राणि शिरसि त्रीणि धारयेत् ॥ १० ॥
षट्त्रिंशद्धारयेन्मूर्ध्नि नित्यमेकादशाननान् ॥
दशसप्तपंचवक्त्रान् षट् षट् कर्णद्वये वहेत् ॥ ११ ॥

षडष्टवदनान्कंठे द्वात्रिंशद्धारयेत्सदा ॥
पंचाशद्धारयेद्विद्वान् चतुर्वक्त्राणि वक्षसि ॥ १२ ॥
त्रयोदशमुखान्बाह्वोर्धरेत् षोडश षोडश ॥
प्रत्येकं द्वादश वहेन्नवास्यान्मणिबंधयोः ॥ १३ ॥
चतुर्दशमुखं यज्ञसूत्रमष्टोत्तरं शतम् ॥
धारयेत्सार्वकालं तु रुद्राक्षं शिवपूजकः ॥ १४ ॥

व्याख्यानं—अत्र दश सप्त पंच वक्त्रान् षट् षट् कर्णद्वय इत्यत्र दशमुखं द्वयं पंचमुखं द्वयं सप्तमुखं द्वयं एवं षट् षट् कर्णद्वये धारणीयमित्यर्थः "समं स्यादश्रुतत्वादिति"न्यायात् षट् षट् कर्णयोरेकमेकमिति रुद्राक्षजाबालश्रुतेः एकमेकं वा कर्णद्वये धारयेत् एवं कंठेऽपि षडष्टवदनान् समत्वेन धारयेदिति शिष्टं स्पष्टं। अयं भावः शुद्धमिश्रसंकीर्णभुवनाधीशशिवाष्टविद्येश्वरशतरुद्रसंख्यातयज्ञोपवीतधारणेन भुवनाध्वशुद्धिः, वर्णसंख्यातवक्षोमालया वर्णाध्वशुद्धिः, पदसंख्यातमणिबंधबाहुकंठमालया पदाध्वशुद्धिः, षडंगपंचब्रह्मप्रणवमंत्रसंख्यातकर्णाभरणेन मंत्राध्वशुद्धिः, शिवशक्त्यात्मककर्णाभरणेन वा तत्वसंख्यातमस्तकमालया, तत्वाध्वशुद्धिः, अष्टत्रिंशत्कलापूर्णसोमसूर्याग्निलक्षणशिरोरंध्रमालया, कलाध्वशुद्धिः, एवंरूपषडध्वकारणीभूतपरशिवब्रह्ममयशिखागतैकरुद्राक्षधारणेन, परशिवस्वरूप एव, यो रुद्राक्षं धत्ते स सत्यं परमशिवः स सत्यं परमः शिव इति श्रुतेः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

अर्थ—॥ १० ॥ चतुर मनुष्यानें आपल्या शेंडीमध्यें एकमुखाचा रुद्राक्ष धारण करावा. दोन, तीन किंवा बारा मुखाचें तीन रुद्राक्ष मस्तकावर बांधावे ॥ ११ ॥ अकरा मुखाचे छत्तीस रुद्राक्ष आपल्या कपाळावर बांधावे व दहा, सात किंवा पांच मुखांचें सहा सहा रुद्राक्ष दोन्ही कानांत बांधावे. ॥ १२ ॥ सहा किंवा आठ तोंडें असणारे बत्तीस रुद्राक्ष गळ्यांत बांधावे, तसेच विद्वान् मनुष्यानें आपल्या उरावर चार तोंडाचे पन्नास रुद्राक्ष बांधावे. ॥ १३ ॥ तेरा तोंडें असणारे सोळा सोळा रुद्राक्ष आपल्या दोन्ही दंडांत बांधावे व नऊ नऊ तोंडें असणारे बारा बारा रुद्राक्ष आपल्या कोंपराखालील दोन्ही हातांस बांधावें. ॥ १४ ॥ चवदा तोंडाच्या एकशें आठ रुद्राक्षांचें यज्ञोपवीत करून शिवपूजकानें नेहमीं गळ्यांत घालावें.

अवतरणिका—अथैवं रुद्राक्षधारणात्सर्वपापक्षय इत्याह—

श्लोकः—एवं रुद्राक्षधारी यस्सर्वकाले तु वर्तते ॥

तस्य पापकथा नास्ति मूढस्यापि न संशयः ॥ १५ ॥

व्याख्यानं—एवमुक्तप्रकारेण एषु स्थानेषु सदा रुद्राक्षधारिणो मूढस्यापि पापवार्ता नास्ति कुतः पापसंबंध इत्यर्थः, ॥ १५ ॥

अर्थ–॥ १५ ॥ अशा रीतीनें जो मनुष्य रुद्राक्ष धारण नित्य करीत असतो, तो मूर्ख कां असेना परंतु त्याला पाप ह्मणून लागत नाहीं. ह्यांत कांहीं संशय नाहीं.

अवतरणिका–ननु क्षुद्रपापसंबंधो नास्तीत्युच्यते वा महापातकसंबंधो नास्तीत्युच्यते वेत्यत्राह—

श्लोकः–ब्रह्महा मद्यपायी च स्वर्णहृद्गुरुतल्पगः ॥
मातृहा पितृहा चैव भ्रूणहा कृतघातकः ॥
रुद्राक्षधारणादेव मुच्यते सर्वपातकैः ॥ १६ ॥

व्याख्यानं—अत्र सर्वशब्देन अनुक्तपातकानि संगृहीतानीति बोध्यम् ॥ १६ ॥

अर्थ–॥ १६ ॥ मनुष्य ब्रह्महत्या करणारा असो, दारू पिणारा असो, सोनें चोरणारा असो, गुरूच्या स्त्रियेकडे पापीदृष्टीनें पाहणारा असो, मातेचा किंवा पित्याचा घात करणारा असो, गर्भाचा घात किंवा विश्वासघात करणारा असो, रुद्राक्ष धारण केल्यामुळेंच त्याचें सर्वपाप नाहींसें होतें.

अवतरणिका–अथ विशेषमाह—

श्लोकः–दर्शनात्स्पर्शनाच्चैव स्मरणादपि पूजनात् ॥
रुद्राक्षधारणाल्लोके मुच्यंते पातकैर्जनाः ॥ १७ ॥

व्याख्यानं—स्पष्टं ॥ १७ ॥

अर्थ–॥ १७ ॥ रुद्राक्षाचें दर्शन घेतलें किंवा रुद्राक्षास स्पर्श केला किंवा रुद्राक्षाचें स्मरण केलें किंवा रुद्राक्षाचें पूजन केलें किंवा रुद्राक्षाचें धारण केलें तरी लोक ह्या लोकांतील सर्व पापापासून मुक्त होतात.

अवतरणिका–अत्र जनशब्देन को वा विवक्षित इत्यत्राह—

श्लोकः–ब्राह्मणो वांत्यजो वापि मूर्खो वा पंडितोऽपि वा ॥
रुद्राक्षधारणादेव मुच्यते सर्वपातकैः ॥ १८ ॥

व्याख्यानं—अनेन रुद्राक्षधारणे सर्वेऽप्यधिकारिण इत्युक्तं भवति ॥ १८ ॥

अर्थ–॥ १८ ॥ ब्राह्मण असो, महार असो, मूर्ख असो किंवा पंडित असो रुद्राक्ष धारण केल्यानें त्याचीं सर्वपापें नाहींशीं होतात.

अवतरणिका–नन्वनेन पापक्षयमात्रं वा पुण्यमपि किंचिदस्ति वेत्यत्राह—

श्लोकः–गवां कोटिप्रदानस्य यत्फलं भुवि लभ्यते ॥
तत्फलं लभते मर्त्यो नित्यं रुद्राक्षधारणात् ॥ १९ ॥

व्याख्यानं–स्पष्टं ॥ १९ ॥

अर्थ-॥ १९ ॥ एक कोटी गायींचें दान केलें तर ह्या लोकीं जें पुण्य लागतें तेंच पुण्य जो मनुष्य नेहमीं रुद्राक्ष धारण करितो त्यास लागतें.

अवतरणिका–अथास्यैतावन्मात्रमेव न क्रियाभेदेनान्योऽपि चमत्कारोऽस्तीत्याह—

श्लोकः–मृत्युकाले च रुद्राक्षं निष्पीड्य सह वारिणा ॥
यः पिबेच्चिंतयन् रुद्रं रुद्रलोकं स गच्छति ॥ २० ॥

व्याख्यानं– स्पष्टं ॥ २० ॥

अर्थ-॥ २० ॥ मरण यावयाच्या वेळीं पाण्यांत रुद्राक्ष उगाळून तें पाणी पिऊन शंकराचें चिंतन केलें तर तो मनुष्य खचित रुद्रलोकास जातो.

अवतरणिका–एवं निश्चित्य ये भस्मरुद्राक्षधारिणः संति, ते रुद्रा एवेत्याह—

श्लोकः–भस्मोद्धूलितसर्वांगा धृतरुद्राक्षमालिकाः ॥
ये भवंति महात्मानस्ते रुद्रा नात्र संशयः ॥ २१ ॥

व्याख्यानं—स्पष्टं ॥ २१ ॥

अर्थ-॥ २१ ॥ ज्यांनीं आपल्या सर्व आंगास भस्म लाविलें आहे व जे नेहमीं रुद्राक्षांच्या माळा गळ्यांत घालतात त्यांचें महत्व फार असून ते प्रत्यक्ष रुद्रच आहेत ह्यांत शंका नाहीं.

अवतरणिका–अथ भस्मरुद्राक्षधारणशून्येन द्विजेन विधीयमानं नित्यनैमित्तिकादिकं कर्मापि व्यर्थमित्याह—

वृत्तं–नित्यानि काम्यानि निमित्तजानि कर्माणि सर्वाणि सदापि कुर्वन्।
यो भस्मरुद्राक्षधरो यदि स्यात् द्विजो न तस्यास्ति फलोपपत्तिः २२

व्याख्यानं—उपपत्तिः प्राप्तिरित्यर्थः। शिष्टं स्पष्टं ॥ २२ ॥

अर्थ-॥ २२ ॥ नित्य कर्मे केलीं, इच्छा धरून व्रतें केलीं, विशेष प्रकारचीं

व्रतें केलीं, आपल्या धर्मांत सांगितलेलीं सर्व कर्में यथाविधीनें केलीं तरी पण जो ब्राह्मण इतकें करूनही रुद्राक्ष धारण करणार नाहीं तर त्याच्या ह्या सर्व कर्माचा कांहीं उपयोग नाहीं.

अवतरणिका-तस्माद्वर्णाश्रमाचारनिष्ठेषु भस्मरुद्राक्षधर एक एव गरीयानित्याह—

वृत्तं-सर्वेषु वर्णाश्रमसंगतेषु नित्यं सदाचारपरायणेषु ॥
श्रुतिस्मृतिभ्यामिह चोद्यमानो विभूतिरुद्राक्षधरः समानः २३

इति श्रीषट्स्थलब्रह्मिना शिवयोगिनाम्ना प्रणीते वीरशैवधर्मनिर्णये सिद्धान्तशिखामणौ भक्तस्थले विभूतिरुद्राक्षधारणप्रसंगो नाम सप्तमपरिच्छेदः समाप्तः ॥

व्याख्यानं—ब्राह्मणादिवर्णब्रह्मचर्याद्याश्रमसंयुतेषु सर्वेषु विषये इह लोके विभूतिरुद्राक्षधरः समानः भस्मरुद्राक्षधर एक एव श्रुतिस्मृतिभ्यां चोद्यमानः श्लाघनीयः ॥ २३ ॥

इति श्रीमत्पदवाक्यप्रमाणपारवारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां सप्तमपरिच्छेदः समाप्तः ॥

अर्थ-॥ २३ ॥ ब्राह्मण, क्षत्रिय, वैश्य, शूद्र हे चार वर्ण ब्रह्मचारी, गृहस्थ, वानप्रस्थ आणि संन्यास हे चार आश्रमधर्म व नेहमीं सदाचारानें वागणारे लोक ह्या सर्वांत विभूति आणि रुद्राक्ष धारण करणारा जो असेल तोच एक श्रेष्ठ आहे. रुद्राक्ष धारण करणें हें वेदास आणि शास्त्रास देखील मान्य आहे. रुद्राक्ष धारण करणाराची योग्यता इतरांस येणार नाहीं.

ह्या प्रमाणें वीरशैवाच्या धर्माचा निर्णय असणाऱ्या सिद्धांतशिखामणिग्रंथांतील भक्तस्थलांतील विभूति आणि रुद्राक्ष धारण करण्याचें वर्णन असलेला सातवा परिच्छेद संपला.

अथ अष्टमपरिच्छेदः प्रारभ्यते ।

अवतरणिका– अथैवं शिवलिंगरुद्राक्षधारणसंपन्नः शिवतत्वप्रकाशार्थं पंचाक्षरीं जपेदिति पंचाक्षरीजपस्थलमगस्त्याय निरूपयति श्रीरेणुकः—

श्लोकः–धृतश्रीभूतिरुद्राक्षः प्रयतो लिंगधारकः ॥
जपेत्पंचाक्षरीविद्यां शिवतत्वप्रबोधिनीम् ॥ १ ॥

व्याख्यानं—धृतमांगल्यभूतिरुद्राक्षपवित्रितः, शिवलिंगधारकः शिवतत्वप्रबोधिनीम् परशिवतत्वप्रकाशिनीम्, पंचाक्षरीविद्यां नमश्शिवायेति श्रीरुद्रमंत्रप्रसिद्धपंचाक्षरीमंत्रं, जपेत् मानसोपांशुवाचिकस्वरूपेणोच्चरेत्, जप अव्यक्तायां वाचीति धातोरित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ ज्यानें विभूति लाविली, रुद्राक्ष धारण केले एकनिष्ठपणानें श्रद्धापूर्वक लिंग धारण केलें. त्यानें शिवपंचाक्षरीविद्येचा जप करावा. त्यामुळें शिवरहस्याचें ज्ञान होतें.

अवतरणिका–ननु शिवतत्वप्रकाशकानां मंत्राणां बाहुल्यात्किमित्येष पंचाक्षरमंत्र एव जप्य इत्यत्राह—

श्लोकः–शिवतत्वात्परं नास्ति यथा तत्वांतरं महत् ॥
तथा पंचाक्षरीमंत्रान्नास्ति मंत्रांतरं महत् ॥ २ ॥

व्याख्यानं—"शिव एको ध्येय" इत्यादिश्रुतेः शिवतत्वात्परं व्यतिरिक्तं महत् बृहत् तत्वांतरं यथा नास्ति, तथा पंचाक्षरीमंत्रात् नमःशिवायेति पंचाक्षरीमंत्रात्, महत् मंत्रांतरं नास्तीत्यर्थः, "विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनीश्रुतौ ॥ तत्र पंचाक्षरी तस्यां शिव इत्यक्षरद्वयमिति" पौराणिकोक्तेः शिवइत्यक्षरद्वयस्य वेदसारत्वात् तत्रत्याकारस्य ऋक्सामसंग्रहरूपत्वात्, तयोरकाराद्यत्वात्, इकारस्य यजुःसंग्रहरूपत्वात् तस्येकाराद्यत्वात्, शकारस्याथर्वसंग्रहरूपत्वात्, तस्य शकाराद्यत्वात्, वकारस्य व्याकरणसंग्रहरूपत्वात्, तस्य वकाराद्यत्वात्, एवं वेदवेदांगसाररूपत्वात्, तादृक् शिवशब्दघटितत्वेनैष पंचाक्षरमंत्र एव सर्वमंत्रोत्कृष्ट इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ ज्याप्रमाणें शिवतत्वापेक्षां दुसरें कोणतेंही तत्व श्रेष्ठ नाहीं तसेंच शिवपंचाक्षरीमंत्रापेक्षां दुसरा कोणताही श्रेष्ठ मंत्र नाहीं.

अवतरणिका-एवं पंचाक्षरीमंत्रे शिवे च ज्ञाते सति मंत्रांतरैर्देवतांतरैः किं प्रयोजनमित्यत्राह—

श्लोकः-ज्ञाते पंचाक्षरीमंत्रे किंवा मंत्रांतरैः फलम् ॥
ज्ञाते शिवे जगन्मूले किं फलं देवतांतरैः ॥ ३ ॥

व्याख्यानं—"एको हवै नारायण आसीदिति" श्रुतेः विष्ण्वादिसकलविश्वमूलत्वेन परशिवे, ज्ञाते सति, तदीयसृष्ट्यंतर्गतत्वेन, जननमरणपरिपीडितैर्विष्ण्वादिदेवतांतरैः, किं फलं न किंचित्फलमित्यर्थः, "न हि भिक्षुको भिक्षुकांतरं याचयति," "सत्यन्यस्मिन् भिक्षुके, दातरीति," न्यायात् "नन्वेको हवै नारायण आसीदित्यत्र" सदेव सोम्येदमग्र आसीदित्यादि ब्रह्मप्रतिपादकवाक्यसाम्यताश्रवणात् कथमुत्पत्तिपरत्वमिति चेन्न, "रोहितो लोहितादासीच्छक्तेरासीत्पराशर इतिवदुत्पत्तिसत्तापरतोपपत्तेः, नच तद्वत्, हेतुश्रवणाभावात्कथमुत्पत्तिपरत्वमिति वाच्यं; "ब्रह्मविष्णुरुद्रेंद्रास्ते संप्रसूयंत इति" शिखोपनिषद्वचनात्, विष्णोरुत्पत्तेः श्रूयमाणत्वात्, तदनुसारेणोत्पत्तिपरतासंभवात्, न चात्र नारायणस्योत्पत्तिर्न श्रूयते, किं तु विष्णोरेव, तस्य नारायणांशीभूतत्वात्, "आदित्यानामहं विष्णुरिति" गीतत्वात् अंशपरत्वमेवेति वाच्यं, मुख्यब्रह्मरुद्रमध्यपठित विष्णुशब्दस्यांशपरत्वासंभवात्, प्रायःपाठविरोधात् "विष्णुरित्थापरमविद्वान् जातो बृहन्नभिपाति तृतीयमिति" श्रुतेर्महाविष्णोरेवोत्पत्तिश्रवणाच्च, "अजात इत्येव कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमिति" श्वेताश्वतरश्रुतेः कारणीभूतमहारुद्रस्याजातत्वश्रवणाच्चेति दिक् ॥ ३ ॥

अर्थ-॥ ३ ॥ एक वेळ शिवपंचाक्षरी मंत्र समजला ह्मणजे मग इतर मंत्र समजून घेण्याचें काय कारण आहे ? सर्व जगांचें मूल असें शिवदैवत पूर्णपणें समजल्यावर इतर देवांची माहिती घेण्याचें काय कारण आहे.

अवतरणिका-ननु सप्तकोटिमहामंत्रेषु कोऽप्यस्य समानमंत्रो नास्ति वेत्यत्राह—

श्लोकः-सप्तकोटिषु मंत्रेषु मंत्रः पंचाक्षरो महान् ॥
ब्रह्मविष्ण्वादिदेवेषु यथा शंभुर्महत्तरः ॥ ४ ॥

व्याख्यानं—"सर्वमन्यत्परित्यज्य हेयान्विष्ण्वादिकान् सुरान् ॥ शिव एव सदा ध्येयस्सर्वसंसारनाशन इति" पिप्पलादश्रुतेः अजात इत्युदाहृतः श्रुतेश्च मुमुक्षूपास्यत्वादजातत्वेन ब्रह्मादिषु शिवो यथा महान् तथा सप्तकोटिमहामंत्रेषु वेदसारत्वात्पंचाक्षरमंत्रो महानित्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ ब्रह्मदेव, विष्णु वगैरे तेहतीसकोटि देव आहेत तरी त्यांत

शंकरच श्रेष्ठ आहेत, त्याप्रमाणें सात कोटि मंत्र आहेत तरी त्यांत शिवपंचाक्षरी मंत्रच श्रेष्ठ आहे.

अवतरणिका–ननु विष्ण्वादिसकलविश्वमूलत्वात् शिवस्सर्वोत्तमो भवतु पंचाक्षरीमंत्रस्य कथं सर्वोत्तमत्वमित्याशंक्याह—

श्लोकः–अशेषजगतां हेतुः परमात्मा महेश्वरः ॥
तस्य वाचकमंत्रोऽयं सर्वमंत्रैककारणम् ॥ ५ ॥

व्याख्यानं—शिवो यथा सकलजगत्कारणं तथा तद्वाचकमंत्रोऽपि सकलमंत्रकारणमित्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ सर्व त्रैलोक्याची उत्पत्ति, रक्षण व संहार करण्यास एक शंकरच कारण आहे त्या शंकराच्या नांवाचाच हा शिवपंचाक्षरी मंत्र असल्यामुळें इतर सर्वमंत्रांपेक्षां हा मंत्र श्रेष्ठ आहे (सर्व मंत्रांला कारण आहे) हें उघड आहे.

अवतरणिका–तत्कथमित्यत्राह—

श्लोकः–तस्याभिधानमंत्रोऽयमभिधेयश्च स स्मृतः ॥
अभिधानाभिधेयत्वान्मंत्रात्सिद्धः परश्शिवः ॥ ६ ॥

व्याख्यानं—अयं मंत्रः तस्य शिवस्य अभिधानमंत्रः नाम्नो मंत्र इत्यर्थः सः शिवः अभिधेयश्च तन्मंत्रेणाभिधातुं योग्य इति स्मृतः, अभिधानाभिधेयत्वात्, शिवाभिधानाभिधेयत्वात्, मंत्रादस्मान्मंत्रात्, परश्शिवः, सिद्धः' प्रकाशितः, मंत्राणां यजनीयदेवता, प्रकाशकत्वेनैतन्मंत्राभावे, शिवस्य स्फूर्तिरेव न स्यात्, किं तावतेति नाशंकनीयम्, शिवस्य सकलतत्वोपादानकारणत्वात्, तद्वाचकपंचाशद्वर्णमयत्वं च युक्तमिति, तस्य सकलमंत्रमूलत्वात्, तत्प्रकाशकत्वेन, सकलमंत्रकारणत्वमिति, तत्कथमिति चेत्, उच्यते, "अथाद्यास्तिथयः सर्वे स्वरा बिंद्ववसानकाः ॥ तदंतः कालयोगेन सोमसूर्यौ प्रकीर्तितौ ॥ पृथिव्यादीनि तत्वानि पुरुषांतानि पंचसु ॥ क्रमात्कादिषु वर्गेषु मकारांतेषु सुव्रते ॥ वाय्वग्निसलिलेंद्राणां धारणानां चतुष्टयम् ॥ तदूर्ध्वेशादिविख्यातं पुरस्ताद्ब्रह्मपंचकम् ॥ आमूलात्तत्क्रमाज्ज्ञेया क्षांतासृष्टिरुदाहृता ॥ सर्वेषां चैव मंत्राणां विद्यानां च यशस्विनी ॥ इयं योनिस्समाख्याता सर्वतंत्रेषु सर्वदेति ॥" श्रीपरा त्रिंशिकाशास्त्रस्थित्या, शिव इत्यत्र, शकारस्य ब्रह्मादिपंचब्रह्मवाचकत्वात्, वकारस्य मायातत्ववाचकत्वेन, तत्कार्यरूपकलादिक्षितिपर्यंतत्रिंशत्तत्वात् एवं शकारवकारयोः, षट्त्रिंशत्तत्ववाचकत्वात्, अकारस्य वितत्शवकलारूपषोडशस्वरमयत्वात्, इकारस्येच्छाशक्तिवाचकत्वात्, एवं शब्दार्थमयंप्रपंचयोरंतर्भावात्, सकलमंत्रकारणत्वं, मातृकादेस्सकलशब्द-

प्रपंचोपादानकारणत्वात्, (बृ.) "पंचाशन्निजदेहजाक्षरभवैर्नानाविधैर्धातुभिर्बह्वर्थैः पदवाक्यमानजनकैरर्थाविनाभावितैः ॥ साभिप्रायसदर्थकर्मफलदानैरनंतैरिदं विश्वं व्याप्य चिदात्मनाहमहमित्युज्जृंभसे मातृके ॥ पंचाशद्वर्णमालाबहुविधनिनदोच्चारणातत्त्वजालव्यक्तिव्यापारसत्तानिरिशगुरुमुखाम्नायविद्यास्वरूपा ॥ धात्वाद्युत्पत्तिपूर्वं श्रुतिमुखविविधानेकसिद्धांतविद्या नानाभाषाः क्रियाभिः प्रकटयति यतस्सैवते सांगवेदे ॥" इति दूर्वासभगवदुक्तेरिति ॥ ६ ॥

अर्थ–॥ ६ ॥ त्या शिवाच्या नांवाचा हा शिव पंचाक्षरी मंत्र आहे व ह्या मंत्रानें शिवाचें नांव घ्यावें लागतें शिवाचें नांव आणि शिवाचें नांव घेणें ह्या दोन गुणांमुळें हा शिवपंचाक्षरी मंत्र प्रत्यक्ष शिव आहे असें सिद्ध होतें ह्यांत शंका नाहीं.

अवतरणिका–नन्वेवं चेत् व्यक्षरत्वमेव युक्तं किमिति पंचाक्षररूपेण सर्वश्रुतिशिरोगतः सन् मंत्रोऽयं प्रतिभाति अत्र नमस्कारेण जीवत्वमित्यत्राह—

श्लोकः–नमःशब्दं वदेत्पूर्वं शिवायेति ततः परम् ॥
मंत्रः पंचाक्षरो ह्येष सर्वश्रुतिशिरोगतः ॥ ७ ॥

व्याख्यानं—शिवजीवैक्यप्रकाशनार्थं, नमश्शब्दपूर्वकत्वेन, चित्तत्वेन च, पंचाक्षररूपेण सर्वश्रुतिशिरोगतः सन्, मंत्रोऽयं प्रतिभाति, अत्र नमस्कारेण जीवत्वं शिवशब्देन परब्रह्मत्वं, आयेत्यैक्यमयगताविति, धातोरिति भावः ॥ ७ ॥

अर्थ–॥ ७ ॥ "शिवपंचाक्षरीमंत्रांत" नमः हा शब्द अगोदर उच्चारून शिवाय हा शब्द मागाहून उच्चारावा लागतो हा पंचाक्षरी मंत्र होय, आणि हा मंत्र सर्ववेदांत देखील श्रेष्ठ आहे.

अवतरणिका–ननु सच्चिद्घनस्य परब्रह्मणः शिव इत्यभिधानं कथमित्यत्राह—

श्लोकः–आदितः परिशुद्धत्वान्मलत्रयवियोगतः ॥
शिव इत्युच्यते शंभुश्चिदानंदघनः प्रभुः ॥ ८ ॥

व्याख्यानं—चिदानंदघनः सच्चिदानंदस्वरूपः प्रभुः स्वतंत्रः शंभुः सुखभोक्तृत्वात् सुखप्रदत्वाच्च, परब्रह्म आदितः कदापि मंत्रवियोगतः, आणवादिमलत्रयसंबंधाभावेन, परिशुद्धत्वात्, निर्मलत्वात्, शिव इत्युच्यते वशकांताविति धातोः स्वच्छप्रकाशरूपत्वादितिभावः ॥ ८ ॥ मल

अर्थ–॥ ८ ॥ शंकर हा सत् चित् आनंद स्वरूप आहे आणव माया,

कार्मिक हे तीन मल शंकरास मुळींच नाहींत व तो स्वतःच परिशुद्ध आहे ह्मणून त्यास शिव ह्मणतात शंभु हा चित्स्वरूप परमेश्वर आहे.

अवतरणिका–अथ सकलमंगलावासभूमित्वाच्च शिवशब्दाभिधेयं ब्रह्मेत्याह—

श्लोकः–आस्पदत्वादशेषाणां मंगलानां विशेषतः ॥
शिवशब्दाभिधेयो हि देवदेवस्त्रियंबकः ॥ ९ ॥

व्याख्यानं—अत्र त्रियंबकशब्देन सृष्टिस्थित्यादिकारणं परब्रह्मोच्यते, सूर्यादीनां सृष्ट्यादिकारणत्वात्, "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम्। ऊर्ध्वरेतं विरूपाक्षमिति" श्रुतेः त्रियंबकः, देवदेवः ब्रह्मादीनामपि देवः, परमेश्वरः अशेषाणां समस्तानां मंगलानां विशेषतः, विष्ण्वादिभ्योऽधिकतः, आस्पदत्वात् आश्रयत्वात्, शिवशब्दाभिधेयो हि, "कल्याणं मंगलं शिवमिति" प्रसिद्धत्वात् ॥ ९ ॥

अर्थ–॥ ९ ॥ बहुतकरून सर्व प्रकारच्या कल्याणांचें शंकर हे घर आहेत. (शंकराच्या भक्तीनें सर्व प्रकारचीं कल्याणें होतात.) ह्मणून शंकरास शिव ह्मणतात तो सर्व देवांचा देव असून त्यास तीन नेत्र आहेत.

अवतरणिका–नन्वनेकनाम्नां विद्यमानत्वात् शिवशब्देनैव किमिति परब्रह्माभिधीयते इत्यत्राह—

श्लोकः-शिव इत्यक्षरद्वंद्वं परब्रह्मप्रकाशकम् ॥
मुख्यवृत्त्या तदन्येषां शब्दानां गुणवृत्तयः ॥ १० ॥

व्याख्यानं—शिव इत्यक्षरद्वयं, मुख्यवृत्त्या, परब्रह्मप्रकाशकम्, तदन्येषां शब्दानां, शिवशब्दातिरिक्तभवादिशब्दानां, गुणवृत्त्या, सिंहो माणवक इत्यादिवद्गुणयोगेन, परब्रह्मप्रकाशकत्वमित्यर्थः, ॥ १० ॥

अर्थ–॥ १० ॥ शिव अशा दोन अक्षरांचा उच्चार केल्याबरोबर परब्रह्माचें ज्ञान होतें हें अगदीं ठरलेलें आहे त्या शिवाचीं इतर भव वगैरे नांवें घेणें हें त्याचे गुणवर्णन करणें आहे.

अवतरणिका–अथोक्तार्थमुपसंहरति—

श्लोकः-तस्मान्मुख्यतरं नाम शिव इत्यक्षरद्वयम् ॥
सच्चिदानंदरूपस्य शंभोरमिततेजसः ॥ ११ ॥
एतन्नामावलंबेन मंत्रः पंचाक्षरः स्मृतः ॥

व्याख्यानं—महानिति शेषः, शिव इत्यक्षरद्वयमपरिमितप्रकाशरूपस्य,

सच्चिदानंदघनस्य, शंभोः, परब्रह्मणः, मुख्यतरमत्यंतमुख्यं, नाम. एतन्नामावलंबेन, एतन्नामघटितत्वेन, पंचाक्षरो मंत्रः, महानिति स्मृत इत्यर्थः ॥ ११ ॥

अर्थ-॥ ११ ॥ ह्यासाठीं शिव हें दोन अक्षरांचें नांव घेणें हेंच उत्तम आणि श्रेष्ठ आहे. शिव हा सच्चिदानंदस्वरूप असून त्याचें सामर्थ्य अगाध आहे. ॥ १२ ॥ ह्या शिवाच्या नांवाच्या आश्रयामुळें हा मंत्र पंचाक्षरांचा झाला आहे.

अवतरणिका-अथ किमनेन कर्तव्यं किं फलमित्यत्र दृष्टांतपूर्वकमाह—

श्लोकः-यस्मादतः सदा जप्यो मोक्षकांक्षिभिरादरात् ॥ १२ ॥

यथानादिर्महादेवः सिद्धः संसारमोचकः ॥

तथा पंचाक्षरो मंत्रस्संसारक्षयकारकः ॥ १३ ॥

व्याख्यानं—यस्मात् शिवनामघटितत्वेन पंचाक्षरमंत्रो महान्, अतः तस्मात्कारणात् मोक्षकांक्षिभिः पुरुषैः आदरात् सदा जप्यः, अत्र दृष्टांतः "सर्वमन्यत्परित्यज्य हेयान्विष्ण्वादिकान्सुरान्, शिव एव सदा ध्येयस्सर्वसंसारनाशनः" इति पिप्पलादश्रुतेः अनादिभूतः परशिवः यथा संसारपाशविमोचक इति प्रसिद्धः तथा पंचाक्षरमन्त्रः संसारपाशक्षयकारक इति प्रसिद्धः "अशेषपाशविच्छित्यै शिवइत्यक्षरद्वयं ॥ अलं नमस्क्रियायुक्तो मुक्तये कल्पितो मनुरिति" ब्रह्मोत्तरखंडवचनादिति ॥ १२ ॥ १३ ॥

अर्थ-"नमः शिवाय" हीं पांच अक्षरें होत ह्यासाठीं मोक्षप्राप्तीची इच्छा करणाऱ्यांनीं तो शिवपंचाक्षरी मंत्र मनापासून जपावा. ॥१३॥ ज्यास जन्म नाहीं (अनादि आहे असा हा महादेव जसा स्वतः सिद्ध असून संसाराचें दुःख नाश करितो तसाच हा शिवपंचाक्षरी मंत्र संसारांतील दुःखांचा नाश करितो.

अवतरणिका-नन्वयं मंत्रः शिववत्संसारक्षयकारकश्चेत् विश्वकारणत्वं च तद्वदस्ति किमित्यत्राह—

श्लोकः-पंचभूतानि सर्वाणि पंच तन्मात्रकानि च ॥

ज्ञानेंद्रियाणि पंचापि पंचकर्मेंद्रियाणि च ॥ १४ ॥

पंचब्रह्माणि पंचापि कृत्यानि सहकारणैः ॥

बोध्यानि पंचभिर्वर्णैः पंचाक्षरमहामनोः ॥ १५ ॥

व्याख्यानं—पृथिव्यादिपंचभूतानि गंधादिपंचतन्मात्राः, ज्ञानशक्तिरूपघ्राणादिपंचज्ञानेंद्रियाणि, क्रियाशक्तिरूपोपस्थादिपंचकर्मेंद्रियाणि, पंचसादाख्य-

पंचब्रह्मपर्यायाचारादिपंचलिंगानि, भवमृडहरादिकारणेशैः सहसृष्ट्यादिपंचकृत्यानि, पंचविधानि, सर्वाण्यपि, पंचाक्षरमहामंत्रस्य पंचभिर्वर्णैः बोध्यानि, प्रकाश्यानीत्यर्थः ॥ १४ ॥ १५ ॥

अर्थ–॥ १४ ॥ पंचमहाभूतें (पृथ्वी, आप्, तेज, वायु, आकाश) पंच तन्मातृका (गंध, रस, रूप, स्पर्श, शब्द,) पंच ज्ञानेंद्रिय (डोळे, कान, नाक, जीभ त्वचा) पंच कर्मेंद्रिय (त्वचा, हात पाय मूत्र शौच करण्याचीं इंद्रियें) ॥ १५ ॥ आचारलिंग, प्रसादलिंग चरलिंग, शिवलिंग आणि महालिंग हीं पांच ब्रह्में, भव, मृड, हर ह्या कारणांसह सृष्टि स्थिति, लय आविर्भाव व तिरोधान हीं पांच कृत्यें पंचाक्षर महामंत्राच्या पांच अक्षरांनीं समजून घ्यावीं.

अवतरणिका–नन्वालोकेन घटादिवत्प्रकाश्यानि वा स्वर्णकुंडलादिवत्प्रकाश्यानि वेत्यत्राह—

श्लोकः–पंचधा पंचधा यानि प्रसिद्धानि विशेषतः ॥

तानि सर्वाणि वस्तूनि पंचाक्षरमयानि हि ॥ १६ ॥

व्याख्यानं—पंचशक्तिपंचांगुलिवचनादानादिपंचकर्मेंद्रियार्थाः, मनोबुद्ध्यहंकारप्रकृतिपुरुषादीनि, पंच पंच प्रकारेण, यानि विशेषतः प्रसिद्धानि, तानि सर्वाणि, "स्वर्णकुंडलन्यायेन," पंचाक्षरमयानि पंचाक्षरकार्याणि, तत्प्रकाश्यानि चेत्यर्थः वर्णानां शक्तिरूपत्वादिति ॥ १६ ॥

अर्थ–॥ १६ ॥ परशक्ति, आदिशक्ति, इच्छाशक्ति, क्रियाशक्ति आणि ज्ञानशक्ति ह्या पांच शक्ति, पांच अंगुलि (बोटें) बोलणें, घेणें देणें करणें, चालणें मलमूत्रविसर्जन करणें वगैरे पांच कर्मेंद्रियाचीं कृत्यें मन, बुद्धि, अहंकार प्रकृति आणि पुरुष वगैरे जे पांच पांच प्रकारानें विशेषेंकरून प्रसिद्ध आहेत त्या सर्व वस्तु पंचाक्षरमंत्राचे कार्य आहेत (पंचाक्षर मंत्रानें, समजणाऱ्या आहेत.)

अवतरणिका–ननु मोक्षकारणं प्रणवः पंचाक्षर्यां तदभावात् कथं मोक्षप्रदत्वमित्यत्राह—

श्लोकः–ॐकारपूर्वो मंत्रोऽयं पंचाक्षरमयः परः ॥

शैवागमेषु वेदेषु षडक्षर इति स्मृतः ॥ १७ ॥

व्याख्यानं—परः, उक्तप्रकारेण सर्वोत्कृष्टः, पंचाक्षरमयोऽयं, मंत्रः, ॐकारपूर्वः, षडक्षर इति शिवागमेषु वेदेषु स्मृतः, श्रीरुद्रे "नमस्ताराय नमः शंभवेचेति" ईशानमंत्रांते "मे अस्तु सदाशिवोमिति च" श्रूयमाणत्वात् "ॐकारात्मतया भाति शांत्यतीतः परशिव इत्यागमोक्तेः" "शिवो वा प्रणवः प्रोक्तः प्रणवो वा शिवः

स्मृतः, वाच्यवाचकयोर्भेदो नात्यंतं विद्यते क्वचिदिति" पौराणिकोक्तेश्च शिवप्रणवयोरभेदात् ॐकारपूर्वत्वेन षडक्षर इत्यर्थः ॥ १७ ॥

अर्थ–॥ १७ ॥ ह्या शिवपंचाक्षरीमंत्राच्या अगोदर ॐकार उच्चार करावा लागतो ह्यामुळें शैवागमांत आणि वेदांत ह्या मंत्रास षडक्षरी मंत्र ह्मणून मानला आहे.

अवतरणिका–अथ "प्रथमं तारकारूपं द्वितीयं दंड उच्यते॥ तृतीयं कुंडलाकारं चतुर्थं चार्धचंद्रकम् ॥ पंचमं दर्पणाकारं षष्ठं ज्योतिःस्वरूपकम्॥ नकारस्तारकारूपं मकारो दंड उच्यते ॥ शिकारः कुंडलाकारो वकारश्चार्धचंद्रकः॥ यकारो दर्पणाकार ॐकारः पंचवर्णराडिति ॥" शिवागमवचनात् पंचाक्षरकल्पतरोर्बीजभूतस्य ॐकारस्य माहात्म्यं सूत्रत्रयेण निरूपयति—

श्लोकः–मंत्रन्यासादिभूतेन प्रणवेन महामनोः ॥
प्रबोध्यते महादेवः केवलश्चित्सुखात्मकः ॥ १८ ॥

व्याख्यानं—महामंत्ररूपस्यास्य, पंचाक्षरमंत्रस्यादिभूतेन, प्रणवेन सच्चिदानंदात्मकः परशिवः, प्रकाश्यत इत्यर्थः "यो वै रुद्रः, स भगवानित्युपक्रम्य य ॐकारः, स प्रणवो, यः प्रणवः स सर्वव्यापी, यस्सर्वव्यापी, सोऽनंतो, योऽनंतस्तत्तारं, यत्तारं तत्सूक्ष्मं, यत्सूक्ष्मं तच्छुक्लं, यच्छुक्लं, तद्वैद्युतं, यद्वैद्युतं, तत्परं, ब्रह्म स एकः, स एको रुद्रः, स ईशानः, स भगवान्, स महेश्वरः, स महादेव, इत्यथर्वशिरःश्रुत्या" प्रणव एव सच्चिदानंदात्मकं परब्रह्मेति, श्रूयमाणत्वादिति, ॥ १८ ॥

अर्थ–॥ १८ ॥ ह्या शिवपंचाक्षरी महामंत्राच्या न्यासाच्या अगोदर असणाऱ्या ॐकारामुळें केवल चित्स्वरूप महादेव चांगल्या तऱ्हेनें समजून येतो. (ॐकाराच्या साधनानें शिवस्वरूप उत्तम तऱ्हेनें समजतें)

अवतरणिका–ननु शिवः प्रणवेन विना न केनापि प्रकाश्यते वेत्यत्राह—

श्लोकः–प्रणवेनैकवर्णेन परब्रह्म प्रकाश्यते ॥
अद्वितीयं परानंदं शिवाख्यं निष्प्रपंचकम् ॥ १९ ॥

व्याख्यानं—"शिवं, परात्परं, सूक्ष्मं, नित्यं, सर्वगमव्ययं," इति शिवागमोक्तेः शिवाख्यं, परानंदं, सच्चिदानंदलक्षणं, अद्वितीयं, "एकमेवाद्वितीयमिति" श्रुतेः द्वितीयशून्यं, "नेहनानास्तिकिंचनेति" श्रुतेः निष्प्रपंचकम्, अतएव प्रापंचिकभे-

दशून्यं, परंब्रह्म, प्रणवेनैकवर्णेन, प्रणवरूपैकवर्णेन, प्रणवेनैवेत्यर्थः, प्रकाश्यते, प्रबोध्यते, प्रणवांशीभूताकारोकारमकाराणां, सच्चिदानंदवाचकत्वादिति, एवं च नमश्शिवायेति, पंचाक्षराण्याचारगुरुशिवचरप्रसादलिंगबीजाक्षराणि, ॐकारो महालिंगबीजमिति, बीजवृक्षरूपप्रणवपंचाक्षर एव, षट्स्थलबीजमिति तात्पर्यं ॥ १९ ॥

अर्थ–॥ १९ ॥ फक्त एका ॐकार ह्याच अक्षरावरून परब्रह्मस्वरूप स्पष्ट समजून येतें, त्या परब्रह्माची कोणाच्यानें बरोबरी करवत नाहीं, त्या परब्रह्माचा आनंद अपरंपार आहे त्याचें नांव शिव असून त्याला प्रपंच नाहीं.

अवतरणिका–नन्वस्य लिंगांगषट्स्थलयोगकारणस्य प्रणवस्य सच्चिदानंदलक्षणब्रह्मप्रकाशकत्वमस्तु निष्प्रपंचब्रह्मप्रतिपादकत्वं कथमित्यत्राजपगायत्रीमंत्रयोगपूर्वकम् तत्स्वरूपं प्रदर्शयति—

श्लोकः–परमात्ममनुर्ज्ञेयस्सोऽहंरूपस्सनातनः ॥
जायते हंसयोर्लोपादोमित्येकाक्षरो मनुः ॥ २० ॥

व्याख्यानं—परमात्ममनुः, परमात्ममंत्रः, सोऽहंरूपः, प्रत्यभिज्ञानरूप इति ज्ञेयः, "योऽसौ पुरुषः, सोऽहमिति" श्रुतिगुरूपदेशस्वानुभवैर्विज्ञातुं योग्यः, एवं प्रतिदिनं, षट्शताधिकमेकविंशतिसहस्रसंख्यातं, जपित्वाथास्य भेदघटितत्वात्केवलकुंभकेन, सकारहकारयोस्त्यागात्, सनातनः नित्यः, ओमित्येकाक्षरमनुर्जायते, ततः किमितिचेत्, उच्यते, सकारस्य चंद्रबीजत्वेन, वेद्यरूपत्वात्, हकारस्यार्कबीजत्वेन वेदनरूपत्वात्, एवं रूपसकारहकारयोस्त्यागात्, वृत्तिशून्यवेदकमात्रप्रकाशकरूप ॐकार एवावशिष्यत इति, निष्प्रपंचब्रह्मप्रतिपादकः, प्रणव इत्युक्तं भवति, तेन शिवजीवैक्यलक्षणलिंगांगसामरस्यरूपश्रुत्यागमप्रसिद्धपरमुक्तिरिति बोध्यं ॥ २० ॥

अर्थ–॥ २० ॥ हा शिवपंचाक्षरीमंत्र परमेश्वराचा मंत्र आहे तो परमेश्वर (मंत्र) सोऽहं (तो मी) अशा स्वरूपाचा असून अनादि आहे. "हंस" ह्या दोन अक्षरांचा मिळून लोप होऊन ॐ असा एकाक्षरी शब्द तयार झालेला आहे. व तो श्रेष्ठ मंत्र आहे.

अवतरणिका–एवंस्थिते प्रणवेन निष्कलज्ञानं पंचाक्षर्या सकलज्ञानं प्रणवसहितपंचाक्षर्या सकलनिष्कलमिति सूत्रद्वयेन प्रतिपादयति—

श्लोकः–प्रणवेनैव मंत्रेण बोध्यते निष्कलः शिवः ॥
पंचाक्षरेण मंत्रेण पंचब्रह्मतनुस्तथा ॥ २१ ॥

निष्कलः संविदाकारस्सकलो विश्वमूर्तितः ॥
उभयात्मा शिवो मंत्रे षडक्षरमये स्थितः ॥ २२ ॥

व्याख्यानं—अत्र निष्कलशब्देन, शुद्धचिद्रूपत्वमुच्यते, सकलशब्देन, प्रपंचविशिष्टत्वमुच्यते, एवं च प्रणवमंत्रेणैव, निष्कलः शिवः, सच्चिदानंदात्मकः, परशिवः, बोध्यते प्रकाश्यते, पंचाक्षरेण मंत्रेण, पंचब्रह्मतनुः पंचब्रह्ममयः शिवः, तथा बोध्यते, "सर्वं खल्विदं ब्रह्मेति" श्रुतेः प्रकाश्यत इत्यर्थः उभयात्मा शिवः, सकलनिष्कलरूपः, परमात्मा, षडक्षरमये मंत्रे, प्रणवयुक्तपंचाक्षर्यां, स्थितः प्रकाशत इत्यर्थः, अत्र यद्यपि "अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ॐकारं सर्वेश्वरं द्वादशांत इति" तापनीयश्रुतेः प्रणवस्यापि, सप्रपंचब्रह्ममयत्वमेव, तथापि, वेद्यसंस्कारात्मकबिंदुघटितत्वेन, सूक्ष्मप्रपंचमयत्वान्निष्कलत्वव्यपदेशः, स्थूलप्रपंचमयस्य, पंचाक्षरमंत्रद्रुमस्य, प्रणवो बीजं, तस्य, अकारोकारमकारबिंदुनादलक्षणपंचावयवसंपन्नत्वादिति संक्षेपः ॥ २१ ॥ २२ ॥

अर्थ–॥ २१ ॥ शुद्ध चैतन्यस्वरूप ज्ञानस्वरूप, सकलस्वरूप (निर्विकार, देहधारी आणि सर्वप्राणिमात्रांच्या हृदयांत राहाणारा) असा सर्वस्वरूपी शंकर त्या षडक्षरमनूमध्यें (सहा अक्षरांच्या मंत्रांत). पूर्णपणानें राहिला आहे. ॥ २२ ॥ ॐकार मंत्राचा उच्चार केल्यानेंच शुद्ध चैतन्यस्वरूप शिवाचें यथार्थ ज्ञान होतें ॐकारापुढील "नमः शिवाय" ह्या पांच अक्षरांचा उच्चार केला ह्मणजे पंचब्रह्मस्वरूप शिवाचें यथार्थज्ञान होतें.

अवतरणिका–अथास्य पंचाक्षरमंत्रस्य पर्यायनामानि कथयति—

श्लोकः–मूलं विद्या शिवः शैवं सूत्रं पंचाक्षरस्तथा ॥
एतानि नामधेयानि कीर्तितानि महामनोः ॥ २३ ॥

व्याख्यानं—महामनोः, पंचाक्षरमहामंत्रस्य, मूलं, विद्या, शिवः, शैवसूत्रं, तथा पंचाक्षर इति, एतानि, नामधेयानि, वर्णसंख्यया कीर्तितानीत्यर्थः ॥ २३ ॥

अर्थ–॥ २३ ॥ मूल, विद्या, शिव, शैवसूत्र, आणि पंचाक्षर हीं शिवपंचाक्षरी महामंत्राचीं पर्याय नावें मानिलीं आहेत.

अवतरणिका–अथैतादृशीं पंचाक्षरीं प्रणवेन सह षडक्षरीं विद्यां जपेदित्याह—

श्लोकः–पंचाक्षरीमिमां विद्यां प्रणवेन षडक्षरीम् ॥
जपेत्समाहितो भूत्वा शिवपूजापरायणः ॥ २४ ॥

व्याख्यानं—समाहितः एकाग्रचित्तः सन्नित्यर्थः । शिष्टं स्पष्टं ॥ २४ ॥

अर्थ-॥ २४ ॥ ही पंचाक्षरी महाविद्या होय, त्यांत ॐकार हें अक्षर घातलें ह्मणजे सहा अक्षरांची विद्या होते. शिवपूजा एकनिष्ठपणानें करणाऱ्यानें सावधान होऊन हा मंत्र जपावा.

अवतरणिका-कथं जपेदित्यत्राह—

श्लोकः-प्राणायामत्रयं कृत्वा प्राङ्मुखोदङ्मुखोऽपि वा ॥
चिंतयन्हृदयांभोजे देवदेवं त्रियंबकम् ॥ २५ ॥
सर्वालंकारसंयुक्तं सांबं चंद्रार्धशेखरम् ॥
जपेदेतां महाविद्यां शिवरूपामनन्यधीः ॥ २६ ॥

व्याख्यानं—शुद्धे स्थले, मृगाजिनचित्रकंबलाद्यास्तरणे, सिद्धपद्माद्यासने, प्राङ्मुखोदङ्मुखो वोपविश्य, भस्मरुद्राक्षालंकृतः सन्, शिवलिंगपूजको भूत्वा, "असंपूज्य शिवं स्तोत्रजपात्फलमुदीरितम्, "संपूज्य च शिवं पश्चात्फलं वक्तुं न शक्यते ॥ सहस्रं वा तदर्धं वा तदर्धं वा शताष्टकम् ॥ अष्टोत्तरसहस्रं वा जपं कुर्यादतंद्रधीः ॥ पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः ॥ जपकोटिसमं ध्यानं ध्यानकोटिसमो लय इति" शिवागमवचनात् शिवपूजानंतरम्, पुनः प्राणायामं कृत्वा-करषडंगं विन्यस्य, हृदयकमले त्रियंबकं, मंडलत्रयगुणत्रयदेवत्रयादित्रिविधवस्तु, कारणीभूतं, देवदेवं, भवानीपतिं, सर्वालंकारः युक्तं, चंद्रार्धशेखरं, शिवं, अनन्यधीः, परिचिंतयन्, एकां, महाविद्यामुक्तविधेष्वेकप्रकारेण, गुरूपदिष्टमार्गेण, सगर्भजपं कुर्यादित्यर्थः ॥ २५ ॥ २६ ॥

अर्थ-॥ २५ ॥ पूर्वेकडे किंवा उत्तरेकडे तोंड करून तीन प्राणायाम करावे, व आपल्या हृदयकमलांत जो सर्व देवांचा देव आहे ज्याला त्रियंबक ह्मणतात ॥ २६ ॥ ज्यानें आपल्या आंगावर सर्वप्रकारचे अलंकार घातले असून त्यांचे जवळ पार्वती बसली आहे व मस्तकावर अर्धचंद्र ज्यानें धारण केलेला आहे, अशा शंकराचें एकनिष्ठपणानें ध्यान करून शिवमहाविद्येचा जप करावा. (ध्यान करावें).

अवतरणिका-अथ जपभेदं प्रदर्शयति—

श्लोकः-जपस्तु त्रिविधः प्रोक्तो वाचिकोपांशुमानसः ॥
श्रूयते यस्तु पार्श्वस्थैर्यथा वर्णसमन्वयः ॥ २७ ॥
वाचिकस्स तु विज्ञेयस्सर्वपापप्रभंजनः ॥
ईषत्स्पृष्टाधरपुटं यो मंदमभिधीयते ॥ २८ ॥

पार्श्वस्थैरश्रुतस्सोऽयमुपांशुः परिकीर्तितः ॥
अस्पृष्ट्वाधरमस्पंदि जिव्हाग्रं योंऽतरात्मना ॥
भाव्यते वर्णरूपेण स मानस इति स्मृतः ॥ २९ ॥

व्याख्यानं—जपः मंत्रोच्चारस्तु, वाचिक इत्युपांशुरिति, मानस इति त्रिविधः, तत्र यस्तु मंत्रोच्चारः, यथावर्णसमन्वयं, वर्णसंतानमनतिक्रम्य, पार्श्वस्थैः, श्रूयते, स मंत्रोच्चारः, मनोवचनकायजन्यसर्वपापनिवारको, वाचिकजप इति, विज्ञातुं, योग्यमित्यर्थः यः, यो मंत्रोच्चारः, किंचिदधरपुटं, स्पृष्ट्वा, पार्श्वस्थैरश्रुतः सन्, मंदमभिधीयते, सोऽयमुपांशुजप इति, परिकीर्तितः यः यो मंत्रोच्चारः अधरमस्पृष्ट्वा, अस्पंदिजिव्हाग्रं, स्पंदनरहितजिव्हाग्रं यथा भवति तथा, वर्णरूपेणांतरात्मना, मंत्राक्षरस्वरूपवता, चित्तेन, भाव्यते, सः स मंत्रोच्चारः, मानस इति, मानसजप इति स्मृत इत्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥

अर्थ–॥ २७ ॥ जपाचे तीन प्रकार आहेत, वाचिक (स्पष्ट लोकांस ऐकूं जाईल असें बोलणें) उपांशु (हळहळ) आणि तिसरा मानसिक जप होय. जो जप चालला असतां भोंवतालीं बसलेल्या इतर लोकांस तो स्पष्ट रीतीनें ऐकावयास जातो. ॥ २८ ॥ तो वाचिकजप होय. ह्या जपामुळें सर्व पातकांचा नाश होतो फक्त ओंठ हालतात इतकें दिसून येऊन जो मंत्र हळु हळ जपतात. ॥ २९ ॥ तो इतर भोंवतालीं बसणाऱ्या लोकांस मुळींच ऐकूं जात नाहीं त्यास उपांशुजप असें ह्मणतात, ज्या जपाच्या वेळीं ओंठ किंवा जीभ मुळींच हाललेली दिसत नाहींत फक्त मनांतल्या मनांत (अक्षरें स्पष्ट उच्चारून) तो जप करावा लागतो त्यास मानसजप ह्मणतात.

अवतरणिका–अथास्य जपयज्ञस्य माहात्म्यमुद्भावयति—

श्लोकः–यावंतः कर्मयज्ञाद्या व्रतदानतपांसि च ॥
सर्वे ते जपयज्ञस्य कलां नार्हंति षोडशीम् ॥ ३० ॥

व्याख्यानं—यावंतः कर्मयज्ञाद्याः, ज्योतिष्टोमादयः संति, व्रतदानतपांसि, यावंति, संति, ते सर्वे, जपयज्ञस्य, षोडशीं कलां प्रति षोडशभागेष्वेकभागं च प्रति, नार्हंति न समाना भवंतीत्यर्थः ॥ ३० ॥

अर्थ–॥ ३० ॥ कर्म, यज्ञ वगैरे उपासनेचे जितके प्रकार आहेत व्रत, दान, तप वगैरे जीं तपें आहेत तीं सर्व एकत्र केलीं तरी शिवपंचाक्षरीमहामंत्राच्या सोळाव्या हिश्शाची देखील बरोबरी करूं शकत नाहींत.

अवतरणिका-अथोक्तत्रिविधजपानां माहात्म्यमेकप्रकारं किमित्यत्राह—

श्लोकः-माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्तितम् ॥
तस्माच्छतगुणोपांशुस्सहस्रो मानसः स्मृतः ॥ ३१ ॥

व्याख्यानं—वाचिकजपस्य, यद्येतन्माहात्म्यं कीर्तितं, तस्मात् वाचिकजपात्, उपांशुजपः, शतगुणः, तस्मादुपांशोर्मानसः सहस्रः, सहस्रगुण इति स्मृत इत्यर्थः ॥ ३१ ॥

अर्थ-॥ ३१ ॥ शिवमंत्राच्या जपयज्ञाचें वर जें माहात्म्य सांगितलें तें वाचिक मंत्राचें झालें, त्यापेक्षां उपांशुमंत्राच्या जपयज्ञाचें माहात्म्य शंभरपट ज्यास्त असून त्यापेक्षां मानसिकजपयज्ञाचें माहात्म्य हजारपट ज्यास्त आहे.

अवतरणिका-तर्ह्येतेषु को वा जपः कर्तव्य इत्यत्र मोक्षार्थिभिर्मानस एव जपः कर्तव्य इत्याह—

श्लोकः-वाचिकात्तदुपांशोश्च जपादस्य महामनोः ॥
मानसो हि जपः श्रेष्ठो घोरसंसारनाशकः ॥ ३२ ॥

व्याख्यानं—अस्य महामनोः, वाचिकाज्जपादुपांशोश्च जपात्, मानसो जपः क्रूरसंसारनाशकः सन् श्रेष्ठ इत्यर्थः ॥ ३२ ॥

अर्थ-॥ ३२ ॥ महामंत्राचे वाचिक आणि उपांशु ह्या दोन प्रकारच्या जपापेक्षां मानसजप हा श्रेष्ठ आहे त्या जपामुळें भयंकर अशा संसाराचें दुःख समूळ नाहींसें होतें.

अवतरणिका-तर्हि तयोः का गतिरित्यत्राह—

श्लोकः-एतेष्वेतेन विधिना यथाभावं यथाक्रमम् ॥
जपेत्पंचाक्षरीमेतां विद्यां पाशविमुक्तये ॥ ३३ ॥

व्याख्यानं—एतेषु विषयेषु वाचिकादिजपविषयेषु एतेन विधिना एतदुक्तप्रकारेण यथाक्रमं क्रममनतिक्रम्य यथाभावं यथासंभवम् एतां पंचाक्षरीं विद्यां पाशविमुक्तये मलमायादिपंचपाशविमुक्त्यर्थं जपेत्। उच्चरेदित्यर्थः ॥ ३३ ॥

अर्थ-॥ ३३ ॥ हे तीन प्रकार जपयज्ञाचे सांगितले आहेत त्या पैकीं योग्य विधानानें भक्तिभावानें यथाक्रमानें शिवपंचाक्षरीविद्येचा जप करावा, त्यामुळें पाशांतून सुटका होते.

अवतरणिका–अथ अनेनैव मंत्रेण शिवलिंगार्चनं च कर्तव्यमित्याह—

श्लोकः–अनेन मूलमंत्रेण शिवलिंगं प्रपूजयेत् ॥
नित्यं नियमसंपन्नः प्रयतात्मा शिवात्मकः ॥ ३४ ॥

व्याख्यानं—नियमसंपन्नः, यमनियमादिसंपन्नः, सन्, प्रयतात्मा शुद्धांतःकरणवान् सन्, शिवात्मकः "नारुद्रो रुद्रमर्चयेदिति" श्रुतेः शिवभावसंपन्नः, अनेन मूलमंत्रेण, एतत्प्रणवपंचाक्षरमंत्रेण, शिवलिंगं, नित्यं, सदा, पूजयेत् विभवेन पूजयेदित्यर्थः ॥ ३४ ॥

अर्थ–॥ ३४ ॥ शिवध्यानांत निमग्न झालेल्या इंद्रियनिग्रहवान् शिवभक्तानें नित्य सदाचाराचे सर्व नियम पाळून ह्या मूलमंत्रानें शिवलिंगाची पूजा करावी.

अवतरणिका–नन्वस्य समंत्रकशिवपूजनस्य किं फलमित्यत्राह—

श्लोकः–भक्त्या पंचाक्षरेणैव यश्शिवं सकृदर्चयेत् ॥
सोऽपि गच्छेच्छिवस्थानं मंत्रस्यास्यैव गौरवात् ॥ ३५ ॥

व्याख्यानं—स्पष्टं ॥ ३५ ॥

अर्थ–॥ ३५ ॥ भक्तिपूर्वक ह्या शिवपंचाक्षरी मंत्रानें जो मनुष्य शिवाची एकवेळ पूजा करील तो देखील ह्या मंत्राच्या सामर्थ्यानें शिवलोकास जाईल.

अवतरणिका–ननु व्रतनियमादिना सद्गतिसंभवात् पूजा किमर्थं विधेयेत्यत्राह—

श्लोकः–अब्भक्षा वायुभक्षाश्च ये चान्ये व्रतकर्शिताः ॥
तेषामेतैर्व्रतैर्नास्ति शिवलोकसमागमः ॥ ३६ ॥

व्याख्यानं—अब्भक्षाः जलाहारिणः, वायुभक्षाश्च वायुपर्णाहारिणः, ये चान्ये व्रतकर्शिताः कृच्छ्रचांद्रायणादिव्रतकृशाः, ये संति, तेषामेतैर्व्रतैः, शिवलोकप्राप्तिर्नास्तीत्यर्थः ॥ ३६ ॥

अर्थ–॥ ३६ ॥ जे कितीएक ऋषि नुसतें पाणी पिऊन राहतात, किंवा वायुभक्षण करून राहतात व तसेच जे कोणी खडतर तपश्चर्या करितात त्या तपश्चर्येनें देखील त्यांस शिवलोकाची प्राप्ति होत नाहीं ती शिवभक्तांस शिवपंचाक्षरी मंत्रानें सहज होते.

अवतरणिका–तस्माज्जपयज्ञादयस्सर्वे लिंगार्चनस्य कोट्यंशेनापि नो समा इत्याह—

श्लोकः–तस्मात्तपांसि यज्ञाश्च व्रतानि नियमास्तथा ॥
पंचाक्षरार्चनस्यैते कोट्यंशेनापि नो समाः ॥ ३७ ॥

व्याख्यानं—स्पष्टं ॥ ३७ ॥

अर्थ–॥ ३७ ॥ ह्यासाठीं तीं तपें, यज्ञ, व्रत आणि नियम हे शिवपंचाक्षरी मंत्राच्या एक कोट्यंशाची देखील बरोबरी करूं शकत नाहींत. ह्या सर्वांपेक्षां शिवपंचाक्षरीमंत्र एक कोटपट ज्यास्त श्रेष्ठ आहे.

अवतरणिका–ननु शिवार्चने निर्मलज्ञानादिसंपन्नोऽधिकारीत्युक्तत्वात् अशुद्धबुद्धीनां का गतिरित्यत्राह—

श्लोकः–अशुद्धो वा विशुद्धो वा सकृत्पंचाक्षरेण यः ॥
पूजयेत्पतितो वापि मुच्यते नात्र संशयः ॥ ३८ ॥

व्याख्यानं—पतितः व्रतभ्रष्ट इत्यर्थः. मुच्यते सर्वपापैः प्रमुच्यते इत्यर्थः,॥३८॥

अर्थ–॥ ३८ ॥ पातकी असो, पुण्यवान् असो किंवा पतित असो, एकवेळ जर शिवपंचाक्षरीमंत्राचा जप करून पूजा करील तर तो मुक्त होतो ह्यांत शंका नाहीं.

अवतरणिका–अथ पंचाक्षरमंत्रस्य सकृदुच्चारणादेव सर्वेषामपि सर्वपापक्षयः स्यादित्याह—

श्लोकः–सकृदुच्चारमात्रेण पंचाक्षरमहामनोः ॥
सर्वेषामपि जंतूनां सर्वपापक्षयो भवेत् ॥ ३९ ॥

व्याख्यानं—स्पष्टं ॥ ३९ ॥

अर्थ–॥३९॥ पंचाक्षर महामंत्राचा एकवेळ उच्चार केला तरी सर्व प्राणिमात्रांच्या सर्व पातकांचा नाश होतो.

अवतरणिका–ननु शिवागमप्रसिद्धा मंत्रा बहवस्संति तेभ्यः कस्मादस्य वैशिष्ट्यमित्यत्राह—

श्लोकः–अन्येऽपि बहवो मंत्रा विद्यंते सकलागमे ॥
भूयो भूयस्समभ्यासात्पुरुषार्थप्रदायिनः ॥ ४० ॥

एष मंत्रो महाशक्तिरीश्वरप्रतिपादकः ॥
सकृदुच्चारणादेव सर्वसिद्धिप्रदायकः ॥ ४१ ॥

व्याख्यानं—सकलागमे समस्तशिवागमे, एतत्पंचाक्षरीव्यतिरिक्तमंत्रा बहवः संति, ते पुरश्चरणबाहुल्यात्पुरुषार्थप्रदायिनः, एषः पंचाक्षरमंत्रः महाशक्तिः महासामर्थ्यवान्, ईश्वरस्य विश्वमयविश्वोत्तीर्णसामरस्यलक्षणमाहात्म्यप्रतिपादकः, तस्मात्, "सकृदुच्चारणादेव सर्वसिद्धिप्रदायकः" इत्यस्य वैशिष्ट्यमित्यर्थः॥४०॥४१॥

अर्थ–॥ ४० ॥ वरचेवर वरचेवर त्यांचा सारखा अभ्यास केला तर आपले सर्व मनोरथ परिपूर्ण होतात. असे मंत्र शिवागमांत अनेक आहेत. ॥ ४१ ॥ त्या सर्वांत ईश्वराची (शंकराची) अद्भुत शक्ति प्रतिपादन करणारा शिवपंचाक्षरी मंत्र महासामर्थ्यवान् आहे. एक वेळ त्याचा उच्चार केला तरी सर्व सिद्धींची प्राप्ति होते.

अवतरणिका–अथ समंत्रकपूजाफलं प्रकाशयति—

श्लोकः–पंचाक्षरीं समुच्चार्य पुष्पं लिंगे विनिक्षिपेत् ॥
यस्तस्य वाजपेयानां सहस्रफलमिष्यते ॥ ४२ ॥

व्याख्यानं—निक्षिपेत् समर्पयेदित्यर्थः, शिष्टं स्पष्टं, ॥ ४२ ॥

अर्थ–॥ ४२ ॥ अशा ह्या शिवपंचाक्षरीमंत्राचा जप करून जो कोणी मनुष्य लिंगास फूल वाहतो त्याला हजार वाजपेययज्ञ केल्याचें श्रेय येतें.

अवतरणिका–अथ पंचाक्षरीजपफलं प्रकाशयति—

श्लोकः–अग्निहोत्रं त्रयो वेदा यज्ञाश्च बहुदक्षिणाः ॥
पंचाक्षरजपस्यैते कोट्यंशेनापि नो समाः ॥ ४३ ॥

व्याख्यानं—अग्निहोत्रं सायंप्रातर्विधीयमानाग्निहोत्रं, त्रयो वेदाः ऋग्यजुः-सामाध्ययनं, यज्ञाः ज्योतिष्टोमाद्याः, बहुदक्षिणाः षोडशमहादानरूपाः, एते, पंचाक्षरजपस्य, कोट्यंशेनापि, समाना न भवंतीत्यर्थः ॥ ४३ ॥

अर्थ–॥ ४३ ॥ अग्निहोत्र, ऋग्वेद, यजुर्वेद, सामवेद वगैरे तीन वेद, पुष्कळ दक्षिणा दिलेले यज्ञ शिवपंचाक्षरी मंत्राच्या कोटि हिश्शाची देखील बरोबरी करूं शकत नाहींत.

अवतरणिका–अथैतन्मंत्रसिद्धिमतां महापुरुषाणां माहात्म्यप्रतिपादनद्वारा तस्याधिक्यं वर्णयति—

श्लोकः–पुरा सानंदयोगींद्रः शिवज्ञानपरायणः ॥
पंचाक्षरं समुच्चार्य नारकानुदतारयत् ॥ ४४ ॥

व्याख्यानं—पुरा, शिवज्ञानयोगनिष्ठः, सानंदगणेशः, पंचाक्षरमंत्रं वाचकरूपेणोच्चार्य, नारकान् अष्टाविंशतिकोटिनायकनरकस्थितान्, पापिनः, उदतारयत् उद्धृतवानित्यर्थः ॥ ४४ ॥

अर्थ–॥ ४४ ॥ पूर्वी शिवज्ञानांत पारंगत असणाऱ्या सानंदगणेश्वरानें शिवपंचाक्षरीमंत्राचा उच्चार (जप) करून अनेक नारकी जीवांचा (अठ्ठावीस कोट नारकांचा) उद्धार केला.

श्लोकः–सिद्ध्या पंचाक्षरस्यास्य शतानंदः पुरा मुनिः ॥
नरकं स्वर्गमकरोत्संगिरस्यापि पापिनः ॥ ४५ ॥

व्याख्यानं—पुरा, शतानंदः, पंचाक्षरीजपस्य सिद्ध्या, पापिनः संगिरस्य, नरकमपि स्वर्गमकरोदित्यर्थः, ॥ ४५ ॥

अर्थ–॥ ४५ ॥ पूर्वी शतानंद नांवाच्या ऋषीनें शिवपंचाक्षरीमंत्राच्या सामर्थ्यानें (सिद्धीमुळें) संगिर नांवाच्या पातक्याला नरक देखील स्वर्गाप्रमाणें वाटला त्याला नरकांतून काढून स्वर्गसुखांत नेऊन ठेविलें.

श्लोकः–उपमन्युः पुरा योगी मंत्रेणानेन सिद्धिमान् ॥
लब्धवान्परमेशानाच्छैवशास्त्रप्रवक्तृताम् ॥ ४६ ॥

व्याख्यानं—शिवशास्त्राचार्यतां लब्धवानित्यर्थः ॥ ४६ ॥

अर्थ–॥ ४६ ॥ पूर्वी उपमन्यु नांवाच्या योग्यानें ह्याच मंत्राच्या सामर्थ्यानें सिद्धि मिळविली व त्या श्रेष्ठ शिवापासून शिवशास्त्रांचा आचार्यपणा मिळविला (आचार्य झाला.)

श्लोकः–वसिष्ठवामदेवाद्या मुनयो मुक्तकिल्बिषाः ॥
मंत्रेणानेन संसिद्धा महातेजस्विनोऽभवन् ॥ ४७ ॥

व्याख्यानं—मुक्तकिल्बिषाः विमुक्तपापकर्माणः, वसिष्ठवामदेवाद्या ऋषयः, अनेन पंचाक्षरमंत्रेण, सिद्धिमंतः संतः, महातेजस्विनः, शापानुग्रहसमर्था, अभवन्नित्यर्थः ॥ ४७ ॥

अर्थ–॥ ४७ ॥ वसिष्ठ, वामदेव वगैरे मुनीश्वर ह्या शिवपंचाक्षरीमंत्रामुळें निष्पाप व सिद्धिमंत होऊन मोठे सामर्थ्यवान् (निग्रहानुग्रहसमर्थ) झाले.

अवतरणिका–अथ ब्रह्मादयोऽप्येतन्मंत्रसामर्थ्यादेव सृष्ट्यादिकृत्याधिकारिणो जाता इत्याह—

श्लोकः–ब्रह्मादीनां च देवानां जगत्सृष्ट्यादिकर्मणि ॥
मंत्रस्यास्यैव माहात्म्यात्सामर्थ्यमुपजायते ॥ ४८ ॥

व्याख्यानं—ब्रह्मविष्णुरुद्रादिदेवानां, विश्वसृष्टिस्थितिसंहारादिकर्मणि, सामर्थ्यमस्य मंत्रस्य, प्रभावादेवेत्यर्थः ॥ ४८ ॥

अर्थ-॥ ४८ ॥ ब्रह्मदेव वगैरे देवांस जग निर्माण करण्याच्या वगैरे कामांत ह्या शिवपंचाक्षरीमंत्राच्या माहात्म्यामुळेंच सामर्थ्य येतें.

अवतरणिका-किं बहुना अस्य प्रणवसहितषडक्षरमंत्रस्य जपेन तत्कृतशिवलिंगपूजनेन च मोक्षमेवाप्नोतीत्युक्त्वा पंचाक्षरीजपस्थलं समापयति—

वृत्तम्-किमिह बहुभिरुक्तैर्मंत्रमेवं महात्मा
प्रणवसहितमादौ यस्तु पंचाक्षराख्यं ॥
जपति परमभक्त्या पूजयन् देवदेवं
स गतदुरितबंधो मोक्षलक्ष्मीं प्रयाति ॥ ४९ ॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना माहेश्वरेण विरचिते सिद्धान्तशिखामणौ भक्तस्थले पंचाक्षरीजपप्रसंगो नाम अष्टमपरिच्छेदः समाप्तः

व्याख्यानं—स्पष्टं ॥ ४९ ॥

अवतरणिका-अत्र यादिसृष्टिषडक्षर्या शरीरन्यासं नादिप्रणवांतसंहारपंचाक्षर्याऽगन्यासं शिवाय नमः ओमिति स्थितिपंचाक्षर्या करन्यासं कृत्वा गुरूपदिष्टमार्गेण प्रणवपंचाक्षरीं जपेत् स्त्रीशूद्रादिजातीनां शिवाय नम इति जपविधिः—

इति पंचाक्षरीजपस्थलम् ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां भक्तस्थले पंचाक्षरीजपप्रसंगो नाम अष्टमः परिच्छेदः समाप्तः

अर्थ-॥ ४९ ॥ फार सांगण्यांत काय अर्थ आहे? हा मंत्र मोठा शक्तिमान आहे. ह्या मंत्राच्या अगोदर ॐकाराचा उच्चार करावा लागत असून त्यापुढें "नमः शिवाय" अशीं पवित्र पांच अक्षरें आहेत, हा मंत्र भक्तिपूर्वक वारंवार जपून जो मनुष्य सर्व देवांचा देव (शंकर) ह्याची पूजा करील त्याचें पातकांचें बंधन तुटून तो मोक्षरूप लक्ष्मीचा उपभोग घेतो. (मोक्षास जातो.)

ह्या प्रमाणें वीरशैवांच्या धर्माचें निर्णय असलेल्या सिद्धान्तशिखामणींतील भक्तस्थलांतील पंचाक्षरीजपाचें वर्णन असलेला हा आठवा परिच्छेद संपला.

अथ नवमपरिच्छेदः प्रारभ्यते ।

भक्तमार्गक्रियास्थलम् ॥

अवतरणिका–अथ भक्तमार्गक्रियास्थलं निरूपयितुं पूर्वमुक्तमपि भक्तस्थलं विशेषतः स्मारयति श्रीरेणुकः—

श्लोकः–भूतिरुद्राक्षसंयुक्तो लिंगधारी सदाशिवः ॥
पंचाक्षरजपोद्योगी शिवभक्त इति स्मृतः ॥ १ ॥

व्याख्यानं—स्पष्टं ॥ १ ॥

अर्थ–॥ १ ॥ विभूति कपाळास लावणारा, रुद्राक्षमाळा गळ्यांत घालणारा, लिंगधारण करणारा, नेहमीं निष्पापरीतीचें वर्तन करणारा, शिवपंचाक्षरीजप करणारा, योगी असेल त्यास शिवभक्त ह्मणावें.

अवतरणिका–भक्तिभेदं निरूपयति—

श्लोकः–श्रवणं कीर्तनं शंभोः स्मरणं पादसेवनम् ॥
अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥ २ ॥
एवं नवविधा भक्तिः प्रोक्ता देवेन शंभुना ॥
दुर्लभा पापिनां लोके सुलभा पुण्यकर्मणाम् ॥ ३ ॥

व्याख्यानं—शंभोः श्रवणं शिवकथाश्रवणं, कीर्तनं स्तोत्रं, स्मरणं ध्यानं, पादसेवनं पादमर्दनम्, अर्चनम् पूजनम्, वंदनम् नतिः, दास्यं भृत्यत्वं, सख्यं मित्रत्वं, आत्मनिवेदनं स्वात्मसमर्पणम्, एवं भक्तिर्नवविधेति, क्रीडाशीलेन देवेन, प्रोक्ता, लोके पापिनां दुर्लभा, पुण्यकर्मणाम् धर्मशालिनाम् सुलभेत्यर्थः ॥ २ ॥ ३ ॥

अर्थ–॥ २ ॥ शंभूचे गुणानुवाद श्रवण करणें, शंभूचे गुण नेहमीं वर्णन करणें, (स्तोत्रकरणें) शंभूचें ध्यान करणें, शंभूच्या चरणांची सेवा करणें, शंभूचें पूजन करणें, शंभूस वंदन करणें, शंभूचें दास्य करणें, शंभूशीं स्नेह करणें व शंभूस आपलें सर्वस्व अर्पण करणें. ॥ ३ ॥ असे हे भक्तीचे नऊ प्रकार शंकरांनीं सांगितले आहेत, ही नऊ प्रकारची शिवभक्ति पातकी लोकांस दुर्मिळ आहे, (पातकी लोकांच्या हातून ही शिवभक्ति घडत नाहीं) पुण्यवान् लोकांच्या हातून सहज घडते.

अवतरणिका–अथैवंविधभक्तिमानेव भक्त इत्याह—

श्लोकः–अधमे चोत्तमे वापि यत्र कुत्रचिदूर्जिता ॥
वर्तते शांकरी भक्तिस्स भक्त इति गीयते ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ-॥ ४ ॥ मनुष्य अधम असो किंवा उत्तम असो, ज्या कोणत्याही मनुष्याच्या आंगीं शिवभक्ति ज्यास्त असेल त्यास शिवभक्त ह्मणावें.

अवतरणिका-अथ भक्तिमानेव शिवप्रिय इत्याह—

श्लोकः-भक्तिः स्थिरीकृता यस्मिन् म्लेच्छे वा द्विजसत्तमे ॥
शंभोः प्रियः स विप्रश्च न प्रियो भक्तिवर्जितः ॥ ५ ॥

व्याख्यानं—स्पष्टं ॥ ५ ॥

अर्थ-॥ ५ ॥ ज्या कोणाच्या आंगीं शिवभक्ति आहे मग तो ब्राह्मण असो किंवा नीच जातीचा मनुष्य असो तो शंकरास प्रिय होतो. जातीचा ब्राह्मण असूनही तो शिवभक्ति करणारा नसेल तर तो शंकरास प्रिय होत नाहीं.

अवतरणिका-अनेन पूर्वोक्तोत्तमाधमावपि स्फुटीकृतौ ॥ अथ सा भक्तिर्द्विविधेत्याह—

श्लोकः-सा भक्तिर्द्विविधा ज्ञेया बाह्याभ्यंतरभेदतः ॥
बाह्या स्थूलांतरा सूक्ष्मा वीरमाहेश्वरादृता ॥ ६ ॥

व्याख्यानं—वीरमाहेश्वरप्रीतिविषयिणी भक्तिर्बाह्याभ्यंतरलक्षणस्थूलसूक्ष्मभेदेन द्विविधेत्यर्थः ॥ ६ ॥

अर्थ-॥ ६ ॥ त्या शिवभक्तीचे दोन भेद आहेत. एक बाह्य आणि दुसरी आभ्यंतर. बाह्यभक्तीस स्थूलभक्ति ह्मणतात आणि आभ्यंतर भक्तीस सूक्ष्म भक्ति ह्मणतात. अशी भक्ति वीरमाहेश्वरलोक आवडीनें करितात,

अवतरणिका-अथ का नाम बाह्येत्यत्राह—

श्लोकः-सिंहासने शुद्धदेशे सुरम्ये रत्नचित्रिते ॥
शिवलिंगस्य पूजा या सा बाह्या भक्तिरुच्यते ॥ ७ ॥

व्याख्यानं—सुरम्ये अत्यंतमनोहरे, शुद्धदेशे षट्संमार्जनपरिशुद्धस्थाने, रत्नचित्रिते नवरत्नैर्विचित्रीकृते, सिंहासने सिंहविष्टरे, शिवलिंगस्य, या पूजा, सा बाह्या, भक्तिरित्युच्यत इत्यर्थः ॥ ७ ॥

अर्थ-॥ ७ ॥ पवित्र ठिकाणीं सुशोभित अशा रत्नखचितसिंहासनावर जी शिवलिंगाची पूजा करितात तिला बाह्य भक्ति ह्मणतात.

अवतरणिका-एवं शिवभक्तविधीयमानां बाह्यां भक्तिमुक्त्वाऽथ शिवयोगिविधीयमानामांतरां भक्तिमुपपादयति—

श्लोकः–लिंगे प्राणं समाधाय प्राणे लिंगं तु शांभवम् ॥
स्वस्थं मनस्तथा कृत्वा न किंचिच्चिंतयेद्यदि ॥ ८ ॥
साभ्यंतरा भक्तिरिति प्रोच्यते शिवयोगिभिः ॥
सा यस्मिन्वर्तते तस्य जीवनं भ्रष्टबीजवत् ॥ ९ ॥

व्याख्यानं—शिवलिंगे प्राणं, समाधाय संस्थाप्य, प्राणे जीवकलारूपे प्राणे शांभवं लिंगं तु शिवकलारूपं लिंगं, समाधाय संस्थाप्य, मनः स्वस्थं, कृत्वा, यदि न किंचिच्चिंतयेत् सा, लिंगप्राणसमरसरूपा चिंता, आभ्यंतरा भक्तिरिति शिवयोगिभिः प्रोच्यते साऽभ्यंतरा भक्तिर्यस्मिन्वर्तते, तस्य जीवनं भ्रष्टबीजवत् भर्जितबीजवत् पुनर्न जननकारणमित्यर्थः ॥ ८ ॥ ९ ॥

अर्थ–॥ ८ ॥ शिवलिंगावर प्राण ठेवून व प्राणावर शिवलिंग ठेवून स्वस्थ मन करून कांहीं एक मनांत दुसरा तिसरा विचार आणावयाचा नाहीं. ॥ ९ ॥ ती आभ्यंतर शिवभक्ति होय असें शिवयोगी लोक मानतात, ती शिवभक्ति ज्याच्या आंगांत आहे त्याचें जीवन भाजलेल्या बियासारखें समजावें. भाजलेलें जसें बीं पुन्हां उगवत नाहीं तसेंच त्याच्या हातून कर्म घडत नसल्यानें त्यास पुन्हा जन्म घ्यावा लागत नाहीं.

अवतरणिका–एवं निर्बीजदीक्षा प्रसिद्धाऽभ्यंतरभक्तिमानेव मुक्त इत्याह—

श्लोकः–बहुनात्र किमुक्तेन गुह्याद्गुह्यतरा परा ॥
शिवभक्तिर्न संदेहस्तया युक्तो विमुच्यते ॥ १० ॥

व्याख्यानं—स्पष्टं ॥ १० ॥

अर्थ–॥ १० ॥ फार सांगण्यांत अर्थ नाहीं. शिवाची भक्ति गुप्तगोष्टीहून गुप्तगोष्ट आहे, व श्रेष्ठ आहे, ती शिवभक्ति ज्याचे आंगीं असेल तो मुक्त होतो ह्यांत कांहीं संशय नाहीं.

अवतरणिका–नन्वेतादृशी भक्तिः कस्माद्भवतीत्यत्राह—

श्लोकः–प्रसादादेव सा भक्तिः प्रसादो भक्तिसंभवः ॥
यथैवांकुरतो बीजं बीजतो वा यथांकुरः ॥ ११ ॥

व्याख्यानं—स्पष्टं ॥ ११ ॥

अर्थ–॥ ११ ॥ प्रसादामुळें (शिवकृपेमुळें) ती शिवभक्ति घडते (होते)

आणि तो प्रसाद (शिवकृपा) भक्तीमुळें प्राप्त होतो. जसें बियापासून अंकुर होतो व अंकुरापासून बीज होतें तशीच प्रसाद आणि भक्ति ह्यांची स्थिति आहे.

अवतरणिका-अथैवंरूपा भक्तिरेकेनैव जन्मना दुर्लभेत्याह-

श्लोकः-प्रसादपूर्विका येयं भक्तिर्मुक्तिविधायिनी ॥
नैव सा शक्यते प्राप्तुं नरैरेकेन जन्मना ॥ १२ ॥

व्याख्यानं-स्पष्टं ॥ १२ ॥

अर्थ-॥ १२ ॥ ही भक्ति उत्पन्न होण्याच्या अगोदर प्रसाद (शिवकृपा) व्हावा लागतो. भक्ति असली ह्मणजे तिच्या साधनानें मुक्ति प्राप्त होते ती भक्ति मनुष्यांस एकाच जन्मांत प्राप्त होत नाहीं, अनेक जन्मांत पुण्य केलें असतें त्या पुण्याच्या सामर्थ्यानें भक्ति प्राप्त होते.

अवतरणिका-तर्हि कतिजन्मभिर्लभ्यतेत्यत्राह—

श्लोकः-अनेकजन्मशुद्धानां श्रौतस्मार्तानुवर्तिनाम् ॥
विरक्तानां प्रबुद्धानां प्रसीदति महेश्वरः ॥ १३ ॥

व्याख्यानं—अनेकजन्मकृतशिवध्यानपूजादिपरिशुद्धचित्तानां श्रुतिस्मृत्युक्तनित्यनैमित्तिककर्मानुष्ठानानां काम्यकर्मनिस्पृहाणां सुज्ञानिनां शिवः प्रसन्नो भवति तत्प्रसादात्तादृशी भक्तिर्लभ्यत इत्यर्थः । म्लेच्छादीनां श्रौतस्मार्तकर्मनिष्ठत्वाभावेऽपि पूर्वजन्मनि शिवभक्तेभ्यः कृतोपकारवशात् शिवभक्तिराविर्भवेदिति भावः ॥ १३ ॥

अर्थ-॥ १३ ॥ अनेक जन्मांत ज्यांनीं चांगलें आचरण केलें असतें, श्रौत आणि स्मार्त कर्मास अनुसरून जे लोक आपलें वर्तन ठेवितात, जे विरक्त आणि ज्ञानसंपन्न आहेत त्यांवर शंकर प्रसन्न होतो.

अवतरणिका-नन्वनेकजन्मलभ्यशिवभक्त्या कतिजन्मभिर्मुक्तिः, सा, कीदृशी स्यादित्यत्राह—

श्लोकः-प्रसन्ने सति मुक्तोऽभून्मुक्तः शिवसमो भवेत् ॥
अल्पभक्त्यापि यो मर्त्यस्तस्य जन्मत्रयात्परम् ॥ १४ ॥

व्याख्यानं—शिवे प्रसन्ने सति मुक्तो भवेत् मुक्तः शिवसमो भवेत् यो मर्त्यस्तस्य अल्पभक्त्या जन्मत्रयात्परं मुक्तिः पूर्णभक्तिमत एकेनैव जन्मना मुक्तिरिति भावः अत्र शिवसमानत्वं शिवाभेद एव "न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुतेः" शिवसमानत्वाभावात् शिवान्निकृष्टस्य तत्समत्वासंभवात् गगनं गगनाकारमित्याद्यनन्योपमैवाभेद इति भावः "शिवस्वरूपो भवति शिवस्वरूपो भवतीति"

बृद्धजाबालश्रुतेश्च "एकेन जन्मना मुक्तिर्वीराणां तु महेश्वरि ॥ इतरेषां तु शैवानां मुक्तिर्जन्मत्रयात्परमिति" वीरागमवचनात् वीरशैवानामेकेनैव जन्मना मुक्तिः इतरेषां शैवानां जन्मत्रयात्परं मुक्तिरितिभावः ॥ १४ ॥

अर्थ-॥ १४ ॥ शंकर प्रसन्न झाले असतां मनुष्य मुक्त होतो मनुष्य मुक्त झाला ह्मणजे तो शिवस्वरूप (शंकरासारखें रूप धारण करणारा होतो). ज्या मनुष्याची भक्ति थोडी आहे त्यास शिवसारूप्याची स्थिति प्राप्त होण्यास तीन जन्म लागतात, ती भक्ति वरचेवर ज्यास्त ज्यास्त वाढत जाऊन तो भक्त तिसऱ्या जन्मांत मुक्त होतो.

अवतरणिका-ननु का नामाल्पभक्तिः मुक्तस्य पुनरुत्पत्तिरस्ति वा न वेत्यत्राह—

श्लोकः-न योनियंत्रपीडा वै भवेन्नैवात्र संशयः ॥
सांगा न्यूना च या सेवा सा भक्तिरिति कथ्यते ॥ १५॥

व्याख्यानं—"न स पुनरावर्तते न स पुनरावर्तत इति" श्रुतेः योनियंत्रपीडा पुनरुत्पत्तिः नास्ति उक्तनवविधांगयुक्ता सेवा पूर्णभक्तिः किंचिन्न्यूनाल्पभक्तिरित्यर्थः ॥

अर्थ-॥ १५ ॥ शिवभक्ताला पुन्हा जन्म घेण्याचें दुःख भोगावें लागत नाहीं ह्यांत संशय नाहीं. वर सांगितलेली नऊ प्रकारची भक्ति ज्याच्या आंगांत पूर्णपणानें राहत असेल त्याची ती सेवा पूर्ण भक्ति होय, आणि ती भक्ति थोडी कमी असेल तर तिला अल्प भक्ति असें ह्मणावें.

अवतरणिका-अथ "यद्धि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोति इति" श्रुतेः सा भक्तिस्त्रिविधेत्याह—

श्लोकः-सा पुनर्भिद्यते त्रेधा मनोवाक्कायसाधनैः ॥
शिवरूपादिचिंता या सा सेवा मानसी स्मृता ॥
जपादि वाचिकी सेवा कर्मपूजा च कायिकी ॥ १६ ॥

व्याख्यानं—सा सांगा भक्तिर्मनोवचनकायलक्षणकरणैस्त्रिधा भिन्ना भवति तत्र शिवलिंगादिस्वरूपचिंता मानसी शिवमंत्रजपस्तुतिरूपा वाचिकी कायेन विधीयमाना शिवलिंगपूजा कायिकी सेवेत्यर्थः ॥ १६ ॥

अर्थ-॥ १६ ॥ ती सेवा पुन्हा मन, वचन आणि शरीर ह्या संबंधानें तीन प्रकारची होते, शिवस्वरूपाचें मनांत नेहमीं चिंतन करणें ती मानसी सेवा होय. शिवनामाचा सतत जप करणें ही वचनसेवा होय, व शिवपूजेकरितां स्वतः आपलें

शरीर झिजवून पत्र, पुष्प, जल, बेल, नैवेद्य वगैरे प्रकारानें शिवपूजा करणें ती कायिक शिवपूजा समजावी.

अवतरणिका-अथैवंविधरूपा सेवा बाह्यादिभेदेन त्रिविधेत्याह—

श्लोकः-बाह्यमाभ्यंतरं चैव बाह्याभ्यंतरमेव वा ॥
मनोवाक्कायभेदैश्च त्रिधा तद्भजनं विदुः ॥ १७ ॥

व्याख्यानं—दीक्षात्रययुक्तमनोवाक्कायभेदवत्पूर्वोक्तभजनं बाह्यमित्याभ्यंतरमिति बाह्याभ्यंतरमिति त्रिधा विदुः अभिज्ञा जानंतीत्यर्थः ॥ १७ ॥

अर्थ-॥ १७ ॥ सेवेचे ही बाह्य आभ्यंतर आणि बाह्याभ्यंतर असे तीन भेद आहेत, त्या सेवेचे पुन्हा मन, वचन आणि शरीर ह्या संबंधानें तीन तीन भेद होतात.

अवतरणिका-अथ किमेषां स्वरूपमित्यत्र मानसादिस्वरूपकथनपूर्वकमाह—

श्लोकः-मनो महेशध्यानाढ्यं नान्यध्यानरतं मनः ॥
शिवनामरता वाणी वाङ्मता चैव नेतरा ॥ १८ ॥
लिंगैश्शिवस्य चोद्दिष्टैस्त्रिपुंड्रादिभिरंकितः ॥
शिवोपचारनिरतः कायः कायो न चेतरः ॥ १९ ॥

व्याख्यानं—उद्दिष्टैः शास्त्रोक्तैः त्रिपुंड्रादिभिः भस्मत्रिपुंड्ररुद्राक्षाभरणरूपैः शिवस्य लिंगैः चिह्नैः अंकितः मुद्रितः सन् शिवोपचारनिरतः शिवलिंगपूजातत्पर एव कायः अन्यो न काय इत्यर्थः शिष्टं स्पष्टं ॥ १८ ॥ १९ ॥

अर्थ-॥ १८ ॥ जें मन महेश्वराचें ध्यान करण्यांतच गर्क झालें असतें दुसऱ्या देवांचें ध्यान करणें त्यास आवडत नाहीं त्यालाच मन ह्मणावें, शिवनामाचा वारंवार जी आवडीनें उच्चार करिते, इतर देवांचीं नांवें घेण्याचा जिला वास्तविक त्रास होतो तिलाच वाचा ह्मणावी, दुसरीस वाचा ह्मणूं नये. ॥ १९ ॥ शिवधर्माचीं जीं लक्षणें सांगितलीं आहेत त्या तऱ्हेचीं त्रिपुंड्र वगैरे चिन्हें ज्या शरीरावर स्पष्टपणानें उमटलेलीं दिसतात, शिवार्चन करण्याचे कामांत जो नेहमीं वापरत असतो त्यालाच देह (शरीर) ह्मणावा इतरांस देहच ह्मणूं नये.

अवतरणिका-अथ बाह्यादिकं लक्षयति—

श्लोकः-अन्यात्मविदितं बाह्यं शंभोरभ्यर्चनादिकम् ॥

तदेव तु स्वसंवेद्यमाभ्यंतरमुदाहृतम् ॥
मनो महेशप्रवणं बाह्याभ्यंतरमुच्यते ॥ २० ॥

व्याख्यानं—शंभोरभ्यर्चनादिकं शिवपूजादिकर्म, अन्यात्मविदितं परदृष्टिगोचरीभूतं बाह्यं तदेव तु तदर्चनादिकं स्वसंवेद्यं परदृष्टिश्रुत्यगोचरत्वेन स्वमात्रगोचरमाभ्यंतरं मनोमहेशप्रवणं शिवलिंगासक्तं मनः बाह्याभ्यंतरम् काकाक्षिन्यायेनोभयत्र व्याप्तं इति शास्त्रज्ञैरुच्यत इत्यर्थः ॥ २० ॥

अर्थ–॥ २० ॥ आपण जें कांहीं शिवपूजन वगैरे करितों तें जर दुसऱ्यांस समजलें तर तें बाह्य शिवपूजन असें समजावें, आणि तेंच शिवपूजन आपणाखेरीज दुसऱ्या कोणांसही समजलें नाहीं तर तें आभ्यंतर शिवपूजन होय असें समजावें. मन महेश्वराचे ध्यानांतच गर्क झालेलें असल्यास तें बाह्याभ्यंतर शिवपूजन असें समजावें.

अवतरणिका–अथैवंरूपमानसादिबाह्यादित्रिविधभजनमेव पंचधा भवतीत्याह—

श्लोकः–पंचधा कथ्यते सद्भिस्तदेव भजनं पुनः ॥
तपः कर्म जपो ध्यानं ज्ञानं चेत्यनुपूर्वकम् ॥ २१ ॥

व्याख्यानं—स्पष्टं ॥ २१ ॥

अर्थ–॥ २१ ॥ विद्वान् लोकांनीं तें शिवपूजन पुन्हा पांच प्रकारचें मानलेलें आहे तें असें. १ तप, २ कर्म, ३ जप, ४ ध्यान आणि ५ ज्ञान असे 'पांच प्रकार होत.

अवतरणिका–अथ किमेषां स्वरूपमित्यत्राह—

श्लोकः–शिवार्थे देहसंशोषस्तपः कृच्छ्रादि नो मतम् ॥
शिवार्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते ॥ २२ ॥
जपः पंचाक्षराभ्यासः प्रणवाभ्यास एव वा ॥
रुद्राध्यायादिकाभ्यासो न वेदाध्ययनादिकम् ॥ २३ ॥
ध्यानं शिवस्य रूपादिचिंता नात्मादिचिंतनम् ॥
शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम् ॥
इति पंचप्रकारोऽयं शिवयज्ञः प्रकीर्तितः ॥ २४ ॥

व्याख्यानं—शिवपूजार्थं सामग्रीसंपादने शरीरसंशोष एव तपः कृच्छ्रादि कृच्छ्रचांद्रायणादिना देहशोषो न तप इति संमतम् ॥ शिवार्चा शिवलिंगपूजैव कर्मेति

विज्ञेयम् तत्फलस्य शाश्वतत्वात् बाह्यं यागादि तद्भिन्नबहुवित्तव्ययायाससाध्यज्योतिष्टोमयागादि कर्मेति नोच्यते तत्फलस्य नश्वरत्वात् वेदाध्ययनादिकं न जपः, "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन" ॥ इति भगवतैव नियमितत्वादिति किंतु पंचाक्षराभ्यासः प्रणवाभ्यास एव वा रुद्राध्यायादिकाभ्यासः आदिशब्देन अथर्वशिरश्शिखादि एतेषामावृत्तिलक्षणोऽभ्यासः जप इत्यर्थः नात्मादिचिंतनं ध्यानं परिमितशरीरेंद्रियाद्युपाधिसंवलिताहमात्मचिंतनं न ध्यानमित्यर्थः किंतु शिवस्य रूपादिचिंता शिवलिंगचिंता चंद्रशेखरत्वादिविशिष्टमूर्तिचिंता च ध्यानमित्यर्थः नान्यार्थवेदनं ज्ञानं सांख्याद्यन्यशास्त्रार्थज्ञानं न ज्ञानं किंतु शिवागमार्थविज्ञानमित्यर्थः एवंविधकायवाङ्मानसलक्षणपूजातपोजपध्यानज्ञानरूपपंचप्रकारोऽयं शिवयज्ञ इति प्रकीर्तितः ॥ २२ ॥ २३ ॥ ॥ २४ ॥

अर्थ–॥ २२ ॥ शिवकार्यासाठीं शरीर झिजविणें हें तप होय. कृच्छ्र चांद्रायण वगैरे करून देह झिजविणें हें तप नव्हे. शिवपूजन करणें हेंच कर्म होय. यज्ञयाग वगैरे बाह्यकर्म करणें हें कर्म नव्हे. ॥ २३ ॥ शिवपंचाक्षरीमंत्राचा अभ्यास करणें हा जप होय अथवा ॐ काराचा अभ्यास करणें किंवा रुद्राध्याय वगैरे पाठ करणें हाच जप होय. वेदाध्ययन करणें हा जप नव्हे. ॥ २४ ॥ शिवस्वरूपाचें चिंतन करणें ह्यालाच ध्यान ह्मणतात. दुसऱ्या कोणत्याही देवांचें किंवा वेदार्थाचें चिंतन करणें हें चिंतन नव्हे. शिवागमाच्या अर्थाची माहिती होणें ह्यालाच ज्ञान ह्मणतात इतर कोणत्याही ग्रंथाचा अर्थ समजणें हें ज्ञान नव्हे. अशा रीतीचा हा पांच प्रकारचा शिवयज्ञ सांगितला.

अवतरणिका–अथानेन पंचयज्ञेन परया भक्त्या यः शंकरं पूजयति स भक्त इत्याह—

श्लोकः–अनेन पंचयज्ञेन यः पूजयति शंकरम् ॥
भक्त्या परमया युक्तस्स वै भक्त इतीरितः ॥ २५ ॥

व्याख्यानं—स्पष्टं ॥ २५ ॥

अर्थ–॥ २५ ॥ ह्या पांच प्रकारच्या यज्ञानें जो मनुष्य भक्तिपूर्वक शंकराची पूजा करितो त्यास भक्त असें ह्मणावें.

अवतरणिका–अथैवंविधशिवभक्तपूजने सद्गतिरवमाने घोरनरक इत्याह—

श्लोकः–पूजनाच्छिवभक्तस्य पुण्या गतिरवाप्यते ॥
अवमानान्महाघोरो नरको नात्र संशयः ॥ २६ ॥

व्याख्यानं—स्पष्टं ॥ २६ ॥

अर्थ-॥ २६ ॥ शिवभक्ताला शिवपूजन केल्याचें पुण्य लागून त्यास स्वर्गसुखाची प्राप्ति होते तोच भक्त जर शिवपूजनाचा अपमान करील तर त्यास भयंकर नरकवासाचें दुःख भोगावें लागेल ह्यांत शंका नाहीं.

अवतरणिका-अथ शिवभक्तस्य विधेयाविधेयमाह—

श्लोकः-शिवभक्तो महातेजाश्शिवभक्तिपराङ्मुखान् ॥
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत्कचित् ॥ २७ ॥

व्याख्यानं—शिवभक्तो महातेजस्वी भवति तस्मादशिवभक्तानां दर्शनस्पर्शनसहवासं सकृदपि न कुर्यात् यदि कुर्यात्तेजोमांद्यं भवेदिति भावः ॥ २७ ॥

अर्थ-॥ २७ ॥ शिवाची भक्ति करणारा मनुष्य महान् तेजस्वी समजावा; शिवाची भक्ति न करणारे लोक असतील त्यांस शिवूं नये, त्यांचें तोंड पाहूं, नये व त्यांच्या सहवासास देखील राहूं नये.

अवतरणिका-अथ विधेयमाह—

श्लोकः-यदा दीक्षाप्रवेशः स्याल्लिंगधारणपूर्वकः ॥
तदाभृप्रति भक्तोऽसौ पूजयेत्स्वागमस्थितान्॥ २८ ॥

व्याख्यानं—लिंगदीक्षानंतरं, भक्तः स्वागमस्थितान्, वीरशैवागमस्थितान्, प्रतिदिनं पूजयेदित्यर्थः ॥ २८ ॥

अर्थ-॥ २८ ॥ जेव्हां मनुष्यास लिंग धारण अगोदर करून नंतर शिवदीक्षेचा विधि होतो, त्या दिवसापासून त्यास भक्त असें ह्मणतात त्या भक्तानें त्या दिवसापासून शिवागमाप्रमाणें वर्तन करणाऱ्या लोकांचा आदरसत्कार करावा.

श्लोकः-स्वमार्गाचारनिरताः सजातीया द्विजास्तु ये ॥
तेषां गृहेषु भुंजीत नेतरेषां कदाचन ॥ २९ ॥

व्याख्यानं—"शिवोक्तां जातिमर्यादां योऽतीत्य भुवि वर्तते ॥ स चंडाल इति ज्ञेयः" इत्यादिवचनप्रामाण्यात् शिवदीक्षाग्निदग्धमलत्रयत्वपूर्वकप्रासमंत्रापिंडत्वात्, द्विजन्मनां वीरशैवमतोचिताचारनिष्ठानां, स्वजातिसंभवानां, भक्तमाहेश्वराणामालयेषु, तेषां पङ्क्तौ च, भुंजीयात् नान्यत्रेति तात्पर्यं ॥ २९ ॥

अर्थ-॥ २९ ॥ आपल्या धर्माप्रमाणें आचरण करणारे आपल्या जातीचे जे ब्राह्मण लोक असतील, त्यांच्या घरीं जेवावें इतरांच्या घरीं जेवूं नये.

श्लोकः-स्वमार्गाचारविमुखैर्भविभिः प्राकृतात्मभिः ॥
प्रेषितं सकलं द्रव्यमात्मलीनमपि त्यजेत् ॥ ३० ॥

व्याख्यानं—आत्मलीनमपि स्वाधीनमपि त्यजेदित्यर्थः ॥ ३० ॥

अर्थ–॥ ३० ॥ आपली जातिमर्यादा सोडणाऱ्या हलकट स्वभावाच्या भवि-लोकांनीं आणून दिलेलें द्रव्य आपल्या स्वाधीन झालें असलें तरी तें परत करावें. घेऊं नये.

श्लोकः–नार्चयेदन्यदेवांस्तु न स्मरेन्न च कीर्तयेत् ॥
न तन्निवेद्यमश्नीयाच्छिवभक्तो दृढव्रतः ॥ ३१ ॥

व्याख्यानं—दृढव्रतः दृढतरशिवव्रती शिवभक्तः, अन्यदेवान् विष्ण्वाद्यन्यदेवान्, नार्चयेत् हस्ताभ्यां न पूजयेत्, नच कीर्तयेत्, न स्तुतिं कुर्यात्, न स्मरेत् मनसापि न ध्यायेत्, तदर्पितान्नादिद्रव्यं नाश्नीयात् न भुंजीयादित्यर्थः॥३१॥

अर्थ–॥ ३१ ॥ दृढनिश्चयी शिवभक्तानें शिवाखेरीज इतर देवांचें पूजन करूं नये, इतर देवांचें स्मरण करूं नये, इतर देवांचें कीर्तन करूं नये, व इतर देवांचा नैवेद्यही भक्षण करूं नये.

श्लोकः–यद्गृहेष्वन्यदेवोऽस्ति तद्गृहाणि परित्यजेत् ॥
नान्यदेवार्चकान् मर्त्यान् पूजाकाले निरीक्षयेत् ॥ ३२ ॥

व्याख्यानं—पूजाकाले शिवलिंगपूजाकाल इत्यर्थः, शिष्टं स्पष्टं ॥ ३२ ॥

अर्थ–॥ ३२ ॥ ज्या घरांमध्यें शिवाखेरीज इतर देव असतील, त्या घरीं जाऊं नये. शिवपूजन करावयाच्या वेळीं अन्य देवतांचें पूजन करणाऱ्या लोकांचें तोंड देखील पाहूं नये.

श्लोकः–सदाशिवैकनिष्ठानां वीरशैवाध्ववर्तिनाम् ॥
नहि स्थावरलिंगानां निर्माल्याद्युपयुज्यते ॥ ३३ ॥

व्याख्यानं—सदा निरंतरम्, शिवलिंगैकनिष्ठानां वीरशैवमार्गवर्तनवतां, देवर्षिमानवप्रतिष्ठितादिस्थावरलिंगनिर्माल्यप्रसादद्रव्यमयोग्यं, हि प्रसिद्धं ॥ ३३ ॥

अर्थ–॥ ३३ ॥ सदा शिवावर दृढ विश्वास ठेवणाऱ्या वीरशैवधर्माप्रमाणें वर्तन करणाऱ्यांस स्थावरलिंगाचें निर्माल्य वगैरे कांहीं उपयोगीं पडत नाहीं. वीरशैवांस स्थावरलिंगाचा प्रसाद उपयोगीं नाहीं.

अवतरणिका–ननु वीरशैवानां स्थावरलिंगप्रसादमयोग्यं चेत्तल्लिंगस्यापाये प्राप्ते सत्यौदासीन्यं कर्तव्यं किमित्यत्राह—

श्लोकः–यत्र स्थावरलिंगानामपायः परिवर्तते ॥
अथवा शिवभक्तानां शिवलांच्छनधारिणाम् ॥ ३४ ॥

तत्र प्राणान्विहायापि परिहारं समाचरेत् ॥
शिवार्थे मुक्तजीवश्चेच्छिवसायुज्यमाप्नुयात् ॥ ३५ ॥

व्याख्यानं—यत्र स्थाने, स्थावरलिंगानां प्रत्यूहः प्रवर्तते, अथवा, गजाजिनगंगाकपालकं कालदग्धकामकालपुरभस्मनिभकंथाकंमडलुभिक्षापात्रदंडभस्मघुटिकारूपशिवलांछनधारिणां, जंगमदेवानामुक्तनवविधभक्तिमतां, शिवभक्तानामपायो वा यत्र प्रवर्तते, तत्र, पार्वत्याचारेण, प्राणान्विहायापि, निवारणं कुर्यात् ॥३४॥३५॥

अर्थ–॥ ३४ ॥ ज्या ठिकाणीं स्थावरलिंगाचा नाश होत असेल किंवा शिवचिन्ह धारण करणाऱ्या शिवभक्तांस उपद्रव होत असेल. ॥ ३५ ॥ त्या ठिकाणीं आपला जीव गेला तरीं चिंता नाहीं, जिवापाड मेहनत करून त्या शिवलिंगाचा नाश होऊं देऊं नये, व शिवभक्तांची पीडा दूर करावी. शिवाच्या कामासाठीं आपला प्राण खर्च केला तर तो मनुष्य शिवसायुज्य पावतो. शिवकार्यासाठीं खर्च केलेल्या प्राणाचें सार्थक्यच होतें.

अवतरणिका–ननु प्राणत्यागे दुर्मरणं किं न स्यादित्यत्राह—

श्लोकः-शिवार्थे मुक्तजीवश्चेच्छिवसायुज्यमाप्नुयात् ॥

अवतरणिका–अथ वीरभद्राचारबसवेश्वराचारं सूचयन् भक्ताचारभेदं प्रतिपादयति—

श्लोकः–शिवनिंदाकरं दृष्ट्वा घातयेदथवा शपेत् ॥
स्थानं वा तत्परित्यज्य गच्छेद्यद्यत्क्षमो भवेत् ॥ ३६ ॥

व्याख्यानं—हंतुं शप्तुं यद्यसमर्थः, कर्णौ पिधाय, तत् स्थानं, परित्यज्य, गच्छेदित्यर्थः ॥ ३६ ॥

अर्थ–॥ ३६ ॥ शिवकार्यासाठीं जीव देणारा मनुष्य शिवसायुज्य पावतो. शिवाची निंदा करणारा कोणी पाहिला तर त्यास मारावें, नाहीं पेक्षां शिव्या द्याव्या, इतकें करण्याची जर शक्ति नसेल, तर निदान इतकें तरी करावें कीं, तेथून उठून दुसरीकडे निघून जावें.

श्लोकः-यत्र चाचारनिंदाऽस्ति कदाचित्तत्र न व्रजेत् ॥
यद्गृहे शिवनिंदाऽस्ति तद्गृहाणि परित्यजेत् ॥ ३७ ॥

व्याख्यानं—आचारनिंदा शिवाचारनिंदेत्यर्थः, शिष्टं स्पष्टं ॥ ॥ ३७ ॥

अर्थ–॥ ३७ ॥ जेथें शिवधर्माच्या आचाराची निंदा होते तेथें कधींही जाऊं नये. ज्या घरीं शंकराची निंदा होते, त्या घरीं जाण्याचेंच सोडून द्यावें.

अवतरणिका–ननु शिवनिंदाकरस्य प्रायश्चित्तमस्ति वा नवे-त्यत्राह—

श्लोकः–यस्सर्वभूताधिपतिं विश्वेशानं विनिंदति ॥
न तस्य निष्कृतिश्शक्या कर्तुं वर्षशतैरपि ॥ ३८ ॥

व्याख्यानं—"ईश्वरस्सर्वभूतानामिति" श्रुतेः सकलप्राण्यधिपतिं, सर्वेश्वरं, यो निंदति, तस्य वर्षशतैरपि निष्कृतिः, कर्तुं शक्या न भवतीत्यर्थः ॥ ३८ ॥

अर्थ–॥ ३८ ॥ शंकर हा प्राणिमात्रांचा ईश्वर आहे, त्रैलोक्याचा देखील ईश्वर आहे. त्याची जो मनुष्य निंदा करितो, त्याच्या पापाची निष्कृति करूं ह्मटलें तर ती शंभर वर्षांत देखील होणें शक्य नाहीं.

अवतरणिका–नन्वेवं शिवभक्तस्यान्यदेवतास्मरणं चायोग्यं चेत् संध्यावंदनानि पूर्वकर्मणः का गतिः तस्य सूर्याद्युपासनारूप-त्वादित्यत्राह—

श्लोकः–शिवपूजापरो भूत्वा पूर्वकर्म विसर्जयेत् ॥
अथवा पूर्वकर्म स्यात्सा पूजा निष्फला भवेत् ॥ ३९ ॥

व्याख्यानं—शिवपूजापरः शिवलिंगदीक्षायुक्तः सन्, शिवपूजापर इत्यर्थः, शिष्टं स्पष्टं ॥ ३९ ॥

अर्थ–॥ ३९ ॥ मनुष्यानें शिवलिंगदीक्षा घेऊन एकाग्रमनानें शिवपूजन करावें, व पूर्वीं जसें धर्मविरुद्ध आचरण करीत होता तसें करूं नये. पूर्वकर्म सोडलें नाहीं तर ती शिवपूजा फुकट जाते, तिचाही उपयोग होत नाहीं.

अवतरणिका–अथ नैतावन्मात्रं पातित्यं च स्यादित्याह—

श्लोकः–उत्तमां गतिमाश्रित्य नीचां वृत्तिं समाश्रितः ॥
आरूढपतितो ज्ञेयस्सर्वकर्मबहिष्कृतः ॥ ४० ॥

व्याख्यानं—स्पष्टम् ॥ ४० ॥

अर्थ–॥ ४० ॥ उत्तम गति प्राप्त झाली असतां ती सोडून मुद्दाम नीच वृत्तीची जो मनुष्य आवड करितो, त्यास आरूढपतित ह्मणावें ! त्यास कोणतेंही कर्म करण्याचा अधिकार नाहीं, तो सर्वकर्मबहिष्कृत समजावा.

अवतरणिका–अथ तस्य प्रणवपंचाक्षरीजपशीलत्वात्, नरस्तुतिश्च गर्हितेत्याह—

श्लोकः-पंचाक्षरोपदेशी च नरस्तुतिकरो यदि ॥
सोऽलिंगी स दुराचारी कुकविस्स तु विश्रुतः ॥ ४१ ॥

व्याख्यानं—पंचाक्षरोपदेशी प्रणवपंचाक्षरोपदेशी, शिवभक्तः, यदि नरस्तुतिकरः स्यात्, सः आलिंगी शिवलिंगरहितः, दुराचारी, कुकविः, कुत्सितकविः विश्रुतः विगतशास्त्र इत्यर्थः ॥ ४१ ॥

अर्थ-॥ ४१ ॥ जो कोणी शिवभक्त शिवपंचाक्षरीमंत्राचा त्यास स्वतःस उपदेश झाला असूनही पुन्हा इतर मनुष्यांची स्तुति करीत असेल, तर त्यास अलिंगी ह्मणावें, तो दुराचारी व त्यानें आपल्या बुद्धीचा दुरुपयोग केला हें उघड झालें.

श्लोकः-चर्मपात्रे जलं तैलं न ग्राह्यं भक्तितत्परैः ॥
गृह्यते यदि भक्तेन रौरवं नरकं व्रजेत् ॥ ४२ ॥

व्याख्यानं—भक्तितत्परैः शिवभक्तितत्परैरित्यर्थः, शिष्टं स्पष्टं ॥ ४२ ॥

अर्थ-॥ ४२ ॥ कातड्यांत तेल किंवा पाणी शिवभक्तानें कधींही घेऊं नये, जर भक्त कातड्यांत तेल किंवा पाणी घेईल तर तो चांडाळ समजावा.

अवतरणिका-ननु लिंगिभिः पूर्वकर्म त्यजनीयमित्युक्तत्वात् तस्य जाताशौचादि कर्माचरणीयं वा न वेत्यत्राह—

श्लोकः-न तस्य सूतकं किंचित्प्राणलिंगांगसंगिनः ॥
जन्मनोत्थं मृतोत्थं च विद्यते परमार्थतः ॥ ४३ ॥

व्याख्यानं—प्राणलिंगांगसंगिनः, शिवभक्तस्य जन्मनोत्थं, मरणेनोत्थं, किंचिदपि, कुलोच्छिष्टसूतकं च, परमार्थतो न विद्यत इत्यर्थः, ॥ ४३ ॥

अर्थ-॥ ४३ ॥ प्राणलिंगाचा शरीरास संबंध झालेल्या इष्टलिंग शरीरावर धारण करणाऱ्यांस शिवयोग्यांस वास्तविक रीतीनें पाहिलें तर जन्माचें सोयर नाहीं व मरणाचें सूतक नाहीं.

अवतरणिका-तर्हि स्त्रीणां रजःसूतकमस्ति किमित्यत्राह—

श्लोकः-लिंगार्चनरतायाश्च ऋतौ नार्या न सूतकम् ॥
तथा प्रसूतिकायाश्च सूतकं नैव विद्यते ॥ ४४ ॥

व्याख्यानं—शिवलिंगपूजानिष्ठायाः स्त्रियः, ऋतौ सूतकं, मासिकरजोदर्शनकृतसूतकं तथा प्रसूतिकायाः, शिशुप्रसूतिप्रयुक्तायाश्च, सूतकं च न विद्यत इत्यर्थः, ॥४४॥

अर्थ-॥ ४४ ॥ जी बायको शिवलिंगाची भक्तिपूर्वक पूजा करणारी असेल, व इष्टलिंग धारण करणारी असेल, त्या बाईला विटाळशीपणाचें किंवा बाळंतपणाचें विटाळ मानण्याचें मुळींच कारण नाहीं.

अवतरणिका-तर्हि गृहसूतकस्य का गतिरित्यत्राह—

श्लोकः-गृहे यस्मिन्प्रसूता स्त्री सूतकं नात्र विद्यते ॥
शिवपादांबुसंस्पर्शात्सर्वपापं प्रणश्यति ॥ ४५ ॥

व्याख्यानं—तद्गृहे, तया शिवपूजाकरणसमये, शिवपादांबुपतनात्, सर्वपापं सकलसूतकोत्थपापं, नश्यतीति, गृहसूतकं च नास्तीत्यर्थः, "लिंगार्चनरता नारी सूतकी तु रजस्वला ॥ रविरग्निर्यथा वायुस्तद्वत्कोटिशुचिर्भवेदिति" शिवागमवचनात्, शिवभक्तानां, न किमपि, सूतकमस्तीति भावः, ॥ ४५ ॥

अर्थ-॥ ४५ ॥ ज्या घरांत एखादी इष्टलिंग धारण करणारीं बाई बाळंत झालेली असेल त्या घराला देखील कांहीं विटाळ नाहीं; कां तर शंकराच्या पदांचें पाणी (पादोदक) शिंपडलें ह्मणजे सर्व पापांचा नाश होतो.

अवतरणिका-ननु पुराविधीयमानशिवक्षेत्रतीर्थयात्रादिकं च परित्यजनीयं किमित्यत्राह—

श्लोकः-शिवस्थानानि तीर्थानि विशिष्टानि शिवार्चकः ॥
शिवयात्रोत्सवं नित्यं सेवेत परया मुदा ॥ ४६ ॥

व्याख्यानं—शिवार्चकः इष्टलिंगपूजकः, शिवभक्तः, विशिष्टानि श्रेष्ठानि, शिवस्थानानि, श्रीपर्वतादिस्थानानि, तीर्थानि, त्रिमकुटादितीर्थानि शिवयात्रोत्सवं, च, नित्यं, सेवेतेर्थः ॥ ४६ ॥

अर्थ-॥ ४६ शिवपूजन करणाऱ्या भक्तानें प्रसिद्ध प्रसिद्ध शिवस्थानें जाऊन अवश्य पहावीं, प्रसिद्ध प्रसिद्ध तीर्थें आवश्य करावीं व नेहमीं आवडीनें शिवयात्रेचा समारंभ करावा.

श्लोकः-शिवक्षेत्रोत्सवमहायात्रादर्शनकांक्षिणाम् ॥
मार्गेऽन्नपानदानं च कुर्यान्माहेश्वरो जनः ॥ ४७ ॥

व्याख्यानं—शिवक्षेत्रोत्सवोद्भृतयात्रादर्शनकांक्षिणां, सर्वेषां, च माहेश्वरो जनः, शिवभक्तजनः मार्गे, अन्नोदकदानं च कर्तव्यमित्यर्थः ॥ ४७ ॥

अर्थ-॥ ४७ ॥ शिवभक्तानें शिवक्षेत्र (श्रीपर्वत वगैरे स्थळ) शिवतीर्थ, शिवाचा उत्सव व शिवाची यात्रा करण्यास जे लोक जातात, त्यांस वाटेंत

अन्नपाणी मिळेल, व त्यांस सुख होईल, ह्यासाठीं जागोजाग आपल्या शक्तीप्रमाणें अन्नसत्रें घालावीं, व पाणपोया घालाव्या.

अवतरणिका-ननु वस्त्रादिदानं विहाय अन्नतोयदानमेव किमित्यत्राह—

श्लोकः-नान्नतोयसमं दानं न चाहिंसापरं तपः ॥
तस्मान्माहेश्वरो नित्यमन्नतोयप्रदो भवेत् ॥ ४८ ॥

व्याख्यानं—स्पष्टं ॥ ४८ ॥

अर्थ-॥ ४८ ॥ अन्नपाणी दान करण्यासारखें दुसरें श्रेष्ठ दान नाहीं, अहिंसेसारखें दुसरें श्रेष्ठ तप नाहीं, ह्यासाठीं शिवभक्तानें नेहमीं अन्नपाणी शिवयोगी लोकांस दान करावें.

अवतरणिका-ननु तर्हि कन्यादानं च कस्मायपि दातुं योग्यं किमित्यत्राह—

श्लोकः-स्वमार्गाचारवर्तिभ्यः स्वजातिभ्यस्सदा व्रती ॥
दद्यात्तेभ्यस्समादद्यात्कन्यां कुलसमुद्भवाम् ॥ ४९ ॥

व्याख्यानं—सदा व्रती नित्यशिवाचारव्रती, शिवभक्तः, स्वमार्गाचारवर्तिभ्यः वीरशैवाचारमार्गवर्तिभ्यः, स्वजातीयशिवभक्तेभ्यः, कुलसमुद्भवाम् स्वकीयकुलसमुत्पन्नां कन्यां दद्यात्, तेभ्यः समादद्यात् आनयेदित्यर्थः ॥ ४९ ॥

अर्थ-॥ ४९ ॥ शिवभक्तानें आपल्या (शिव) धर्माच्या आचाराप्रमाणें वागणाऱ्या व आपल्या जातीच्या लोकांस त्यांच्या त्यांच्या जातींत उत्पन्न झालेल्या चांगल्या कुलांत जन्मलेल्या मुली पाहून त्यांचीं लग्नें करून द्यावींत.

अवतरणिका-एवं बहुविधशिवाचारसंपन्नो वीरव्रती शिवभक्तः श्रीगुरुं लिंगं च पूजयेदित्युभयस्थलं सूचयन् भक्तस्थलं समापयति—

श्लोकः-एवमाचारसंयुक्तो वीरशैवो महाव्रती ॥
पूजयेत्परया भक्त्या गुरुं लिंगं च संततम् ॥ ५० ॥

व्याख्यानं—स्पष्टं ॥ ५० ॥

अर्थ-॥ ५० ॥ ह्याप्रमाणें आपल्या आचाराप्रमाणें वागणाऱ्या वीरशैव व्रत पाळणाऱ्या शिवभक्तानें नेहमीं भक्तिपूर्वक गुरूचें व लिंगाचें पूजन करावें.

इति भक्तमार्गक्रियास्थलम्

अथोभयस्थलम्

अवतरणिका–"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इति श्वेताश्वतरश्रुत्यनुसारेण शिवगुर्वोरभेदं सूत्रद्वयेन कथयति—

श्लोकः–गुरोरभ्यर्चनेनापि साक्षादभ्यर्चितश्शिवः ॥
तयोर्नास्ति भिदाकिंचिदेकत्वात्तत्त्वरूपतः ॥ १ ॥

व्याख्यानं—गुरोः पूजनेन, शिवः, साक्षात् प्रत्यक्षेण पूजितः, तयोः शिवगुर्वोः, तत्त्वरूपतः परमार्थतः, एकत्वात् एकरूपत्वात्, किंचिदपि, भिदा भेदः, नास्तीत्यर्थः, तस्मात् ॥ १ ॥

अर्थ–॥ १ ॥ गुरूचें पूजन केलें ह्मणजें प्रत्यक्ष शंकराचें पूजन केल्यासारखें होतें, कां तर वास्तविक पाहूं गेलें तर शिवाचा आणि गुरूचा मुळींच भेद नाहीं.

श्लोकः–यथा देवे जगन्नाथे सर्वानुग्रहकारके ॥
तथा गुरुवरे कुर्यादुपचारान्दिने दिने ॥ २ ॥

व्याख्यानं—उपचारान् भक्त्याद्युपचारान्, इत्यर्थः, शिष्टं स्पष्टं, ॥ २ ॥

अर्थ–॥ २ ॥ ज्या प्रमाणें सर्वांवर कृपा करणाऱ्या सर्व त्रैलोक्याचा ईश्वर शंकर ह्याची पूजा करून उपचार आपण करितों त्या प्रमाणेंच गुरुवर्याची ही नित्य पूजा करून उपचार करावे.

अवतरणिका–ननु शिवगुर्वोरभेदे शिववद्गुरुरप्यप्रत्यक्षस्स्यादित्यत्राह—

श्लोकः–अप्रत्यक्षो महादेवस्सर्वेषामात्ममायया ॥
प्रत्यक्षो गुरुरूपेण वर्तते भक्तिसिद्धये ॥ ३ ॥

व्याख्यानं—महादेवः परमेश्वरः, सर्वेषामात्ममायया, शक्त्या, अप्रत्यक्षोऽपि भक्तिसिद्धये, ललाटनेत्रचंद्रकलाभुजद्वयतिरोधानं, कृत्वा, गुरुरूपेण, प्रत्यक्षः सन्, वर्तत इत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ महादेव प्रत्यक्षरूपानें कोणास दिसत नाहीं, तो गुप्त राहतो, तरी आपल्या मायेनें गुरूचें रूप घेऊन भक्ती वाढविण्यासाठीं प्रत्यक्षरूपानें राहतो.

अवतरणिका–ननु शिववद्गुरोरिष्टार्थप्रदत्वादर्शनात्किमर्थं पूजनीय इत्यत्राह—

श्लोकः–शिवज्ञानं महाघोरसंसारार्णवतारकम् ॥
ध्रियते येन स गुरुः कस्य वंद्यो न जायते ॥ ४ ॥

व्याख्यानं—येन गुरुणा, महाभयंकरसंसारसमुद्रतारकं, शिवज्ञानं, दीयते, उपदिश्यते, स गुरुः, कस्य, केन, वंद्यो न भवति, जननमरणपरिपीडितैस्सर्वैरपि, वंद्य इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवज्ञानामुळें अतिशय भयंकर अशा संसारसमुद्रांतून तरून जातां येतें तें शिवज्ञान ज्याचें आंगीं आहे तो गुरु कोणास मान्य होणार नाहीं ? तें शिवज्ञान शिष्यांस करून देऊन त्यांस सुखी करणारा गुरु सर्व भक्तांस नमस्कार करण्यास योग्य आहे.

अवतरणिका–ननु तादृशशिवज्ञानं कीदृशमित्यत्राह तत्तन्माहात्म्यपूर्वकं प्रकाशयति—

श्लोकः–यत्कटाक्षकलामात्रात्परमानंदलक्षणम् ॥
लभ्यते शिवरूपत्वं स गुरुः केन नार्चितः ॥ ५ ॥

व्याख्यानं—यत्कटाक्षकलामात्रात्, अयं भावः, अत्र बंधमोक्षदशयोरप्यहमिति, धर्मिणः, प्रसिद्धत्वेनांधजात्यंधबधिरमूकादिरपि, स्वात्मनि, संशयविपर्ययाभावात् सर्वं ज्ञानं, धर्मिण्यभ्रांतं, प्रकारे तु, विपर्यय इति, सर्वसंमतत्वेनांडरसन्यायेन, स्वात्मतादात्म्यापन्नस्य, पुरुषस्य, विभागपरामर्शमहिम्ना, वन्हेर्विस्फुलिंग इव, विच्छिन्नत्वात्, अथ, एवं, स्वातंत्र्यापरपर्यायमायाशक्तिपरिकल्पितव्यामोहवशादविज्ञातपरमानंदलक्षणस्वात्मशिवत्वं, दशमदृष्टांतेन लभ्यते, प्रकाश्यते, स गुरुः, केन नार्च्यते, सर्वेणापि मुमुक्षुणाऽर्चनीय एवेत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ ज्या गुरूचा थोडा जरी कृपाकटाक्ष आपल्यावर झाला तरी अतिशय आनंदस्वरूप असें शिवतत्व आपणास समजून येतें तो गुरु कोणास मान्य होणार नाहीं ? सर्वांस मान्य होईलच.

अवतरणिका–एवंरूपश्रीगुरोर्हितमेवाचरणीयं तदाज्ञोलंघनं न कर्तव्यमित्युक्त्वोभयस्थलं समापयति ॥ सूत्रद्वयेन—

श्लोकः–हितमेव चरेन्नित्यं शरीरेण धनेन च ॥
आचार्यस्योपशांतस्य शिवज्ञानमहानिधेः ॥ ६ ॥

व्याख्यानं—उपशांतस्य रागद्वेषरहितस्येत्यर्थः, शिष्टं स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ आचार्य (गुरु) हा शिवज्ञानाचा महासमुद्र आहे, त्याला रागद्वेष तर मुळींच माहीत नाहींत, त्या गुरूच्या मनास संतोष होईल असें आपण नेहमीं वर्तन ठेवावें शरीर झिजवून पैसे खर्च करून हरतऱ्हेनें गुरूस सुख द्यावें.

श्लोकः-गुरोराज्ञां न लंघेत सिद्धिकामी महामतिः ॥
तदाज्ञालंघनेनापि शिवाज्ञाछेदको भवेत् ॥ ७ ॥

व्याख्यानं—महामतिः विवेकी सन्, सिद्धिकामी, मोक्षार्थी, गुरोराज्ञां न लंघेत, यदिलंघेत, शिवाज्ञाभंगकृद्भवेदित्यर्थः ॥ "इत्युभयस्थलम्" ॥ ७ ॥

अर्थ-॥ ७ ॥ ज्याला आपले सर्व मनोरथ परिपूर्ण व्हावेत असें वाटत असेल, जो बुद्धिमान् असेल त्यानें गुरूची आज्ञा कधींही मोडूं नये, त्या गुरूची आज्ञा मोडली तर प्रत्यक्ष शंकराची आज्ञा मोडल्यासारखें पाप लागेल.

अथ त्रिविधसंपत्तिस्थलम् ॥

श्लोकः-यथा गुरौ यथा लिंगे भक्तिमान्परिवर्तते ॥
जंगमे च तथा नित्यं भक्तिं कुर्याद्विचक्षणः ॥ १ ॥

व्याख्यानं—विचक्षणः, प्रवीणशिवभक्त इत्यथः, शिष्टं स्पष्टं ॥ १ ॥

अर्थ-॥ १ ॥ समजूतदार भक्त आपल्या गुरूची जशी भक्ति करितो शिवलिंगाची (इष्टलिंगाची) जशी भक्ति करितो तशीच त्यानें नित्य जंगमाची भक्ति करावी.

अवतरणिका-ननु भक्तिसिद्ध्यर्थं शिवएव गुरुरूपेणावतीर्ण-इत्युक्तत्वेन शिववद्गुरौ भक्तिः कर्तुमुचिता जंगमे च तथा भक्तिः किमर्थं विधेयेत्यत्राह—

श्लोकः-एक एव शिवः साक्षात् सर्वानुग्रहकारकः ॥
गुरुजंगमलिंगात्मा वर्तते भुक्तिमुक्तिदः ॥ २ ॥

व्याख्यानं—साक्षात्, "अतोऽस्मिन् लोके वेदे च प्रथितः पुरुषोत्तम" इति भगवदुक्तेः, लोकवेदप्रसिद्धः सन्, सकलभक्तानुग्रहकरः, प्रभुः स्वतंत्रः, परमेश्वर एक एव, गुरुजंगमलिंगात्मा, गुरुलिंगजंगमात्मकःसन्, भुक्तिमुक्तिदः भोगमोक्षप्रदःसन्, वर्तत इति, शिववज्जंगमेऽपि, भक्तिः कर्तव्येत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ सर्व प्राणिमात्रांवर कृपा करणारा शंकर एकच आहे तो आपल्या भक्तांस ह्या लोकीं ऐश्वर्यवगैरे सुख आणि मरणानंतर (शिवैक्यानंतर) मोक्षप्राप्तीचें सुख मिळवून देण्यासाठीं गुरु, आणि लिंग असें तीन प्रकारचें स्वरूप घेऊन राहतो.

अवतरणिका–अथ लिंगापेक्षया जंगमस्याधिक्यं वक्तुं लिंगस्वरूपं प्रथममुपपादयति—

श्लोकः–लिंगं च द्विविधं प्रोक्तं जंगमाजंगमात्मना ॥
अजंगमे यथा भक्तिर्जंगमे च तथा स्मृता ॥ ३ ॥

व्याख्यानं—जंगमाजंगमात्मना, चरस्थिरभेदेन, लिंगं शिवलिंगं, द्विविधमिति प्रोक्तं, अजंगमे स्थिरलिंगे, यथाभक्तिर्विधीयते, तथा जंगमेऽपि, चरलिंगेऽपि, भक्तिः कर्तव्येत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ लिंग दोन प्रकारचें मानलें आहे एक जंगम (चालतें बोलतें) आणि दुसरें अजंगम (न चालणारें) हे दोन प्रकार होत. अजंगम लिंगाविषयीं (स्थिरलिंगाविषयीं) जशी भक्ति करावयाची तशीच जंगमलिंगाविषयीं (चरलिंगाविषयीं) करावी.

अवतरणिका–ननु किमनयोः स्वरूपमित्यत्राह—

श्लोकः–अजंगमं तु यल्लिंगं मृच्छिलादिविनिर्मितम् ॥
तद्वरं जंगमं लिंगं शिवयोगीति विश्रुतम् ॥ ४ ॥

व्याख्यानं—मृच्छिलादिविनिर्मितंयल्लिंगमस्ति, तदजंगमं स्थिरलिंगमित्यर्थः॥४

अर्थ–॥ ४ ॥ मातीचें किंवा दगडाचें जें लिंग केलेलें असतें तें स्थावर लिंग होय. त्या स्थावरलिंगापेक्षां जंगमलिंग हें श्रेष्ठ असून त्यास शिवयोगी ह्मणण्याची प्रसिद्धि आहे.

अवतरणिका–तत्कथमित्यत्राह—

श्लोकः–अचरे मंत्रसंस्काराल्लिंगे वसति शंकरः ॥
सदाकालं वसत्येव चरलिंगे महेश्वरः ॥ ५ ॥

व्याख्यानं—स्पष्टं. ॥ ५ ॥

अर्थ–॥ ५ ॥ मंत्रसंस्कारामुळें स्थावरलिंगामध्यें शंकर राहतो. चरलिंगांत (जंगमलिंगांत) महादेव नेहमीं राहतच आहे.

अवतरणिका–तस्माच्छिवयोगिनंप्रति कृतदानपूजाफलं सूत्रद्वयेन विशेषयति—

श्लोकः–शिवयोगिनि यद्दत्तं तदक्षयफलं भवेत् ॥
तस्मात्सर्वप्रयत्नेन तस्मै देयं महात्मने ॥ ६ ॥

श्लोकः—यत्फलं लभ्यते जंतुः पूजया शिवयोगिनः ॥
तदक्षयमिति प्रोक्तं सकलागमपारगैः ॥ ७ ॥

व्याख्यानं—अस्मिन्नर्थे, आगमः प्रमाणमिति सूचितम्, अत्र "दर्शनादर्चनात्तस्य त्रिसप्तकुलसंयुतः, जना मुक्तिपदं यांति किंपुनस्तत्परायणा" इति योगजागमवचनमनुसंधेयम् ॥ ६ ॥ ७ ॥

अर्थ–॥ ६ ॥ शिवयोग्यास (जंगमास) जें दान करावें त्याचें अक्षय फल प्राप्त होतें. कधीं त्याचा नाश होत नाहीं, ह्यासाठीं हरप्रयत्नानें त्या महासामर्थ्यवान् जंगमास दान द्यावें. ॥ ७ ॥ शिवयोग्याची पूजा केली तर प्राण्यास जें फळ मिळतें तें अक्षय आहे असें सर्व शैवागमांत प्रवीण असणाऱ्या विद्वान लोकांनीं ह्मटलें आहे.

अवतरणिका–एवं तत्पूजाफलमुक्त्वा तदवमानफलं च प्रकाशयति—

श्लोकः—नावमन्येत कुत्रापि शिवयोगिनमागतम् ॥
अवमानाद्भवेत्तस्य दुर्गतिश्च न संशयः ॥ ८ ॥

व्याख्यानं—कुत्रापि, अंतर्बहिः क्वापि समागतमित्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ आपण कोठेंही बसलेले असों, त्या ठिकाणीं शिवयोगी आला तर त्याचा कधींहीं अपमान करूं नये, त्याचा अपमान केला तर नरकवास भोगावा लागेल ह्यांत संशय नाहीं.

अवतरणिका–तस्माच्छिवयोगी पूजनीय इति वदन् त्रिविधसंपत्तिस्थलं समापयति—

श्लोकः-शिवयोगी शिवस्साक्षादिति कैंकर्यभक्तितः ॥
पूजयेदादरेणैव यथा लिंगं यथा गुरुः ॥ ९ ॥

व्याख्यानं—कैंकर्यभक्तिर्भृत्याचाररूपा भक्तिरित्यर्थः, शिष्टं स्पष्टं ॥ "इति त्रिविधसंपत्तिस्थलं" ॥ ९ ॥

अर्थ–॥ ९ ॥ शिवयोगी हा प्रत्यक्ष शंकर आहे असें समजून दासभावानें त्याची सेवा करावी. जशी लिंगाची आपण पूजा करितों, जशी गुरूची आपण सेवा करितों त्याचप्रमाणें शिवयोग्याचीही पूजा करावी.

अथ चतुर्विधसारायस्थलं निरूपयति ॥

श्लोकः-पादोदकं यथा भक्त्या स्वीकरोति महेशितुः ॥
तथा शिवात्मनोर्नित्यं गुरुजंगमयोरपि ॥ १ ॥

व्याख्यानं—अत्र महेशितुः शिवलिंगस्येत्यर्थः शिष्टं स्पष्टं ॥ १ ॥

अर्थ-॥ १ ॥ जसें आपण (भक्त) शंकराचें पादोदक घेतों तसेंच शंकराचेंच प्रत्यक्षरूप असणाऱ्या जंगमाचें आणि गुरूचेंही पादोदक घ्यावें.

अवतरणिका-अथ पादोदकधारणस्वरूपकथनपूर्वकं तत्फलमाह—

श्लोकः-सर्वमंगलमांगल्यं सर्वपावनपावनम् ॥
सर्वसिद्धिकरं पुंसां शंभोः पादांबुधारणम् ॥ २ ॥

व्याख्यानं—शिवलिंगचरणतीर्थधारणं, समस्तमंगलानां मंगलं सत्, सकलपावनानां पावनं सत्, पुरुषाणां सर्वसिद्धिकरं, भवति इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ शंकराच्या चरणाचें तीर्थ (लिंगोदक) पृथ्वीवर जितक्या कल्याणकारक वस्तु आहेत त्यापेक्षांही कल्याणकारक आहे. पृथ्वीवर जितक्या पवित्र वस्तु आहेत त्यापेक्षांही पवित्र आहे. जितक्या सिद्धि आहेत त्या सर्व सिद्धि पुरुषांस प्राप्त करून देणारें आहे.

अवतरणिका-अथ निर्माल्यपत्रपुष्पधारणफलं निरूपयति-

श्लोकः-शिरसा धारयेद्यस्तु पत्रं पुष्पं शिवार्पितम् ॥
प्रतिक्षणं भवेत्तस्य पौंडरीकक्रियाफलम् ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ-॥ ३ ॥ शंकरास वाहिलेलें पान किंवा फूल जो भक्त आपल्या मस्तकावर घेऊन फिरेल त्यास प्रतिक्षणीं पौंडरीकयज्ञ केल्याचें श्रेय मिळेल.

अवतरणिका-ननु शिवनिर्माल्यमग्राह्यमिति पुराणादौ श्रूयते कथं ग्राह्यमित्यत्राह—

श्लोकः-भुंजीयाद्रुद्रभुक्तान्नं रुद्रपीतं जलं पिबेत् ॥
रुद्राघ्रातं सदाजिघ्रेदिति जाबालिकी श्रुतिः ॥ ४ ॥

व्याख्यानं—रुद्रभुक्तान्नं रुद्रसमर्पितप्रसादान्नं, भुंजीयात् भक्षयेत्, रुद्रपीतं रुद्रप्रसादोदकं पिबेत्, रुद्राघ्रातं रुद्रसमर्पितकुसुमं, जिघ्रेत्, इति जाबालिकी

श्रुतिराहेत्यर्थः, "रुद्रेणात्तमश्नंति रुद्रेण पीतं पिबंति रुद्रेणाघ्रातं जिघ्रंति" इति जाबालश्रुतिः, तस्मात्पुराणादिषु श्रूयमाणतन्निषेधस्तु, चंडाधिकारविशिष्टस्थावरलिंगपरः, नतु बाणादिलिंगपरः, "बाणलिंगे स्वयंभूते चंद्रकांते हृदि स्थिते" शालग्रामशिलोद्भूते शंभोर्नैवेद्यभक्षणमिति" वचनात्, अन्यथा, श्रुतिविरुद्धपुराणवचनमप्रमाणमेव भवेदिति, न सार्वत्रिक इति, संक्षेपः एवं श्रुतिसिद्धत्वात्, ॥ ४ ॥

अर्थ-॥ ४ ॥ शंकरास नैवेद्य दाखविलेलें अन्न भक्षण करावें, शंकरास अर्पण केलेलें पाणी भक्तानें प्यावें, शिवास जें फूल वाहिलेलें असेल तें आपण हुंगावें अशी जाबालऋषीची श्रुति आहे.

श्लोकः-अर्पयित्वा निजे लिंगे पत्रं पुष्पं फलं जलम् ॥
अन्नाद्यं सर्वभोज्यं च स्वीकुर्याद्भक्तिमान्नरः ॥ ५ ॥

व्याख्यानं—स्पष्टं ॥ ५ ॥

अर्थ-॥ ५ ॥ शिवभक्ति करणाऱ्या भक्तिमान् मनुष्यानें (भक्तानें) अगोदर आपल्या इष्टलिंगाला पान, फूल, फळ, पाणी अन्न वगैरे सर्वखाण्याचे पदार्थ अर्पण करावे मागाहून त्याचा स्वतः उपयोग करावा.

अवतरणिका-अथ गुरुप्रसादविमुखानां मुक्तिर्नास्तीति सर्वसंमतत्वेनापरिमिततेजसः शिवस्य "ईशानः सर्वविद्यानामिति" श्रुतेः सकलविद्याधीश्वरत्वात् तत्रैव "मे अस्तु सदाशिवोमिति" तारकब्रह्मरूपप्रणवाभेदेन श्रूयमाणत्वाच्च सकललोकगुरुत्वात् तत्प्रसादोऽवश्यं ग्राह्य इत्याह—

श्लोकः-गुरुत्वात्सर्वभूतानां शंभोरमिततेजसः ॥
तस्मै निवेदितं सर्वं स्वीकार्यं तत्परायणैः ॥ ६ ॥

व्याख्यानं—स्पष्टम् ॥ ६ ॥

अर्थ-॥ ६ ॥ शंकराचें सामर्थ्य अगाध असून तो सर्वजगाचा गुरु आहे ह्यासाठीं त्याची भक्ति करणाऱ्या भक्तांनीं अगोदर त्या शंकरालाच सर्व पदार्थ अर्पण करून नंतर आपण घ्यावें.

अवतरणिका-तर्ह्यस्य शिवलिंगप्रसादस्य कोऽधिकारीत्यत्राह—

श्लोकः-ये लिंगधारिणो लोके ये शिवैकपरायणाः ॥
तेषां तु शिवनिर्माल्यमुचितं नान्यजंतुषु ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

अर्थ-॥ ७ ॥ पृथ्वीवर जे लिंगधारण करणारे वीरशैव लोक आहेत, जे शिवावर एकनिष्ठपणानें विश्वास ठेवतात त्या सर्वांस शिवनिर्माल्य घेणें योग्य आहे इतर लोकांस शिवनिर्माल्य घेण्याचा अधिकार नाहीं.

अवतरणिका–तर्हि शिवप्रसादान्नभोजनस्य किं फलमित्यत्राह—

श्लोकः–अन्नजाते तु भक्तेन भुज्यमाने शिवार्पिते ॥
सिक्थे सिक्थेऽश्वमेधस्य यत्फलं तदवाप्यते ॥ ८ ॥

व्याख्यानं—परिपक्वतंडुलव्यक्तिः, सिक्थशब्देनोच्यते, शिष्टं स्पष्टं ॥ ८ ॥

अर्थ-॥ ८ ॥ शिवभक्तानें शिवास नैवेद्य अर्पण केलेल्या भाताच्या ढिगापैकीं जितकें अन्न स्वतः भक्षण केलें त्या अन्नांतील प्रत्येक शितास एक एक अश्वमेध यज्ञ केल्याचें पुण्य लागतें.

अवतरणिका–अथास्यानधिकारिणस्सूचयति—

श्लोकः–निर्माल्यं निर्मलं शुद्धं शिवेन स्वीकृतं यतः ॥
निर्मलैस्तत्परैर्धार्यं नान्यैः प्राकृतजंतुभिः ॥ ९ ॥

व्याख्यानं—शिवलिंगदीक्षारहिताः, प्राकृताः, ते, अनधिकारिणः, तैर्न धार्यमित्यर्थः, शिवदीक्षया निर्मलैः, तत्परैः, शिवलिंगनिष्ठैर्धार्यमित्यर्थः ॥ ९ ॥

अर्थ-॥ ९ ॥ ज्याअर्थीं प्रत्यक्ष शंकरांनीं तें अन्न नैवेद्याकरितां स्वीकारिलें त्या अर्थीं निर्माल्य अन्न पवित्र आणि निर्मळ आहे, तें निर्मळ शिवनिर्माल्य शिवदीक्षेमुळें निर्दोष स्वभाव झालेल्या शिवभक्तांनींच घ्यावें इतर नीचलोकांस तें घेण्यास अधिकार नाहीं.

अवतरणिका–तदेव स्फुटयति—

श्लोकः–शिवभक्तिविहीनानां जंतूनां पापकर्मणाम् ॥
विशुद्धे शिवनिर्माल्ये नाधिकारोऽस्ति कुत्रचित् ॥ १० ॥

व्याख्यानं—अयं भावः, व्यापकीभूतशिवस्याष्टतनुपरिकल्पितत्वेन, साधारणीभूतदेवतांतरपूजायां, शिवसंबंधिपुष्पोदकीभूतचंद्रगंगाभ्यां, परिपुष्टस्य, धान्यस्याग्निरूपरुद्रजिव्हया, परिपच्यमानत्वात्' एतदुभयत्र, सर्वप्राणिनामप्यधिकारोऽस्ति, तथाप्यसाधारणशिवलिंगपूजायां, शिवलिंगप्रसादस्वीकारे च, शिवदीक्षासंपन्न एवाधिकारीति, सर्वशास्त्रप्रसिद्धं, ॥ १० ॥

अर्थ–॥ १० ॥ जे लोक शिवभक्ति करीत नाहींत अनेकतऱ्हेचीं पापकर्में करितात त्यांस निर्दोष अशा शिवनिर्माल्याचा उपयोग घेण्याचा अधिकार आहे असें प्रमाण कोठेंही सांपडणार नाहीं.

अवतरणिका–अथ प्रसादमहत्वं संसूच्यैतत्स्थलं समापयति सूत्रद्वयेन—

श्लोकः–शिवलिंगप्रसादस्य स्वीकाराद्यत्फलं भवेत् ॥
तथा प्रसादस्वीकाराद्गुरुजंगमयोरपि ॥ ११ ॥
तस्माद्गुरुं महादेवं शिवयोगिनमेव च ॥
पूजयेत्तत्प्रसादान्नं भुंजीयात्प्रतिवासरम् ॥ १२ ॥

व्याख्यानं—पूजयेत्तनुमनधनैः पूजयेदित्यर्थः तत्प्रसादान्नमेव प्रतिवासरं भुंजीयात्, "इति चतुर्विधसाराय स्थलं" ॥ ११ ॥ १२ ॥

अर्थ–॥ ११ ॥ शिवलिंगाचा प्रसाद भक्षण केला तर जें फळ मिळतें तेंच फळ गुरूचा आणि जंगमाचा प्रसाद भक्षण केला तरी लागतें. ॥ १२ ॥ ह्यासाठीं गुरु, महादेव आणि शिवयोगी (जंगम) हे तिन्हीही सारखेच समजून त्यांची दररोज पूजा करावी व त्यांचें प्रसादान्न भक्षण करावें.

अथ उपाधिमाटस्थलं

अवतरणिका–अथ"देहदानात्सत्यसिद्धिरर्थदानाच्च निर्वृतिः, प्राणदानात् ज्ञानसिद्धिरेवं सर्वं स्थिरं भवेदिति" योगजागमवचनानुसारेण, गुरुलिंगजंगमोद्देशेन यथाशक्तिदानं कुर्यादित्याह—

श्लोकः–शिवलिंगे शिवाचार्ये शिवयोगिनि भक्तिमान् ॥
दानं कुर्याद्यथाशक्ति तत्प्रसादयुतः सदा ॥ १ ॥

व्याख्यानं—तद्विषयइति शेषः शिष्टं स्पष्टं. ॥ १ ॥

अर्थ–॥ १ ॥ भक्तिमान् भक्तानें शिवलिंगाची, शिवगुरूची आणि शिवयोग्याची (जंगमाची) भक्ति करून त्यांचा प्रसाद मिळाल्यानंतर व आपल्या शक्तीप्रमाणें नेहमीं दान करावें.

अवतरणिका–अथ तद्दानस्वरूपं विशदयति—

श्लोकः–दानं च त्रिविधं प्रोक्तं सोपाधिनिरुपाधिकम् ॥
सहजं चेति सर्वेषां सर्वतंत्रविशारदैः ॥ २ ॥

व्याख्यानं—दानं च प्राणदेहार्थरूपदानत्रयं, सोपाधिकं, निरुपाधिकं, सहजं चेति, त्रिरूपवदिति समस्तागमप्रवीणैः, सर्वेषां शिवभक्तानां प्रोक्तमित्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ सर्वप्रकारचें शैवागम ज्यांनीं चांगल्या रीतीनें वाचले आहेत अशा ज्ञानी लोकांनीं दानाचे तीन प्रकार सांगितले आहेत ते असे १ सोपाधि २ निरुपाधि ३ सहज हे होत.

अवतरणिकाः–तत्र सोपाधिदानरूपोपाधिमाटस्थलं निरूपयति,—

श्लोकः–फलाभिसंधिसंयुक्तं दानं यद्विहितं भवेत् ॥
तत्सोपाधिकमाख्यातं मुमुक्षुभिरनादृतम् ॥ ३ ॥

व्याख्यानं—तुच्छफलाभिलाषसंयुक्तमत एव, मुमुक्षुभिरुपेक्षितं यद्दानं विहितं स्यात्, तत्सोपाधिकमित्युक्तमित्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ कांहींतरी ह्या दानापासून आपला उपयोग व्हावा ह्या इच्छेनें जें दान करावयाचें तें सोपाधिदान होय, तें दान मोक्षप्राप्तीची इच्छा करणाऱ्या मुमुक्षुलोकांस उपयोगीं पडत नाहीं.

अवतरणिका–अथ निरुपाधिमाटस्थलं लक्षयति—

श्लोकः–फलाभिसंधिनिर्मुक्तमीश्वरार्पितकांक्षितम् ॥
निरुपाधिकमाख्यातं दानं दानविशारदैः ॥ ४ ॥

व्याख्यानं—तुच्छफलेच्छारहितमीश्वरार्पणाभिवांछया विहितं यद्दानं, तत् दानतत्वस्वरूपज्ञैर्निरुपाधिकदानमित्याख्यातमित्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ आपला ह्या दानापासून अमुक एक उपयोग व्हावा अशी इच्छा मुळींच न करितां फक्त तें दान ईश्वरास (शंकरास) अर्पण व्हावें ह्या हेतूनें जें दान करावयाचें तें निरुपाधिक दान होय असें दानतत्वस्वरूप जाणणाऱ्या लोकांनीं मानिलें आहे.

अवतरणिकाः–सहजमाटस्थलं निरूपयति—

श्लोकः–अदातृदातृदेयानां शिवभावं विचिंतयन् ॥
आत्मनोऽकर्तृभावं च यद्दत्तं सहजं भवेत् ॥ ५ ॥

व्याख्यानं—परिगृहीतृप्रदातृदेयानां, शिवत्वं चिंतयन्, आत्मनः स्वस्याकर्तृत्वं भावयन्, यद्दानं दत्तं, तत्सहजदानं स्यादित्यर्थः, "भोक्ता, भोज्यं, प्रेरितारं, च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेकमिति" श्वेताश्वतरश्रुत्योपक्रमगतपिंडस्थलरहस्यमंत्रोपसंहाररूपसहजदानस्थलेऽपि बोध्यम्, ॥ ५ ॥

अर्थ-॥ ५ ॥ न देणारा, देणारा, द्यावयाचें दान हें सर्व शिवस्वरूप आहे आत्म्याकडे (जीवाकडे) कांहीं नाहीं कर्ता करविणारा सर्व शंकर आहे अशी कल्पना होऊन जें दान करावयाचें तें सहजदान होय.

अवतरणिका-एषु किं श्रेष्ठमित्यत्राह—

श्लोकः-सहजं दानमुत्कृष्टं सर्वदानोत्तमोत्तमम् ॥
शिवज्ञानप्रदं पुंसां जन्मरोगनिवर्तकम् ॥ ६ ॥

व्याख्यानं—सहजं दानं सर्वदानोत्तमानामुत्तममिति, उत्कृष्टं श्रेष्ठमित्यर्थः, कथमित्यत्र, पुंसां जननमरणलक्षणमहारोगनिवारकीभूतशिवतादात्म्यज्ञानप्रदमित्युत्तरं, ॥ ६ ॥

अर्थ-॥ ६ ॥ तीनप्रकारच्या सांगितलेल्या दानांत सहजदान हें सर्वांपेक्षां उत्तम मानलेलें आहे तें मनुष्यांस शिवज्ञानाची प्राप्ति करून देणारें असून जन्ममरणरूप रोग चुकविणारें आहे.

अवतरणिका-ननु गुरुलिंगजंगमोद्देशेनैवंभावनया दत्तमेव सहजं वेत्यत्राह—

श्लोकः-शिवाय शिवभक्ताय दीयते यदि किंचन ॥
भक्त्या तदपि विख्यातं सहजं दानमुत्तमं ॥ ७ ॥

व्याख्यानं—शिवाय इष्टलिंगातिरिक्तस्थावरलिंगरूपिणे, शिवाय दत्तं क्षेत्रादिदानं, विरक्तमूर्तिव्यतिरिक्तशिवभक्तेभ्यश्च दत्तमपि, सहजं दानमित्यर्थः ॥ ७ ॥

अर्थ- ॥ ७ ॥ स्थावर लिंगरूपी शिवाला व शिवभक्ताला जर भक्तिपूर्वक कांहीं जमीन वगैरे दान दिलें तर तें देखील उत्तम सहजदानच होय असें समजावें.

अवतरणिका-अथ तद्दानफलमाह—

श्लोकः-दानात्स्वर्णसहस्रस्य सत्पात्रे यत्फलं भवेत् ॥
एकपुष्पप्रदानेन शिवे तत्फलमिष्यते ॥ ८ ॥

व्याख्यानं—स्पष्टं ॥ ८ ॥

अर्थ-॥ ८ ॥ सत्पात्राला एक हजार मोहरा दान केल्या तर जें पुण्य लागतें तेंच पुण्य शंकराला एखादें चांगलें सुवासिक फूल भक्तीनें वाहिलें तर लागतें.

अवतरणिका-तत्कथमित्यत्र "ईशानः सर्वविद्यानामिति"

श्रुतेः ॥ सकलविद्यानिधित्वाज्जगद्गुरुत्वेन सत्पात्रतमत्वादित्यभिप्रायेणाह—

श्लोकः-शिव एव परं पात्रं सर्वविद्यानिधिगुरुः ॥
तस्मै दत्तं तु यत्किंचित्तदनंतफलं भवेत् ॥ ९ ॥

व्याख्यानं—अयमप्येकोऽर्थः शिव एव परंपात्रं तथा सर्वविद्यानिधिर्गुरुश्च परं पात्रं तस्मै शिवाय गुरवे च दत्तमनंतफलदमिति ॥ ९ ॥

अर्थ-॥ ९ ॥ शंकर हेंच उत्तम पात्र आहे, शंकर हे सर्व विद्यांचे अधिपति असून गुरु आहेत, त्यांस जर यत्किंचित् दान केलें तर त्या दानाचें अनंतपट ज्यास्त फळ मिळतें.

अवतरणिका-एवं शिवयोगिनोऽपि दत्तमपीत्याह—

श्लोकः-शिवयोगी शिवस्साक्षाच्छिवज्ञानमहोदधिः ॥
यत्किंचिद्दीयते तस्मै तद्दानं पारमार्थिकम् ॥ १० ॥

व्याख्यानं—पारमार्थिकं अपरिमितफलदसहजदानमित्यर्थः, ॥ १० ॥

अर्थ-॥ १० ॥ (~~विरक्त~~) शिवयोगी प्रत्यक्ष शंकरच आहे, व शिवज्ञानाचा महासमुद्र आहे, त्याला यत्किंचित् दान केलें तरी त्याचा अतिशय उपयोग होतो (त्याचें अक्षय्य फळ मिळतें.) परलोकीं त्याचा उपयोग होतो.

अवतरणिका-अथ शिवयोगीश्वरमहत्वमेव विशेषयति—

श्लोकः-शिवयोगी महत्पात्रं सर्वेषां दानकर्मणि ॥
तस्मान्नास्ति परं किंचित्पात्रं शास्त्रविचारतः ॥ ११ ॥

व्याख्यानं—दानकर्मणि दानकर्मविषये, सर्वेषां सत्पात्राणां, शिवयोगी महापात्रं, तस्मात्परं श्रेष्ठं पात्रं, शास्त्रविचारतः किंचिदपि नास्तीत्यर्थः ॥ ११ ॥

अर्थ-॥ ११ ॥ शिवयोगी हें श्रेष्ठ सत्पात्र आहे, कोणतेंही दान करणें असो शास्त्राचा विचार पाहूं लागलें तरीं जंगमापेक्षां उत्तम सत्पात्र दुसरें नाहीं असेंच दिसून येतें.

अवतरणिका-अथ तद्दानफलमाह—

श्लोकः-भिक्षामात्रप्रदानेन शांताय शिवयोगिने ॥
यत्फलं लभ्यते नैतद्यज्ञकोटिशतैरपि ॥ १२ ॥

व्याख्यानं—भिक्षामात्रं कवलमात्रमित्यर्थः शिष्टं स्पष्टम् ॥ १२ ॥

अर्थ–॥ १२ ॥ शांतस्वभावाच्या शिवयोग्यास (जंगमास) घांसभर अन्न दान केलें तर जें पुण्य लागतें (फळ मिळतें) तें कोटि यज्ञ केले तरी मिळत नाहीं इतकी जंगमास दान केल्याची योग्यता आहे.

अवतरणिका–तत्कथमित्यत्राह—

श्लोकः–शिवयोगिनि संतृप्ते तृप्तो भवति शंकरः ॥
तत्तृप्त्या तन्मयं विश्वं तृप्तिमेति चराचरम् ॥ १३ ॥

व्याख्यानं—"ब्रह्मविद्ब्रह्मैव यो भवतीति" श्रुतेः ॥ शिवयोगिनस्साक्षाच्छिवरूपत्वात्, तत्तृप्त्या, शिवस्तृप्तो भवति, तत्तृप्त्या, "सर्वो वै रुद्र इति" श्रुतेः तन्मयं विश्वं तृप्तिमेतीत्यर्थः ॥ १३ ॥

अर्थ–॥ १३ ॥ शिवयोगी पोटभर जेऊन तृप्त झाला ह्मणजे शंकर तृप्त होतो शंकर तृप्त झाला ह्मणजे त्याचेंच स्वरूप असलेलें हें सर्व स्थावर जंगम विश्व तृप्त होतें.

अवतरणिका–तस्मात्सर्वप्रयत्नेन शिवयोगिनमेव तृप्तिं कुर्यादित्याह—

श्लोकः–तस्मात्सर्वप्रयत्नेन येन केनापि कर्मणा ॥
तृप्तिं कुर्यात्सदाकालमन्नाद्यैः शिवयोगिनः ॥ १४ ॥

व्याख्यानं—सर्वप्रयत्नेन यया कयाचित्क्रियया, सदाकालमन्नपानादिना शिवयोगिनः तृप्तिं कुर्यादित्यर्थः ॥ १४ ॥

अर्थ–॥ १४ ॥ ह्यासाठीं हरएक प्रकारानें हरएकप्रकारचें काम करून नेहमीं अन्नवगैरे दान करून शिवयोग्याची (जंगमाची) तृप्ति करावी.

अवतरणिका–अथैवंरूपसत्पात्रेषु सहजदानसंपन्न एव साक्षाच्छिव एवेत्याह—

श्लोकः–निरुपाधिकचिद्रूपपरानंदात्मवस्तुनि ॥
समाप्तं सकलं यस्य स दानी शंकरः स्वयम् ॥ १५ ॥

व्याख्यानं—संपूर्णसच्चिदानंदलक्षणगुरुलिंगजंगमात्मनि, परमशिवे, यस्य शिवभक्तस्य, शरीरार्थप्राणरूपं सकलं वस्तु, समाप्तं समर्पितं, भवेत्, स सहजदानी स्वयमेव शिव इत्यर्थः, ॥ १५ ॥

अर्थ–॥ १५ ॥ ज्याला उपाधि नाहीं अशा चित्स्वरूपी आनंदमयरूपांत ज्याचें सर्व दान अर्पण झालें तो दान करणारा भक्त धन्य होय तो प्रत्यक्ष शंकरच समजावा.

अवतरणिका—अथैवमुक्ताखिलाचारसंपन्नः सहजदानी शिवभक्त एव माहेश्वरतामुपैति इति वृत्तेनाह—

वृत्तं:—उक्ताखिलाचारपरायणोऽसौ सदावितन्वन् सहजं तु दानम्॥
ब्रह्मादिसंपत्सु विरक्तचित्तो भक्तो हि माहेश्वरतामुपैति॥ १६ ॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते सिद्धान्तशिखामणौ माहेश्वरस्य नवविधस्थलप्रसंगो नाम नवमपरिच्छेदः समाप्तः

व्याख्यानं—अक्षरार्थस्य स्पष्टत्वात्, भावार्थो लिख्यते, देहद्रव्यक्षेत्राणि, गुरुलिंगजंगमेषु समर्प्य, श्रीगुरुकरकमले समुत्पत्य, जंगमदेवतीर्थप्रसादेनैव शरीरं धृत्वा महालिंगैक्यापेक्षी शिवभक्तः, माहेश्वरीयसदाचारवान् सन्, माहेश्वर इति, प्रसिद्धो भवेदिति, दानत्रयस्थलम्. ॥ १६ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्त्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां नवमपरिच्छेदः समाप्तः

अर्थ—॥ १६ ॥ वर जे शिवभक्ताच्या वर्तनाचे प्रकार सांगितले ते सर्व योग्यरीतीनें पाळून जो भक्त नेहमीं सहजदान सत्पात्रास अर्पण करितो ज्याला ब्रह्मा विष्णुवगैरे देवांचीं सुखें देखील कसपटाप्रमाणें वाटतात तो भक्त असला तरी महेश्वरच समजावा.

ह्याप्रमाणें वीरशैवांच्या धर्माचे निर्णय असलेल्या सिद्धान्तशिखामणीग्रंथांतील भक्तस्थलांपैकीं भक्तमार्गक्रियावगैरे वर्णन असलेला हा नववा परिच्छेद संपला.

अथ दशमपरिच्छेदः प्रारभ्यते

अथ माहेश्वरस्थलं

अवतरणिका—अथ भक्तस्थलनिरूपणानंतरमगस्त्यः श्रीरेणुकं—परिपृच्छति

॥ अगस्त्य उवाच ॥

श्लोकः—भक्तस्थलं समाख्यातं भवता गणनायक ॥
केन वाधर्मभेदेन भक्तो माहेश्वरो भवेत् ॥ १ ॥

व्याख्यानं—भक्तः शिवभक्तः केन धर्मभेदेन आचारभेदेनेत्यर्थः, माहेश्वरः स्यादिति प्रश्नार्थः, ॥ १ ॥

अर्थ—॥ १ ॥ अगस्त्य ह्मणतात हे रेणुका, प्रमथेश्वरा, तूं भक्तस्थल सांगितलेंस तें समजलें, आतां कोणता निराळेपणाचा आचार केला ह्मणजे भक्त हा भक्ताची पदवी सोडून माहेश्वराची पदवी पावतो? तें सांग.

रेणुक उवाच ॥

श्लोकः—केवले सहजे दाने निष्णातः शिवतत्परः ॥
ब्रह्मादिस्थानविमुखो भक्तो माहेश्वरः स्मृतः ॥ २ ॥

व्याख्यानं—केवले सहजे दाने निष्णातः कुशलः सन् ब्रह्मादिपदनिस्पृहः शिवभक्तः शिवतत्परः शिवैकनिष्ठः सन् माहेश्वरः स्मृत इत्यर्थः ॥

अर्थ—॥ २ ॥ रेवणसिद्ध ह्मणतात—नेहमीं शिवभजनांत तत्पर असणारा व नेहमीं सहजदान सत्पात्रास अर्पण करणारा ब्रह्मदेव विष्णुवगैरे देवांच्या सुखास देखील कसपटाप्रमाणें मानणारा भक्त हाच माहेश्वर आहे असें समजावें.

अवतरणिका—तदेव स्फुटयति—

श्लोकः—भक्तेर्यदा समुत्कर्षो भवेद्वैराग्यगौरवात् ॥
तदा माहेश्वरः प्रोक्तो भक्तः स्थिरविवेकवान् ॥ ३ ॥

व्याख्यानं—भक्तेः शिवभक्तेः समुत्कर्षः समुचितोत्कर्षः वैराग्यगौरवात् वैराग्यमहत्वात् यदा काले भवेत् तदा तस्मिन् काले स्थिरविवेकवान् स्थिरीभूत-नित्यानित्यवस्तुविवेकवान् शिवभक्तः माहेश्वर इति प्रोक्त इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ वैराग्य वरचेवर ज्यास्त वाढत जाऊन शिवभक्तीचा जेव्हां उत्कर्ष (वृद्धि) वरचेवर ज्यास्त ज्यास्त होईल तेव्हां निश्चल विचार झालेला तो भक्त माहेश्वर झाला असें समजावें.

अवतरणिका-नन्वस्यापि स्थलभेदास्संति किमित्यत्र तद्भेदमुपदिशति—

श्लोकः-माहेश्वरस्थलं वक्ष्ये यथोक्तं शंभुना पुरा ॥
माहेश्वरप्रशंसादौ लिंगनिष्ठा ततः परम् ॥ ४ ॥
पूर्वाश्रयनिरासश्च तथाद्वैतनिराकृतिः ॥
आह्वानवर्जनं पश्चादष्टमूर्तिनिराकृतिः ॥ ५ ॥
सर्वगत्वनिरासश्च शिवत्वं शिवभक्तयोः ॥
एवं नवविधं प्रोक्तं माहेश्वरमहास्थलम् ॥ ६ ॥

व्याख्यानं—पुरा पूर्वकाले शिवेन यथोक्तं तथा माहेश्वरस्थलभेदं वक्ष्ये शृण्विति शेषः आदौ माहेश्वरप्रशंसास्थलम्, ततः परं तदनंतरम् लिंगनिष्ठास्थलं तदनंतरम् पूर्वाश्रयनिरसनस्थलम्, तथा तदनंतरम् अद्वैतनिरसनस्थलम्, पश्चादाव्हाननिरसनस्थलम्, अनंतरमष्टमूर्तिनिरसनस्थलम्, अनंतरम् सर्वगत्वनिरासस्थलम्, अनंतरम् शिवजगन्मयस्थलम्, अथ भक्तदेहिकलिंगस्थलम्, एवं माहेश्वरमहास्थलं नवविधं नवप्रकारवदिति प्रोक्तं कथितमित्यर्थः, अत्र पुरा शंभुना यथोक्तं तथा वक्ष्य इत्यनेनोक्तं वक्ष्यमाणं च सर्वं न स्वकपोलकल्पितमिति सूचितम् ॥ अत्राष्टमूर्तित्वनिरसनानंतरमाव्हाननिरसनं वक्तुमुचितमिति केषांचिदाशयः परास्तः शिवोक्तक्रमविरोधादिति तथापि शिवस्य व्यापकत्वादाव्हानं न संभवतीति नोक्तं किंतु स्वेष्टलिंगे प्रतिपत्तिविरोधात्पुनराव्हानं न संभवतीति कथितत्वान्न शंकावकाशः ॥ ४ ॥ ५ ॥ ६ ॥

अर्थ-॥ ४ ॥ पूर्वीं शंकरांनीं जसें माहेश्वरस्थल आहे ह्मणून सांगितलें आहे तसेंच सांगतों ह्या माहेश्वरस्थलाचे नऊ भेद आहेत ते असे १ माहेश्वरप्रशंसास्थल २ लिंगनिष्ठास्थल. ॥ ५ ॥ ३ पूर्वाश्रयनिरसन स्थल ४ अद्वैतनिरसनस्थल ५ आव्हाननिरसनस्थल ६ अष्टमूर्तिनिरसनस्थल. ॥ ६ ॥ ७ सर्वगत्वनिरसनस्थल ८ शिवजगन्मयस्थल ९ भक्तदेहिकलिंगस्थल असे ह्या माहेश्वरस्थलाचे नऊ भेद आहेत असें समजावें.

अवतरणिका-अथोद्देशक्रमेण तदवांतरस्थलानां लक्षणं वक्ष्ये श्रूयतामित्याह—

श्लोकः-आदितः क्रमशो वक्ष्ये स्थलभेदस्य लक्षणम् ॥
समाहितेन मनसा श्रूयतां भवता मुने ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

अर्थ-॥ ७ ॥ अगस्त्यऋषे, मीं आतां पहिल्यापासून क्रमाक्रमानें स्थलभेदाचें लक्षण सांगतों तूं नीट लक्ष्य लाऊन ऐक.

अवतरणिका-अत्र "विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तीति" श्वेताश्वतरादिश्रुत्यनुसारेण सप्तभिः सूत्रैर्महेश्वरप्रशंसापूर्वकं माहेश्वरस्वरूपं प्रपंचेन प्रकाशयति—

श्लोकः-विश्वस्मादधिको रुद्रो विश्वानुग्रहकारकः ॥
इति यस्य स्थिरा बुद्धिस्स वै माहेश्वरः स्मृतः ॥ ८ ॥

व्याख्यानं—समस्तदेवदानवादिविश्वानुग्राहकः रुद्रः एक एव रुद्रो न द्वितीयोऽवतस्थ इति श्रुतिप्रसिद्धरुद्रः विश्वस्मात् विश्वं नारायणं हरिमिति श्रुतिप्रसिद्धविश्वरूपनारायणात् अधिकः इति यस्य बुद्धिर्दृढा स वै माहेश्वर इति स्मृत इत्यर्थः ॥ ८ ॥

अर्थ-॥ ८ ॥ रुद्र हा सर्व त्रैलोक्यापेक्षां श्रेष्ठ आहे, सर्व त्रैलोक्यांवर कृपा करणारा आहे, असा ज्याचा दृढनिश्चय आहे त्यास माहेश्वर ह्मणावें.

अवतरणिका-अथ न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुत्यर्थमनुसरन् माहेश्वरस्वरूपमाह—

श्लोकः-ब्रह्माद्यैर्मलिनप्रायैर्निर्मले परमेश्वरे ॥
साम्योक्तिं यो न सहते स वै माहेश्वराभिधः ॥ ९ ॥

व्याख्यानं—"ब्रह्मविष्णुरुद्रेंद्रास्ते संप्रसूयंत इति" श्रुतेः ब्रह्मादीनां जननमरणपरिपीडितत्वेन समलत्वात् "न कारणमिति" श्रुतेः एतत्कारणीभूतशिवस्याजातत्वेन निर्मलत्वात् कारणं तु ध्येयस्सर्वैश्वर्यसंपन्नस्सर्वेश्वरश्च शंभुराकाशमध्य इत्यग्रे श्रूयमाणत्वात् तैः सह साम्योक्तिं यो न सहते स माहेश्वराख्य इत्यर्थः ॥ ९ ॥

अर्थ-॥ ९ ॥ ब्रह्मदेव, विष्णु वगैरे देव पातकी आहेत त्या देवांबरोबर शंकराची बरोबरी कोणी करूं लागला तर ज्याला खपत नाहीं त्याला माहेश्वर ह्मणावें.

अवतरणिका-अथ "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोमिति" ईशानमंत्रार्थे "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति, भ्रामयंत्सर्वभूतानि यंत्रारूढानि मायया ॥ तमेवं शरणं गच्छ सर्वभावेन भारतेति" भगवद्गीतार्थं चानुस्मरन् माहेश्वरस्वरूपं प्रकाशयति—

श्लोकः—ईश्वरः सर्वभूतानां ब्रह्मादीनां महानिति ॥
बुद्धियोगात्तदासक्तो भक्तो माहेश्वरः स्मृतः ॥ १० ॥

व्याख्यानं—ब्रह्मादीनां चतुर्मुखप्रभृतीनां सर्वभूतानां समस्तपशुप्राणिनां ईश्वरः प्रेरकीभूतपरमेश्वर एक एव महान् श्रेष्ठ इति बुद्धियोगात् तदासक्तः महेश्वरासक्तः भक्तः शिवभक्तः माहेश्वर इति स्मृत इत्यर्थः ॥ १० ॥

अर्थ–॥ १० ॥ शंकर हा प्राणिमात्रांपेक्षां ब्रह्मादिकदेवांपेक्षां देखील श्रेष्ठ आहे असें समजून आपल्या समजुतीप्रमाणें त्याच्याच सेवेमध्यें गुंतलेला असतो त्यास माहेश्वर ह्मणावें.

अवतरणिका–अथ शिव एक एव मुक्तिद इति यो जानाति स माहेश्वर इति सूत्रद्वयेन कथयति—

श्लोकः–ब्रह्मादिदेवताजालं मोहितं मायया सदा ॥
अशक्तं मुक्तिदाने तु क्षयातिशयसंयुतम् ॥ ११ ॥
अनादिमुक्तो भगवानेक एक एव महेश्वरः ॥
मुक्तिदश्चेति यो वेद स वै माहेश्वरः स्मृतः ॥ १२ ॥

व्याख्यानं—क्षयातिशयसंयुतम् जननमरणातिशयेन संयुक्तं ब्रह्मविष्ण्वादिदेवतानीकं निरंतम् मायया परमेश्वरस्वातंत्र्यापरपर्यायमायाशक्त्या मोहितं अंधीकृतं सत् मुक्तिदाने तु परापरमुक्तिप्रदाने अशक्तं असमर्थं अनादिमुक्तः नित्यमुक्तः भगवान् षड्गुणैश्वर्यसंपन्नः महेश्वरः "तत्परं ब्रह्म स एकः स एको रुद्रः स ईशानः स भगवान् स महेश्वरः स महादेवः" इत्यथर्वशिरःप्रसिद्धपरमेश्वरः एक एव मुक्तिदश्चेति परापरमुक्तिप्रद इति यो वेद जानाति स वै माहेश्वर इति स्मृत इत्यर्थः ॥ ११ ॥ १२ ॥

अर्थ—॥ ११ ॥ ब्रह्मदेव वगैरे सर्व देवतांचे समुदाय मायेनें भुलून गेलेले आहेत त्यामुळें आपल्या भक्तलोकांस मोक्षप्राप्ति करून देण्यास असमर्थ आहेत व त्यांस जन्म आहे मरण आहे. ॥ १२ ॥ फक्त शंकर मात्र एक असा आहे कीं, त्याला जन्म नाहीं मरण नाहीं तो आपल्या भक्तांस मोक्षसुखाची प्राप्ति करून देतो असें ज्याला समजतें त्यास माहेश्वर ह्मणावें.

अवतरणिका–अथ ब्रह्मादिमहैश्वर्यं तृणवत् ज्ञात्वा शिवानंदतत्परो वीरमाहेश्वर इत्याह सूत्रद्वयेन—

श्लोकः–क्षयातिशयसंयुक्ता ब्रह्मविष्ण्वादिसंपदः ॥
तृणवन्मन्यते युक्त्या वीरमाहेश्वरः सदा ॥ १३ ॥

शब्दस्पर्शादिसंपन्ने सुखलेशे तु निस्पृहः ॥
शिवानंदे समुत्कंठो वीरमाहेश्वरो भवेत् ॥ १४ ॥

व्याख्यानं—विनाशातिशयेन संयुक्ता ब्रह्मविष्णवादिसंपदः वीरमाहेश्वरः शिवभक्तः युक्त्या अनित्यमिति बुद्ध्या तृणवत्सदा मनुते जानाति तस्मात् शब्द-स्पर्शादिसंपन्ने सोपाधिके सुखलेशे तुच्छसुखे निस्पृहः सन् शिवानंदे नित्यसुखे समुत्कंठः प्रीतिमान् वीरमाहेश्वरः भवेत् स्यादित्यर्थः ॥ १३ ॥ १४ ॥

अर्थ–॥ १३ ॥ ब्रह्मदेव, विष्णु वगैरे देवांच्या संपत्तिही अशाच प्रकारच्या नाशवंत आहेत त्या संपत्ति ज्याला कसपटाप्रमाणें वाटतात त्याला वीरमाहेश्वर असें ह्मणावें. ॥ १४ ॥ शब्द, स्पर्श वगैरे धर्म ज्यांत आहेत अशा विषयसुखास अल्प आणि तुच्छ मानून शिवस्वरूपाच्या आनंदाची जो आवड करितो त्याला वीरमाहेश्वर ह्मणावें.

अवतरणिका–अथ तदाचारभेदस्थितिं च षड्भिः सूत्रैः प्रतिपादयति—

श्लोकः–परस्त्रीसंगनिर्मुक्तः परद्रव्यपराङ्मुखः ॥
शिवार्थकार्यसंपन्नश्शिवागमपरायणः ॥ १५ ॥
शिवस्तुतिरसास्वादमोदमानमनाश्शुचिः ॥
शिवोत्कर्षप्रमाणानां संपादनसमुद्यतः ॥ १६ ॥
निर्ममो निरहंकारो निरस्तक्लेशपंजरः ॥
अस्पृष्टमदसंबंधो मात्सर्यावेशवर्जितः ॥ १७ ॥
निरस्तमदनोन्मेषो निर्धूतक्रोधविप्लवः ॥
सदा संतुष्टहृदयः सर्वप्राणिहिते रतः ॥ १८ ॥
निवारणसमुद्योगी शिवकार्यविरोधिनाम् ॥
सहचारी सदाकालं शिवोत्कर्षाभिधायिभिः ॥ १९ ॥
शिवापकर्षसंप्राप्तौ प्राणत्यागेऽप्यशंकितः ॥
शिवैकनिष्ठः सर्वात्मा वीरमाहेश्वरो भवेत् ॥ २० ॥

व्याख्यानं—निरस्तक्लेशपंजरः निवारिताविद्यादिक्लेशसमूहवान् निर्धूतक्रोध-विप्लवः निवारितक्रोधबाधवान् शिवैकनिष्ठः शिवलिंगैकनिष्ठः सर्वात्मा पूर्णाहं-भाववान् निरहंकारः परिच्छिन्नशरीराद्यहंभावशून्यः शिष्टं स्पष्टं एवमादिविशेषण-

विशिष्टः श्रीवीरशैवो माहेश्वरः स्यादित्यर्थः ॥ अत्र निरस्तक्लेशपंचक इति पाठांतरं ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

"इति माहेश्वरप्रशंसास्थलम्"

अर्थ–॥ १५ ॥ जो परस्त्रीकडे पापदृष्टीनें कधींही पाहत नाहीं. दुसऱ्याच्या पैशाकडे ढुंकूनही पाहत नाहीं (दुसऱ्याचें द्रव्य लबाडीनें मिळवीत नाहीं,) शिवाच्या कामांत आपलें द्रव्य आणि वेळ खर्च करितो, नेहमीं शिवागमांत सांगितलेल्या आचाराप्रमाणें आपलें आचरण ठेवितो. ॥ १६ ॥ शिवस्तुतीची गोडी लागल्यामुळें ज्याचें मन सुखांत बुडून गेलें आहे, जो निष्पापरीतीनें आपलें वर्तन ठेवितो, शिवधर्माचा उत्कर्ष ज्या रीतीनें होईल त्या रीतीनें जो शिवधर्माचा उत्कर्ष करितो. ॥ १७ ॥ ज्याला ममता नाहीं, ज्याला अभिमान नाहीं, अज्ञानपणामुळें प्राण्यास जीं संकटें भोगावीं लागतात तीं संकटें ज्याला मुळींच भोगावीं लागत नाहींत, ज्याला गर्वाचा गंध नसून मत्सरी स्वभाव त्याचा मुळींच नसतो. ॥ १८ ॥ ज्याला कामविकार मुळींच होत नाहीं व रागाचा आवेशही ज्याला येत नाहीं जो नेहमीं आनंदी स्वभावाचा दिसतो व नेहमीं प्राणिमात्रांचें हित करितो. ॥ १९ ॥ शिवकार्यास कोणी अडथळा आणल्यास तो दूर करण्यास नेहमीं झटत असतो शिवाच्या धर्माचा उत्कर्ष व्हावा असें मनापासून इच्छिणाऱ्या सज्जन लोकांचा नेहमीं स्नेह करितो. ॥ २० ॥ शिवधर्माचा ऱ्हास होण्याचा प्रसंग आल्यास आपल्या जीवाची देखील पर्वा न करितां शक्य तितका प्रयत्न करून शिवधर्माचें संकट दूर करितो, शिवधर्मावर एकनिष्ठपणानें विश्वास ठेवितो सर्व प्राणिमात्र शंकराचेच अंश असून सर्वत्र शंकर परिपूर्णपणानें भरलेला आहे असें मानितो त्यास वीरमाहेश्वर म्हणावें.

"अथ लिंगनिष्ठास्थलं"

अवतरणिका–अथ अनेन माहेश्वरेण विधीयमानां लिंगनिष्ठां नवभिः सूत्रैः प्रतिपादयति—

श्लोकः–अस्य माहेश्वरस्योक्तं लिंगनिष्ठामहास्थलम् ॥
प्राणात्ययेऽपि संपन्ने यदत्याज्यं विधीयते ॥ १ ॥

व्याख्यानं—यत् यल्लिंगनिष्ठास्थलं प्राणात्यये संपन्नेऽपि प्राणसंकटे प्राप्ते सत्यपि अत्याज्यं त्यक्तुमयोग्यं विधीयते तत् लिंगनिष्ठामहास्थलं अस्य माहेश्वरस्य शिवलिंगैकतत्परस्य माहेश्वरस्य उक्तं कथितमित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ ह्या माहेश्वरांचें लिंगनिष्ठा नांवाचें एक श्रेष्ठ स्थल आहे ह्मणून सांगितलेलें आहे. प्राण जाण्याचा प्रसंग आला तरी त्यानें लिंग सोडूं नये. अशा दृढनिश्चयाला लिंगनिष्ठास्थल ह्मणतात.

अवतरणिका-कीदृशोऽयं प्राणसंकट इत्यत्र ॥ "भवेत्प्राणपरित्यागश्च्छेदनं शिरसोऽपि वा, नत्वनभ्यर्च्य भुंजीयाद्भगवंतं त्रियंबकमिति" शिवधर्मवचनानुसारेण कथयति—

श्लोकः-अपगच्छतु सर्वस्वं शिरश्छेदनमस्तु वा ॥
माहेश्वरो न मुंचेत लिंगपूजामहाव्रतम् ॥ २ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥

अर्थ-॥ २ ॥ माहेश्वराचें सर्व द्रव्य कोणीं लुटून नेवो किंवा दुसऱ्या कोणत्या रीतीनें त्याचा नाश होवो, डोकें तुटण्याचा देखील प्रसंग येवो परंतु माहेश्वर आपल्या इष्टलिंगावरील आपली श्रद्धा कधींही कमी करीत नाहीं व लिंगपूजा करण्याचें महाव्रत सोडीत नाहीं.

अवतरणिका-अथ ये शिवपूजाव्यतिरेकेण न भुंजंति तेषां हस्ते करतलामलकवन्मोक्षलक्ष्मीरुल्लसतीत्याह—

श्लोकः-लिंगपूजामकृत्वातु ये न भुंजंति मानवाः ॥
तेषां महात्मनां हस्ते मोक्षलक्ष्मीरुपस्थिता ॥ ३ ॥

व्याख्यानं—मोक्षलक्ष्मीरुपस्थिता वर्तत इत्यर्थः । इदं लिंगनिष्ठायाः फलमित्युक्तं भवति ॥ ३ ॥

अर्थ-॥ ३ ॥ जे सज्जनलोक लिंगपूजा केल्यावांचून भोजन करीत नाहींत त्या महासामर्थ्यवान् लोकांस मोक्षलक्ष्मी त्यांच्या अगदीं हातांत असल्यासारखी आहे.

अवतरणिका-अथेममर्थमेव सूत्रद्वयेन विशेषयति—

श्लोकः-किमन्यैर्धर्मकलिलैः कीकषार्थप्रदायिभिः ॥
साक्षान्मोक्षप्रदश्शंभोर्धर्मो लिंगार्चनात्मकः ॥ ४ ॥

व्याख्यानं—शंभोः शिवस्य लिंगार्चनात्मको धर्मः साक्षान्मोक्षप्रदः तस्मात् अन्यैः शिवलिंगपूजातिरिक्तैः कीकषार्थप्रदायिभिः कुत्सितार्थदायिभिः धर्मकलिलैः क्षुद्रधर्मैः किं किं प्रयोजनमित्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ वाईट तऱ्हेच्या दुसऱ्या सर्व इच्छा परिपूर्ण करणाऱ्या इतर सामान्यधर्मास काय करावयाचें आहे? शंकराचा लिंगार्चन करण्याचा धर्म प्रत्यक्ष मोक्षप्राप्ति करून देणारा आहे.

अवतरणिका–अथ लिंगार्पितान्नपानप्राशनमहत्वमाह—

श्लोकः–अर्पितेनान्नपानेन लिंगे नियमपूजिते ॥
ये देहवृत्तिं कुर्वंति महामाहेश्वरा हि ते ॥ ५ ॥

व्याख्यानं—हि प्रसिद्धं शिष्टं स्पष्टं ॥ ५ ॥

अर्थ–॥ ५ ॥ नियमानें पूजा केलेल्या लिंगास समर्पण केलेल्या अन्नानें आणि पाण्यानें जे लोक आपल्या देहाचें रक्षण करितात शिवलिंगास अर्पण केलेलें अन्न भक्षण करितात व शिवचरणोदक प्राशन करितात ते श्रेष्ठ माहेश्वर होत.

अवतरणिका–अथ "यद्धि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोति' इतिश्रुत्यनुसारेण त्रिकरणपूर्वकं शिवलिंगनिष्ठाश्शिवा एवेत्याह—

श्लोकः–चिन्मये शांकरे लिंगे स्थिरं येषां मनः सदा ॥
विमुक्तेतरसर्वार्थं ते शिवा नात्र संशयः ॥ ६ ॥

व्याख्यानं—येषां मनः विमुक्तेतरसर्वार्थं त्यक्तस्वर्गादितुच्छफलाभिलाषं सत् चिद्रूपे शिवलिंगे सदा स्थिरं ते शिवाः भूरुद्राः अत्र अस्मिन्नर्थे न संशय इत्यर्थः॥६॥

अर्थ–॥ ६ ॥ चित्स्वरूप अशा शंकरलिंगांत ज्याचें मन नेहमीं स्थिर असतें इतर कोणत्याही गोष्टीकडे मुळींच जात नाहीं ते प्रत्यक्ष शंकर होत ह्यांत कांहीं संशय नाहीं.

अवतरणिका–नन्विदं चिद्रूपलिंगे मनोमात्रविश्रांतिरुक्तेत्याशंक्य सूत्रांतरेण करणत्रयविश्रांतिं च दर्शयति—

श्लोकः–लिंगे यस्य मनो लीनं लिंगस्तुतिपरा च वाक् ॥
लिंगार्चनपरौ हस्तौ स रुद्रो नात्र संशयः ॥ ७ ॥

व्याख्यानं—इति स्पष्टं ॥ ७ ॥

अर्थ–॥ ७ ॥ लिंगस्वरूपाच्या ध्यानांत ज्याचें मन गढून गेलें आहे, लिंगस्वरूपाचें वर्णन करण्यांत ज्याची वाचा नेहमीं तयार असते, ज्याचे हात नेहमीं लिंगपूजन करण्यांत गुंतले असतात तो रुद्र आहे ह्यांत शंका नाहीं.

अवतरणिका-एवं लिंगनिष्ठस्याग्निहोत्रादिकर्मणा प्रयोजनं नास्तीत्याह—

श्लोकः-लिंगनिष्ठस्य किं तस्य कर्मणा स्वर्गहेतुना ॥
नित्यानंदशिवप्राप्तिर्यस्य शास्त्रेषु निश्चिता ॥ ८ ॥

व्याख्यानं—यस्य लिंगनिष्ठस्य नित्यानंदशिवपदप्राप्तिः शास्त्रेषु वेदागमपुराणेषु निश्चितेति तस्य स्वर्गहेतुना अग्निहोत्रादिकर्मणा किं किं प्रयोजनं न किंचित्प्रयोजनमित्यर्थः ॥ ८ ॥

अर्थ-॥ ८ ॥ ज्याचा इष्ट लिंगावर दृढ निश्चय आहे त्याला स्वर्गप्राप्ति होण्यासाठीं इतर कर्में करण्याचें काय कारण आहे? कां तर त्याला नेहमीं आनंद देणारी शिवप्राप्ति व्हावयाचीच हें ठरलेलें आहे.

अवतरणिका-अथास्य महत्वं प्रतिपादयति—

श्लोकः-लिंगनिष्ठापरं शांतं भूतिरुद्राक्षसंयुतम् ॥
प्रशंसंति सदाकालं ब्रह्माद्या देवता मुदा ॥ ९ ॥

व्याख्यानं—स्पष्टं ॥ ९ ॥

"इति लिंगनिष्ठास्थलम्"

अर्थ-॥ ९ ॥ जो नेहमीं इष्टलिंगावर दृढ निश्चय ठेवितो, ज्याचा स्वभाव शांत आहे, ज्यानें कपाळास व आंगास विभूति लावून गळ्यांत रुद्राक्षांच्या माळा घातल्या आहेत त्या मनुष्याची ब्रह्मदेव वगैरे देव देखील आनंदानें प्रशंसा करितात.

"अथ पूर्वाश्रयनिरसनस्थलम्"

अवतरणिका-अथ"गुरुसंस्कृतभावः सन् गुरुनिर्मितदेहवान्, विस्मृत्यपूर्वदुर्भावं तदधीनः समाचरेदिति" योगजागमवचनानुसारेण तस्य लिंगनिष्ठस्य प्रातिकूल्येन प्राप्तपूर्वाश्रयनिरसनस्थलं सप्तभिः सूत्रैः प्रतिपादयति—

श्लोकः-लिंगैकनिष्ठहृदयः सदा माहेश्वरो जनः ॥
पूर्वाश्रयगतान् धर्मांस्त्यज्येत्स्वाचाररोधकान् ॥ १ ॥

व्याख्यानं—निरंतरम् शिवलिंगैकनिष्ठचित्तः वीरमाहेश्वरः स्वाचाररोधकान् स्वसमयाचारविरोधिनः पूर्वाश्रयनिष्ठान् धर्मान् प्राकृताचारान् त्यजेदित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ लिंगावर दृढनिश्चय ठेवणाऱ्या माहेश्वरानें लिंगैकनिष्ठहृदय होण्यापूर्वी आपलें जें वर्तन होतें त्या वर्तनानें आचारास बाध येत असल्यास तें वर्तन सोडून द्यावें.

अवतरणिका-तर्ह्ययं कीदृश इत्यत्राह—

श्लोकः-स्वजातिकुलजान् धर्मान् लिंगनिष्ठाविरोधिनः ॥
त्यजन् माहेश्वरो ज्ञेयः पूर्वाश्रयनिरासकः ॥ २ ॥

व्याख्यानं—लिंगनिष्ठाविरोधिनः लिंगनिष्ठाप्रतिकूलान् स्वजातिकुलजान् ब्राह्मणत्वादिजातिकुलालादिकुलप्राप्तान् धर्मान् जातप्रेताशौचादीन् त्यजन्वीरमाहेश्वरः पूर्वाश्रयनिरासक इति ज्ञातुं योग्य इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ लिंगनिष्ठेला प्रतिकूल असणारे ब्राह्मण वगैरे जाती व कुंभार वगैरे कुलापासून आलेल्या सोयर सूतक वगैरे धर्म सोडणाऱ्या माहेश्वरास पूर्वाश्रयनिरासक असें ह्मणतात.

अवतरणिका-ननु पूर्वाश्रयप्राप्तनित्यनैमित्तिककर्मपरित्यागे प्रत्यवायश्रवणात् कथं तद्धर्मास्त्यजनीया इत्यत्राह—

श्लोकः-शिवसंस्कारयोगेन विशुद्धानां महात्मनाम् ॥
किं पूर्वकालिकैर्धर्मैः प्राकृतानां हि ते मताः ॥ ३ ॥

व्याख्यानं—पूर्वोक्तदानक्षपणलक्षणदीक्षारूपशिवसंस्कारसंबंधेन लिंगनिष्ठया च विधूतवृत्तवर्तिष्यमाणसकलकल्मषत्वेन निर्मलानां शिवशरणानां पूर्वाश्रयप्राप्तनित्यनैमित्तिकादिकर्मभिः किं किं प्रयोजनं न किंचित्प्रयोजनमित्यर्थः ननु प्रत्यवायनिवृत्तिरेव प्रयोजनमितिचेन्न "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते, स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादिति" भगवतैव भाषितत्वात् अस्यायमर्थः "अत्याश्रमिभ्यः परमं पवित्रमिति" श्रुतिसिद्धांतितवर्णाश्रमे इह अभिक्रमः आत्माभिमुखीकरणप्रवीणगुरुकारुण्यप्राप्तभूतिधारणाद्याचारक्रमः तस्य नाशो नास्ति विस्मृतिशून्यत्वेन तदेकनिष्ठया सदा विधीयमानत्वेन विच्छेदो नास्तीत्यर्थः। नन्वेवंचेत् नित्यनैमित्तिककर्मलोपात्प्रत्यवायः स्यादित्यत्राह प्रत्यवायो न विद्यत इति कुत इत्यत्राह अस्य धर्मस्य शिवानुसंधानांगभूतभूतिधारणादिधर्मस्य स्वल्पमपि लेशमात्रमपि महतो भयात् महापातकादिभयात् त्रायत इति यथापूर्वाश्रमधर्मपरित्यागे संन्यासिनां प्रत्यवायो नास्ति तथा शिवाश्रयनिष्ठानां पूर्वाश्रयधर्मपरित्यागे प्रत्यवायो नास्तीति भावः ते पूर्वाश्रयधर्माः प्राकृतानां हि मायासंबंधिनामेव मताः प्रोक्ता इति हि प्रसिद्धम् तस्मात् ॥ ३ ॥

अर्थ-॥ ३ ॥ शिवदीक्षेचा संस्कार झाल्यामुळें निर्दोष झालेल्या सज्जन पुरु-

षांस पूर्वींचे ते खोटे धर्म घेऊन काय करावयाचें आहे ? नीचलोकांसच ते आचार योग्य आहेत. शिवभक्तास (माहेश्वरास) योग्य नाहींत.

श्लोकः–शिवसंस्कारयोगेन शिवधर्मानुषंगिणाम् ॥
प्राकृतानां न धर्मेषु प्रवृत्तिरुपपद्यते ॥ ४ ॥

व्याख्यानं—नोपपद्यते न जायत इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवदीक्षेचा योग झाल्यामुळें शिवधर्माचा आश्रय करणाऱ्या शिवयोग्याचें मन नीचलोकांच्या धर्माकडे कधींच जात नाहीं.

अवतरणिका–ननु मर्त्येषु द्वैविध्यं कथमित्यत्राह—

श्लोकः–विशुद्धाः प्राकृताश्चेति द्विविधा मानुषाः स्मृताः ॥
शिवसंस्कारिणः शुद्धाः प्राकृता इतरे मताः ॥ ५ ॥

व्याख्यानं—स्पष्टम्॥ ५ ॥

अर्थ–॥ ५ ॥ मनुष्यांचे दोन भेद मानले आहेत, एक शुद्ध आणि दुसरा प्राकृत ज्या मनुष्यांस शिवदीक्षेचा संस्कार झालेला आहे ते शुद्ध आणि ज्यांस शिवदीक्षेचा संस्कार झाला नाहीं ते प्राकृत लोक समजावेत.

अवतरणिका–ननु वर्णाश्रमधर्मेषु द्वैविध्यं न दृश्यत इत्यत्राह—

श्लोकः–वर्णाश्रमादिधर्माणां व्यवस्था हि द्विधा मता ॥
एका शिवेन निर्दिष्टा ब्रह्मणा कथिता परा ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ वर्णाश्रमधर्माची व्यवस्था दोन प्रकारची मानली आहे, एक शंकरांनीं सांगितलेली आणि दुसरी ब्रह्मदेवानें सांगितलेली अशा ह्या दोन झाल्या.

अवतरणिका–तर्हि को धर्मः कस्येत्यत्राह—

श्लोकः–शिवोक्तधर्मनिष्ठा तु शिवाश्रमनिषेविणाम् ॥
शिवसंस्कारहीनानां धर्मः पैतामहः स्मृतः ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

"इति पूर्वाश्रयनिरसनस्थलम्"

अर्थ–॥ ७ ॥ शिवधर्माप्रमाणें आचरण करणाऱ्या लोकांस शिवानें सांगितलेल्या धर्मावर विश्वास ठेवणें योग्य असून शिवधर्माचा संस्कार झाला नाहीं अशा लोकांस ब्रह्मदेवानें सांगितलेल्या धर्मावर निष्ठा ठेवणें योग्य आहे.

"अथ सर्वाद्वैतनिरसनस्थलम्"

अवतरणिका–अथ माहेश्वरः यथा लिंगनिष्ठाविरोधित्वात् पूर्वाश्रयनिरासकः तथा लिंगनिष्ठाविरोधित्वात् सर्वाद्वैतनिरासकोऽपि भवेदिति तेन विधीयमानसर्वाद्वैतनिरसनस्थलं प्रतिपादयति—

श्लोकः–पूज्यपूजकयोर्लिंगजीवयोर्भेदवर्जने ॥
पूजाकर्माद्यसंपत्तेर्लिंगनिष्ठाविरोधतः ॥ १ ॥
सर्वाद्वैतविचारस्य ज्ञानाभावे व्यवस्थितेः ॥
भवेन्माहेश्वरः कर्मी सर्वाद्वैतनिरासकः ॥ २ ॥

व्याख्यानं—पूज्यपूजकयोः शिवलिंगभक्तयोः भेदाभावे सति लिंगनिष्ठाविरोधात् पूजाकर्मादिसंपत्त्यभावात् सर्वाद्वैतविचारस्य व्यवस्थितेः वर्तनस्य ज्ञानाभावे अनुपपन्नत्वे सति कर्मी माहेश्वरः शिवलिंगपूजादिकर्मनिष्ठवीरमाहेश्वरः सर्वाद्वैतनिरासकः स्यात् "यावदायुस्त्रयो वंद्या वेदांतो गुरुरीश्वर इति" वेदांतवचनात् ॥ "क्रियाद्वैतं न कर्तव्यमिति" सिद्धांतवचनाच्च, लिंगनिष्ठो माहेश्वरः सर्वाद्वैतं न कुर्यादिति भावः ॥ १ ॥ २ ॥

अर्थ–॥ १ ॥ पूजा करणारा भक्त (जीव) आणि पूजा करावयाचें लिंग ह्या दोहोंचा निराळेपणा नाहींसा झाला तर पूजा करणें व लिंगावर निष्ठा ठेवणें ह्यास बाध येतो. ॥ २ ॥ ह्यास्तव सर्व अद्वैत विचाराची प्रवृत्ति नाहींशी झाली तर तो कर्मी (शिवलिंगपूजा करणारा) माहेश्वर अद्वैतनिरासक होतो.

अवतरणिका–अथ भेदेन क्रियमाणपूजाप्रकारः कथमित्यत्राह—

श्लोकः–प्रेरकं शंकरं बुध्वा प्रेर्यमात्मानमेव च ॥
भेदात्तं पूजयेन्नित्यं न चाद्वैतपरो भवेत् ॥ ३ ॥

व्याख्यानं—जीवानां धर्माधर्मगोचरीभूतबुद्धिवृत्तिप्रेरकः परमेश्वरः तत्प्रेर्या जीवा इति बुध्वा एवंविधभेदात्तं परमेश्वरं नित्यं पूजयेत् अद्वैतपरो न भवेत् पूजाविरोधादिति ॥ ३ ॥

अर्थ–॥ ३ ॥ प्रेरणा करणारा शंकर आहे, ज्यास प्रेरणा करावयाची तो आत्मा (जीव) आहे, ह्या निराळेपणामुळें द्वैतमत पाळणाऱ्या वीरशैवानें शंकराची नित्य पूजा केली पाहिजे, क्रियेविषयीं त्यानें अद्वैतपर होऊं नये.

अवतरणिका–अथ प्रकारांतरेण भेदमुपपादयति—

श्लोकः–पतिः साक्षान्महादेवः पशुरेष तदाश्रयः ॥
अनयोः स्वामिभृत्यत्वमभेदे कथमिष्यते ॥ ४ ॥

व्याख्यानं—महादेवः परमेश्वरः "पतिं विश्वस्येति" स्मृतेः पतिः जगत्पतिः तदाश्रय एष जीवः पशुः अनयोः शिवजीवरूपपतिपश्वोः अभेदे भेदाभावे स्वामिभृत्यत्वं कथमिष्यते इच्छाविषयी क्रियते न कथंचिदपीति स्वामिभृत्यत्वलक्षणभेदेनैव पूजनीय इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ महादेव हा पशुपति आहे, आणि त्या महादेवाच्या आश्रयानें राहणारा जीव हा पशु आहे त्या दोघांचा धनीपणा आणि सेवकपणा एक (ह्या दोघांला अभेद) कसा होईल?

अवतरणिका–नन्वयं भेदभावः कियत्पर्यंतमनुवर्तत इत्यत्राह—

श्लोकः–साक्षात्कृतं परं तत्वं यदा भवति बोधतः ॥
तदाद्वैतसमापत्तिर्ज्ञानहीनस्य न क्वचित् ॥ ५ ॥

व्याख्यानं—बोधतः श्रुतिगुरुस्वानुभवबोधतः परं तत्वं परशिवपरब्रह्माख्यमहालिंगतत्वं यदा साक्षात्कृतं भवति दशमदृष्टांतेन स्वात्मा भेदेन प्रत्यक्षीकृतं भवति तदा अद्वैतसमापत्तिः अद्वैतस्फूर्तिः ज्ञानहीनस्य श्रुतिगुरुस्वानुभावरहितस्य केवलकर्मयुतस्य क्वचित् कदाचित्किंचिदपि न नास्तीत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ ज्ञान होऊन श्रेष्ठ शिवतत्व जेव्हां प्रत्यक्ष होईल तेव्हां अद्वैताची पूर्ण योग्यता आंगीं येईल. एरव्ही ज्ञानहीन मनुष्यास कधींही येणार नाहीं.

अवतरणिका–ननु कर्मिणः कस्मान्नाद्वैतसिद्धिरित्यत्राह—

श्लोकः–भेदस्य कर्महेतुत्वाद्व्यवहारः प्रवर्तते ॥
लिंगपूजादिकर्मस्थो न चाद्वैतं समाचरेत् ॥ ६ ॥

व्याख्यानं—भेदस्य व्यवहारः जीवेश्वरभेदव्यवहारः कर्महेतुत्वात् शिवपूजादिक्रियाहेतुत्वेन प्रवर्तते अतः शिवलिंगपूजाजपादिकर्मनिष्ठः अद्वैतं न समाचरेत् तस्माल्लिंगपूजादिकर्मनिष्ठस्य अद्वैतबोधाविर्भावो नास्तीत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ लिंगपूजा वगैरे कर्म करण्यामुळें निराळेपणा शिवांत आणि जीवांत आहे हें उघड दिसून येतें, ह्यासाठीं लिंगपूजा वगैरे कर्म करणाऱ्या वीरशैवानें अद्वैत मानूं नये.

अवतरणिका–अथोक्तार्थमुपसंहरति—

श्लोकः–पूजादिव्यवहारः स्याद्भेदाश्रयतया सदा ॥
लिंगपूजापरस्तस्मान्नाद्वैते निरतो भवेत् ॥ ७ ॥

व्याख्यानं—लिंगपूजानिष्ठो वीरमाहेश्वरः अद्वैते निरतः आसक्तः न भवेत् न स्यादित्यर्थः ॥ ७ ॥

"इत्यद्वैतनिरसनस्थलम्"

अर्थ–॥ ७ ॥ निराळेपणा आहे अशी कल्पना केली ह्मणजे लिंगपूजा वगैरे कर्म वीरशैवास करावें लागतें, ह्यास्तव लिंगपूजा करण्यांत तत्पर असणाऱ्या वीर शैवानें अद्वैत शास्त्रास महत्व देऊं नये. (मी आणि शंकर एकच आहें असा निरर्थक गर्व करून लिंगपूजा करणें वगैरे आपलें कर्तव्यकर्म सोडून देऊं नये.)

"अथाह्वाननिरसनस्थलम्"

अवतरणिका–अथ शिवलिंगपूजार्थमद्वैतं निरस्य द्वैतांगीकारवान्माहेश्वरः शैव इव पूजार्थं शिवलिंगे शिवं नावाहयेदित्याह्वाननिरसनस्थलं कथयति—

श्लोकः–लिंगार्चनपरश्शुद्धस्सर्वाद्वैतनिरासकः ॥
स्वेष्टलिंगे शिवाकारे न तमावाहयेच्छिवम् ॥ १ ॥

व्याख्यानं—लिंगार्चनपरः शिवलिंगपूजातत्परः सन् सर्वाद्वैतनिरासकः शुद्धः नित्यशुद्धवीरमाहेश्वरः शिवाकारे शिवस्वरूपवति स्वेष्टलिंगे तं प्रसिद्धं शिवं नावाहयेदित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ नेहमीं लिंगपूजन करण्यांत तत्पर असणारा, निष्पाप स्वभावाचा, सर्वप्रकारचें अद्वैत सोडून देणारा वीरशैव शिवस्वरूपी आपल्या त्या इष्टलिंगाची पूजा करीत असतां त्यानें शंकरास आवाहन करूं नये. (शिवपूजन करणारा शैव शिवपूजेच्या वेळीं जसें शिवास आवाहन करितो तसें वीरशैवानें आवाहन करूं नये.)

अवतरणिका–अथ कस्मादित्यत्र कारणमाह—

श्लोकः–यदा शिवकलायुक्तं लिंगं दद्यान्महागुरुः ॥
तदारभ्य शिवस्तत्र तिष्ठत्याह्वानमत्र किम् ॥ २ ॥

व्याख्यानं—अत्र शिवलिंगे आह्वानं किं प्रयोजनं न किंचित्प्रयोजनमित्यर्थः शिष्टं स्पष्टं ॥ २ ॥

अर्थ-॥ २ ॥ ह्याचें कारण असें कीं, जेव्हां त्याच्या श्रेष्ठ गुरूनें त्याला शिवशक्तीचें अधिष्ठान असलेलें लिंग दिलें त्या वेळेपासून शिव त्या लिंगांत रहातच आहे मग निराळें पुन्हां शिवास आवाहन करण्याचें काय कारण आहे?

अवतरणिका–पुनश्च कारणांतरमाह—

श्लोकः–स संस्कारेषु लिंगेषु सदा सन्निहितश्शिवः ॥
तत्राह्वानं न कर्तव्यं प्रतिपत्तिविरोधकम् ॥ ३ ॥

व्याख्यानं—पुनराह्वानं पूर्वाह्वानविरोधि तद्विसर्जनानंतरभावित्वादिति भावः ॥ ३ ॥

अर्थ-॥ ३ ॥ त्या संस्कार केलेल्या लिंगांत शिव राहत नाहीं असें नाहीं निरंतर राहतोच, ह्यासाठीं लिंगपूजेच्या वेळीं पुन्हां शिवाचें आवाहन करण्याचें कारण नाहीं, केल्यास तें चुकीचें आहे.

अवतरणिका–अथाह्वानासंभवादेव विसर्जनं च नास्तीत्याह—

श्लोकः–नाह्वानं न विसर्गं च स्वेष्टलिंगे तु कारयेत् ॥
लिंगनिष्ठापरो नित्यमिति शास्त्रस्य निश्चयः ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

"इत्याह्वाननिरसनस्थलम्"

अर्थ-॥ ४ ॥ लिंगावर दृढ विश्वास ठेवणाऱ्यानें इष्टलिंगाचे पूजेच्या वेळीं शिवाचें आवाहनही करूं नये आणि विसर्जनही करूं नये, असा शास्त्राचा तात्पर्यार्थ आहे.

"अथ अष्टमूर्तिनिरसनस्थलं"

अवतरणिका–अथ शिवलिंगमेव शिव इत्यभिप्रायेणाह्वानं निराकृत्य पृथिव्याद्यष्टमूर्तित्वं च न संभवति भेदादिति तेन माहेश्वरेण विधीयमानाष्टमूर्तिनिरसनस्थलं प्रदर्शयति—

श्लोकः–यथात्मशिवयोरैक्यं न मतं कर्मसंगिनः ॥
तथा शिवात्पृथिव्यादेरद्वैतमपि नेष्यते ॥ १ ॥

व्याख्यानं—कर्मसंगिनः शिवपूजादिकर्मनिष्ठस्य माहेश्वरस्य आत्मशिवयोः जीवलिंगयोः ऐक्यमेकत्वं यथा न मतं न संमतं पूज्यपूजकविवेकासंभवात्

तथा शिवाद्भूम्यादेरद्वैतमभेदोऽपि नेष्यते भूम्याद्यष्टमूर्तिष्वात्मनोऽपि प्रविष्टत्वादिति भावः ॥ १ ॥

अर्थ–॥ १ ॥ ज्याप्रमाणें शिवलिंगाची पूजा करणाऱ्या वीरशैवाला लिंगाचें आणि जीवाचें निराळेपण नाहीं असें ह्मणणें संमत नाहीं त्याप्रमाणेंच शिवाचें आणि पंचमहाभूतांचें निराळेपण नाहीं असें ह्मणतां येत नाहीं.

अवतरणिका–अथ शिवस्य पृथिव्यादेरभेदोऽपि न संभवतीत्यत्राह—

श्लोकः–पृथिव्याद्यष्टमूर्तित्वमीश्वरस्य प्रकीर्तितम् ॥
तदधिष्ठातृभावेन न साक्षादेकभावतः ॥ २ ॥

व्याख्यानं—यस्य पृथ्वीशरीरमित्यारभ्य यस्यात्मा शरीरमित्यंतबृहदारण्यश्रुतिप्रोक्ताष्टमूर्तित्वं तदधिष्ठातृभावेन पृथिव्याद्यष्टमूर्तित्वं तदधिष्ठातृभावेन पृथिव्याद्यष्टमूर्त्यधिष्ठातृत्वेन प्रकीर्तितम् "विश्वं महेश्वरभवानधितिष्ठतीति विश्वात्मतामुपचरंति यदागमास्ते" इत्यभियुक्तोक्तेः यथा स्तनस्तन्ययोर्भेदेऽपि स्तनं पिबंतीति व्यवहारः तथा अभेदव्यवहार औपचारिकः साक्षादेकभावतो न "द्वयमुष्णं द्वयं शीतमनुष्णाशीतलं द्वयम् ॥ द्वयमस्पर्शमित्यष्टौ पांतु वो हरमूर्तय इति" तासां परस्परभिन्नत्वात् शरीरशरीरिभावस्य भेदघटितत्वाच्चेति ॥ २ ॥

अर्थ–॥ २ ॥ शंकर हे अष्टमूर्ति आहेत, पृथ्वी, आप्, तेज, वायु, आकाश, सूर्य, चंद्र यजमान (आत्मा) हे सर्व शंकराचे अंश असून सर्व मिळून एक शंकराचें शरीर तयार होतें, त्या त्या अंशांत शंकर असल्यामुळें पृथिव्यादिक पंचमहाभूतें आणि शंकर एकच आहेत असें होतें तरी एक ह्मणतां येत नाहीं.

अवतरणिका–अथ कार्यकारणभावाच्च तयोरैक्यं न संभवतीत्याह—

श्लोकः–पृथ्व्यादिकमिदं सर्वं कार्यं कर्ता महेश्वरः ॥
नैतत्साक्षान्महेशोऽयं कुलालो मृत्तिका यथा ॥ ३ ॥

व्याख्यानं—"ब्रह्मविष्णुरुद्रेंद्रास्ते संप्रसूयंते सर्वाणि चेंद्रियाणि सह भूतैर्नकारणं कारणं तु ध्येयः शंभुराकाशमध्य" इति श्रुतेः पृथिव्यादेः कार्यकोटिप्रविष्टत्वात् शिवस्य कारणरूपत्वात् एवं च मृच्छब्दोपलक्षितघटादेः कुलालस्य च यथैक्यं न संभवति तथा कार्यरूपभूम्यादेः कारणात्मनः शिवस्य चाभेदो न संभवतीत्यर्थः॥३॥

अर्थ–॥ ३ ॥ पृथ्वी वगैरे पंचमहाभूतें कार्य असून महादेव हा कर्ता आहे हें स्पष्ट समजण्यासारखें नसल्यास कुंभार आणि माती ह्यांचा दृष्टांत बरोबर

जमतो. कुंभार कर्ता असून माती कार्य आहे, त्याप्रमाणेंच शंकर कर्ता असून पृथ्वी वगैरे पंचमहाभूतें हीं कार्य होत; त्यापासून जग निर्माण होतें.

अवतरणिका–ननु घटकुलालयोरिवेश्वरस्य भूम्यादेरात्यंतिकभेदः किमित्यत्राह—

श्लोकः–पृथिव्याद्यात्मपर्यंतप्रपंचो ह्यष्टधा स्थितः ॥
तनुरीशस्य चात्मायं सर्वतत्वनियामकः ॥ ४ ॥

व्याख्यानं—पृथिव्यप्तेजोवाय्वाकाशचंद्रसूर्याग्निहोत्रिरूपेणात्मपर्यंतमष्टधा स्थितः प्रपंचः सर्वोऽपीशस्य शरीरं अयमीशस्सर्वतत्वनियामकः सर्वतत्वात्मकशरीरप्रेरकीभूतः आत्मा शरीरीत्यर्थः एवं च घटकुलालयोर्देहदेहिभावशून्यत्वात्ततो विशेष इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ पृथ्वी, आप्, तेज, वायु, आकाश, चंद्र, सूर्य, अग्निहोत्री (आत्मा) हा आठ प्रकारचा प्रपंच मिळून शंकराचें शरीर आहे, हा आत्मा शंकर सर्व तत्वांस योग्यरीतीनें वागविणारा आहे.

अवतरणिका–तर्ह्यभेदः किमित्यत्राह—

श्लोकः–शरीरभूतादेतस्मात्प्रपंचात्परमेष्ठिनः ॥
आत्मभूतस्य देवस्य नाभेदो न पृथक्स्थितिः ॥ ५ ॥

व्याख्यानं—परमेष्ठिनः शिवस्य शरीरभूतात् एतस्मात् इदमित्यंगुलिनिर्देश्यत्वेन प्रतीयमानात् प्रपंचात् अभेदो न भेद एवेत्यर्थः तथाप्यात्मभूतस्य विश्वशरीरिणः देवस्य न पृथक्स्थितिः घटपटयोरिव परस्परबाह्यत्वे स्थितिर्नास्ति शिवस्य व्यापकत्वादिति भावः ॥ ५ ॥

अर्थ–॥ ५ ॥ ह्यामुळें हे सर्व आठ भाग प्रपंच मिळून एक शंकराचें शरीर मानलें असल्यानें शंकर त्या शरीरांत आत्म्यासारखे राहतात, त्या पृथ्वी वगैरे पंचमहाभूतांशीं शंकराचा निराळेपणा नाहीं असेंही ह्मणतां येत नाहीं, आणि आहे असेंही ह्मणतां येत नाहीं.

अवतरणिका–तर्हि भेदः कथमित्यत्राह—

श्लोकः–अचेतनत्वात्पृथ्व्यादेरज्ञत्वादात्मनस्तथा ॥
सर्वज्ञस्य महेशस्य नैकरूपत्वमिष्यते ॥ ६ ॥

व्याख्यानं—भूम्यादेर्जडत्वात् आत्मन अग्निहोत्रिणो यजमानस्याज्ञत्वात् किंचिज्ज्ञत्वादित्यर्थः महेशस्य चराचरलक्षणविश्वशरीरस्य शिवस्य सर्वज्ञत्वादि-

त्यर्थः एकरूपत्वं रूपशरीरशरीरिणोरैक्यं नेष्यते नेच्छाविषयीक्रियते तस्माद्भेद-एवेत्यर्थः ॥ ६ ॥

अर्थ-॥ ६ ॥ पृथ्वी वगैरे पंचमहाभूतें अचेतन (निर्जीव) आहेत, आत्मा (जीव) अज्ञान आहे महेश्वर सर्वज्ञ आहे त्याचें आणि जडस्वरूप पृथ्वी वगैरे पंचमहाभूतांचें आणि आत्म्याचें एक रूप कसें होईल ? कधींच होणार नाहीं.

अवतरणिका-नन्वेवं भेदज्ञानवान् कोऽसावित्यत्राह—

श्लोकः-इति यश्चिंतयेन्नित्यं पृथ्व्यादेरष्टमूर्तितः ॥
विलक्षणं महादेवं सोऽष्टमूर्तिनिरासकः ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

"इत्यष्टमूर्तिनिरसनस्थलम्"

अर्थ-॥ ७ ॥ ह्याप्रमाणें जो वीरशैव नेहमीं पृथ्वी वगैरे अष्टमूर्तींहून शंकर हा विलक्षण (निराळा) आहे असें मानतो त्याला अष्टमूर्तिनिरासक असें ह्मणावें.

"अथ सर्वगतनिरसनस्थलम्"

अवतरणिका-अथ माहेश्वरस्य लिंगनिष्ठाविरोधिसर्वगत-निरसनस्थलं प्रकाशयति —

श्लोकः-सर्वगत्वे महेशस्य सर्वत्राराधनं भवेत् ॥
न लिंगमात्रे तन्निष्ठो न शिवं सर्वगं स्मरेत् ॥ १ ॥

व्याख्यानं—महेश्वरस्य सर्वगत्वे सर्वत्राराधनं स्यात् लिंगमात्रे न स्यात् तस्माल्लिं-गनिष्ठः शिवं सर्वगतं न स्मरेदित्यर्थः, ॥ १ ॥

अर्थ-॥ १ ॥ शंकर हा सर्वत्र व्यापलेला आहे ह्यास्तव कशाचेंही पूजन केलें तरीं शंकरास पोंचतें मग लिंगपूजा केली ह्मणजेच शिवपूजा होते असें ह्मणण्याचें कारण नाहीं असें होईल, ह्यास्तव लिंगावर दृढ विश्वास ठेवणारा मनुष्य लिंगांतच शंकर आहे असें मानतो; सर्वत्र शंकर व्यापलेला आहे असें मानीत नाहीं.

अवतरणिका-ननु शिवस्य सर्वगत्वाभावे परिच्छिन्नत्वेन लोके भक्तबाहुल्यात् तत्तच्छरीरसंगतेष्टलिंगानां च बाहुल्यादे-कत्र विश्रमिताशेषशरीरभारस्यान्यत्रावस्थानासंभवात् कथं तत्र तत्र स्थितिः संभवतीत्यत्राह—

श्लोकः—सर्वगोऽपि स्थितश्शंभुस्स्वाधारे हि विशेषतः ॥
तस्मादन्यत्र विमुखः स्वेष्टलिंगे यजेच्छिवम् ॥ २ ॥

व्याख्यानं—शंभुस्सर्वगोऽपि व्यापकोऽपि स्वाधारे स्वाश्रयीभूतलिंगे विशेषतः अतिशयेन स्थितो भवति तस्मादन्यत्र विमुखः सन् स्वेष्टलिंगे शिवं पूजयेदित्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ शंकर हा सर्वत्र व्यापलेला आहे ही गोष्ट जरी खरी आहे तरी आपलें रहावयाचें मुख्य ठिकाण लिंग त्यांतच तो ज्यास्त राहतो, ह्यासाठीं शिवलिंगाहून इतर स्थलांकडे दुर्लक्ष्य करून वीरशैवानें शिवलिंगाचीच पूजा करावी.

अवतरणिका—ननु सर्वगतः शिवस्तत्र तत्र लिंगे कथं विशेषेण तिष्ठतीत्यत्राह—

श्लोकः—शिवस्सर्वगतश्चापि स्वाधारे व्यज्यते भृशम् ॥
शमीगर्भे यथा वह्निर्विशेषेण विभाव्यते ॥ ३ ॥

व्याख्यानं—वृक्षस्थितो वन्हिः शमीवृक्षे यथा विशेषेण भासते तथा शिवस्सर्वगतोऽपि स्वाधारे लिंगे भृशं अतिशयेन व्यज्यते प्रकाशत इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ शंकर सर्व ठिकाणीं व्यापलेला आहे तरी आपल्या मुख्य ठिकाणीं ज्यास्त रहातो. प्रत्येक झाडांत अग्नि तर आहेच परंतु त्यांतलें त्यांत शमीच्या झाडांत ज्यास्त आहे त्याचप्रमाणें शंकरही आपल्या मुख्य ठिकाणीं (लिंगांत) ज्यास्त रहातो.

अवतरणिका—ननु लिंगे किमर्थं विशेषेण तिष्ठतीत्यत्राह—

श्लोकः—सर्वगत्वं महेशस्य सर्वशास्त्रविनिश्चितम् ॥
तथाप्याश्रयलिंगेन पूजार्थमधिका स्थितिः ॥ ४ ॥

व्याख्यानं—अत्रादिशब्देन गुरुचरमूर्ती लक्ष्येते शिष्टं स्पष्टं ॥ ४ ॥

अर्थ—॥ ४ ॥ महेश्वर सर्व ठिकाणीं व्यापलेला आहे ही गोष्ट तर सर्व शास्त्रांत प्रसिद्ध आहे, तरीपण त्याचें आश्रयस्थान लिंग असल्यामुळें भक्तलोकांची पूजा घेण्याकरितां तो तेथें ज्यास्त रहातो.

अवतरणिका—अस्मिन्नर्थे "या ते रुद्रेति" श्रुत्यर्थमेव श्लोकमुखेनोपन्यस्यति—

श्लोकः—नित्यं भासि तदीयस्त्वं या ते रुद्र शिवा तनूः ॥
अघोरा पापकाशीति श्रुतिराह सनातनी ॥ ५ ॥

व्याख्यानं—भो रुद्र ते तव या तनूः शिवलिंगमूर्तिः, शिवा मंगला अघोरा, अभयंकरा, अपापकाशी दोषरहिता, त्वं तदीयः लिंगसंबंधी सन्, नित्यं भासीति सनातनी नित्या, श्रुतिराह कथयतीत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ शंकरा तूं लिंगांत राहतोस, तुझें स्वरूप नेहमीं प्रकाशमान आहे तुझें शरीर कल्याणकारक आहे, शांत आहे, पातकाचा नाश करणारें आहे असें प्राचीनकाळापासून असणारा वेद सांगतो.

अवतरणिका-तस्मादिष्टलिंगमेव पूजयेदित्याह—

श्लोकः-तस्मात्सर्वप्रयत्नेन सर्वस्थानपराङ्मुखः ॥
स्वेष्टलिंगे महादेवं पूजयेत्पूजकोत्तमः ॥ ६ ॥

व्याख्यानं—तस्मात् श्रुतिप्रसिद्धत्वात् पूजकोत्तमो महेश्वरः, सर्वप्रयत्नेन सर्वस्थानविमुखः सन्, स्वेष्टलिंगे स्वसंबंधवतीष्टलिंगे, महादेवं पूजयेदित्यर्थः ॥६॥

अर्थ-॥ ६ ॥ ह्यासाठीं पूजा करणारा भक्तश्रेष्ठ (वीरशैव) हरप्रयत्नानें सर्व स्थानांकडे (लिंगाखेरीज इतर कोणत्याही देवाकडे) न पाहतां आपल्या इष्टलिंगांतच शिवाची पूजा करितो.

अवतरणिका-एवं बुध्वा स्वेष्टलिंगे यजन्नेव सर्वगत्वनिरासक इत्याह—

श्लोकः-शिवस्य सर्वगत्वेऽपि सर्वत्र रतिवर्जितः ॥
स्वेष्टलिंगे यजन् देवं सर्वगत्वनिरासकः ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

"इति सर्वगत्वनिरसनस्थलं"

अर्थ-॥ ७ ॥ शिव सर्वत्र व्यापलेला आहे तरी शिवाची इष्टलिंगांतच पूजा करणारा वीरशैव शिव सर्वत्र भरलेला आहे असें मनांत न आणतां त्याच्या सर्वत्र व्यापकत्वाकडे न पाहतां इष्टलिंगाचीच पूजा करितो, त्याला सर्वगत्वनिरासक असें ह्मणतात.

"अथ शिवजगन्मयस्थलं"

अवतरणिका-अथ महेश्वरस्य पूजार्थं सर्वगत्वे निराकृतेऽपि प्रमाणबलात् सर्वगत्वं यथांगीक्रियते तथा प्रमाणबलात्सर्वमयत्वं चांगीकरणीयमिति शिवजगन्मयस्थलं निरूपयति—

श्लोकः—पूजाविधौ नियम्यत्वाल्लिंगमात्रे स्थितं शिवम् ॥
पूजयन्नपि देवस्य सर्वगत्वं विभावयेत् ॥ १ ॥

व्याख्यानं—शिवस्य सर्वनियामकत्वेऽपि पूजाकाले भक्तनियाम्यत्वात् भक्ताधीनत्वात् लिंगमात्रे स्थितं शिवं भक्तः पूजयन्नपि, देवस्य लिंगस्थितस्य प्रकाशात्मनः शिवस्य सर्वगत्वं विभावयेत् अन्यथा कुंभकारवत्परिच्छिन्नत्वप्रसंगादित्येवं सर्वगत्वे सिद्धे शिवस्य, "आत्मन आकाशः संभूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी" इति श्रुतेः अभिन्ननिमित्तोपादानकारणत्वश्रवणाद्बहुदृष्टांतपूर्वकं शिवजगन्मयत्वं प्रतिपादयति ॥ १ ॥

अर्थ—॥ १ ॥ ईश्वर सर्व नियामक असला तरी पूजा करावयाच्या वेळीं शंकर भक्ताधीन असल्यामुळें इष्टलिंगांतच शिवमूर्ति आहे असें समजून वीरशैव लिंगपूजा करितो तरी शंकर सर्व ठिकाणीं व्यापलेला आहे असें मानतो.

श्लोकः—यस्मादेतत्समुत्पन्नं महादेवाच्चराचरम् ॥
तस्मादेतन्न भिद्येत यथा कुंभादिकं मृदः ॥ २ ॥

व्याख्यानं—यस्मान्महादेवादिति संबंधः ॥ शिष्टं स्पष्टं ॥ २ ॥

अर्थ—॥ २ ॥ ज्या प्रमाणें कुंभारानें तयार केलेली मातीची घागर मातीहून वेगळी नाहीं त्याप्रमाणेंच शंकरापासून सर्व स्थावर जंगम विश्व उत्पन्न झालें असल्यामुळें शंकरांत आणि विश्वांत कांहीं एक निराळेपणा नाही.

श्लोकः—शिवतत्वात्समुत्पन्नं जगदस्मान्न भिद्यते ॥
फेनोर्मिबुद्बुदाकारं यथा सिंधोर्न भिद्यते ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ—॥ ३ ॥ ज्याप्रमाणें समुद्राच्या पाण्यांत फेंस येतो, लाटा उसळतात, बुडबुडे येतात तरी फेंस, लाटा व बुडबुडे हे समुद्राच्या पाण्याहून वेगळे नव्हेत त्याचप्रमाणें शिवतत्वापासून उत्पन्न झालेलें हें त्रैलोक्य शिवाहून वेगळें नाहीं.

श्लोकः—यथा तंतुभिरुत्पन्नः पटस्तंतुमयः स्मृतः ॥
तथा शिवात्समुत्पन्नं शिव एव चराचरम् ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ—॥ ४ ॥ ज्याप्रमाणें अनेक दोरे एकेजागीं ओंवून तयार केलेलें वस्त्र दोऱ्याहून वेगळें नाहीं त्याप्रमाणें शिवापासून उत्पन्न झालेलें हें स्थावर जंगम विश्व शिवाहून वेगळें नाहीं.

अवतरणिका–ननु मृदादीनां विकारित्वात् शिवस्य निर्विकारित्वात् उक्तदृष्टांतो विषम इत्याह—

श्लोकः–आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः ॥
कुटीभावाद्यथा भाति पटः स्वस्य प्रसारणात् ॥ ५ ॥

व्याख्यानं—पटः स्वतादात्म्यापन्नप्रसरणशक्त्या कुटीभावात् प्रस्थानकुटीभावात् यथा भाति, तथा शिवोऽपि स्वात्मशक्तिविकासेन विश्वात्मना स्थितः सन् भातीत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ आपल्या शक्तीच्या ज्यास्तपणामुळें ·शंकर हा त्रैलोक्याच्या रूपानें राहिला आहे· जसें वस्त्राचा तंतु गुंडाळून ठेवला तर अगदीं लहान दिसतो आणि पसरला ह्मणजे लांबवर पसरतो, त्याचप्रमाणें शंकर आपल्या सामर्थ्यातिशयामुळें लिंगांत संक्षिप्तरूप होऊन राहतो आणि सर्व जगांत प्रसार पावण्याचें रूप घेऊन राहतो.

अवतरणिका–ननु प्रसारणशक्तिद्वारा यथा पटस्यापि विकारभाक्त्वं तथा शिवस्यापि स्वसमवेतशक्तिद्वारा विकारिता स्यादित्यत्र दृष्टांतान्तरमुपन्यसन्नुक्तार्थमुपसंहरति—

श्लोकः–तस्माच्छिवमयं सर्वं जगदेतच्चराचरम् ॥
तदभिन्नतया भाति सर्पत्वमिव रज्जुतः ॥ ६ ॥

व्याख्यानं—रज्जुः स्वनिष्ठदीर्घवृत्तगोधूमवर्णताशक्तिवशात् विकाररराहित्येन यथा सर्पत्वेन भाति, तथा शिवोऽपि विकारराहित्येन स्वसमवेतमायाशक्त्या विश्वाभिन्नतया भाति, तस्मात्सर्वमेतच्चराचरं विश्वं शिवमयं न तद्व्यतिरिक्तमित्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ ह्यावरून वास्तविक पाहूं लागलें तर हें सर्व स्थावर जंगम विश्व शिवस्वरूप आहे, तेंच एकरूपामुळें (तें एकच आहे तरी) दोरी पाहून जसा साप असल्याचा खोटा संशय येतो तसेंच शंकर वास्तविक एक रूपच आहे तरी जग निराळें आणि ईश्वर निराळा असें भासतो.

अवतरणिका–अथ दार्ढ्यार्थमुदाहृतदृष्टांतपूर्वकं बहुदृष्टांतमाह—

श्लोकः–रज्जौसर्पत्ववद्भाति शुक्तौ च रजतत्ववत् ॥
चोरत्ववदपि स्थाणौ मरीच्यां च जलत्ववत् ॥ ७ ॥

गंधर्वपुरवद्व्योम्नि सच्चिदानंदलक्षणे ॥
निरस्तभेदसद्भावे शिवे विश्वं विराजते ॥ ८ ॥

व्याख्यानं—रज्ज्वां गोधूमवर्णताशक्त्या सर्पत्ववत्, शुक्तौ धावल्यशक्त्या रजतत्ववत्, स्थाणौ दीर्घताशक्त्या पुरुषत्ववत्, मरीच्यां स्वच्छतोद्रेकशक्त्या जलत्ववत्, कालशक्त्या व्योम्नि गंधर्वनगरवत्, निरस्तसमस्तप्रापंचिकभेदवति निर्विकारे सच्चिदानंदस्वरूपे परशिवब्रह्मणि, तत्समवेतविमर्शशक्तिप्रतिस्फुरणायमानमायाशक्त्या विश्वं तदभिन्नतया भातीत्यर्थः ॥ ७ ॥ ८ ॥

अर्थ–॥ ७ ॥ दोरी पाहून जसा सापाचा संशय येतो, शिंप पाहून जसा रुप्याचा संशय येतो, एखादें उंचवठलेलें झाड पाहून जसा चोर उभा राहिला असें वाटतें, उन्हाच्या झळयांत जसा पाण्याचा लोट वाहतो असा संशय येतो.

अर्थ–॥ ८ ॥ आकाशास पाहून जसें एखादें गंधर्वनगर असावें असा संशय येतो तसाच प्रपंचांतील सर्व प्रकारचे भेद ज्याचे नाहींसे झाले आहेत अशा सच्चिदानंदस्वरूप शिवामध्यें त्रैलोक्य असल्याचा खोटा भास होतो. वास्तविक पाहतां शिवच काय तो एकटा अविनाशी आहे, जग नश्वर असून सर्व खोटें आहे.

अवतरणिका–नन्वेभिर्दृष्टांतैर्विश्वं प्रातीतिकं स्यादित्यत्र दृष्टांतान्तरमाह—

श्लोकः–पत्रशाखादिरूपेण यथा तिष्ठति पादपः ॥
तथा भूम्यादिरूपेण शिव एको विराजते ॥ ९ ॥

व्याख्यानं—वृक्षो यथा कालशक्त्या विकाररहितत्वेन स्वांतर्लीनस्वविजातीयपत्रपुष्पादिभेदविशिष्टत्वेन भाति, तथा शिव एव स्वसमवेतशक्तितादात्म्यक्रोडीकृतभूम्यादिरूपेण प्रतिस्फुरणगत्या भातीत्यर्थः, तत्र धृत्या धरणिः करुणया जलं, उज्ज्वलतया तेजः, परमानंदस्पंदनेन वायुः, चिद्व्याप्त्या व्योम, चिति संकोचचित्तविशिष्टो जीव इति विवेकः, ननु वृक्षस्य सावयवत्वात्, तदाभाससंयुक्तशिवस्य निरवयवत्वात् तत्समवेतशक्तेरपि तदभिन्नत्वेन तथात्वात् कथं सावयवप्रपंचरूपेण भासनं संभवतीति नाशंकनीयम्, शक्तेः शिवाभिन्नत्वे सति दुर्घटकारित्वेन "अहिकुंडलन्यायेन" स्वस्वातंत्र्यपरिकल्पितभेदोपस्थितिपरमाणुकार्यभूतद्व्यणुकादाविव तत्कार्यरूपमायाशक्तेस्सांशत्वे संभवतीत्युक्तत्वात्, "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति भगवदुक्तेश्च प्रातीतिकप्रपंचरूपेणापि स्वशक्तिन्यूनीभावेन शिव एव भासते, शुक्तिरजतयोः परस्परसत्वात् मेलकांशो नास्तीति वदता निषेधप्रतियोगित्वेन समानयोगेन च सोऽप्यंगीकरणीय एव, उत्तरक्षणबाध्यमानत्वात् शक्तिन्यूनीभावनिबंधनेति सर्वं विश्वं शिवमयमेवेति

संक्षेपः, वस्तुतस्तु बाध एव नास्ति घटपटयोरिव शुक्तिरजतयोरपि वस्तुत्वात् नापि शुक्तिज्ञानेन रजतज्ञानस्य बाधः घटपटज्ञानयोरिव भिन्नकालभिन्नविषयत्वात्, नन्वेकस्मिन्नेव धर्मणि इदं रजतं नेदं रजतमिति विरुद्धावभासद्वयस्य प्रामाण्यासंभवात्, अथोत्तरकालिकरजताभावज्ञानेन पूर्वोत्पन्नरजतज्ञानस्य बाधोंऽगीक्रियत इति चेन्न, ज्ञानानां त्रिक्षणावस्थायित्वनियमेन रजताभावज्ञानस्थितिकाले रजतज्ञानस्याभावात् किंच बाध्यबाधकभावस्य "दंडभांडन्यायेन" परस्परान्वयसापेक्षत्वेन ज्ञानानां गुणत्वेन परस्परसंबंधाभावात् तस्माद्घटपटज्ञानयोरिवोन्मेषनिमेषयोरंगीकरणीयत्वेन बाधस्य वाभावादिति दिक् ॥ ९ ॥

इति शिवजगन्मयस्थलम् ।

अर्थ–॥ ९ ॥ पानें फांद्या डाहळ्या ह्या रूपानें एखादें झाड जसें शोभावें त्याचप्रमाणें शंकर एकच आहे तरी पृथ्वी आप्, तेज, वायु, आकाश वगैरे रूपानें शोभतो.

अथ भक्तदेहिकलिंगस्थलम् ।

अवतरणिका–अथैवं शिवस्य जगन्मयत्वेऽपि वेदवेदांतवाक्यार्थसंधानातीतवर्तनः "भक्तभावपरानंदो भक्तभावैकगोचरः" इति योगजागमवचनानुसारेण भक्तहृदये प्रकाशयतीति भक्तदेहिकलिंगस्थलं सप्तभिः सूत्रैः प्रतिपादयति—

श्लोकः–समस्तजगदात्माऽपि शंकरः परमेश्वरः ॥
भक्तानां हृदयांभोजे विशेषेण विराजते ॥ १ ॥

व्याख्यानं—शंकरः सुखंकरः परमेश्वरः परशिवः, समस्तजगदात्माऽपि भावाभावरूपप्रपंचमयोऽपि भक्तानां स्वभक्तानां हृदयांभोजे हृदयकमले विशेषेण विराजते आधिक्येन प्रकाशत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ शंकर हा सर्वांचा अन्तर्यामी राहणारा परमेश्वर आहे तरी आपल्या भक्तांच्या हृदयकमलांत तो विशेषरीतीनें शोभतो.

अवतरणिका–तत्कथमित्यत्राह—

श्लोकः–कैलासे मंदरे चैव हिमाद्रौ कनकाचले ॥
हृदयेषु च भक्तानां विशेषेण व्यवस्थितः ॥ २ ॥

व्याख्यानं—एषु स्थानेषु यथा शिवो विशेषेण भासते, तथा स्वभक्तानां हृदये भासत इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ वास्तविक पाहतां शंकराची मुख्य राहण्याचीं स्थानें ह्मटलीं तर

कैलासपर्वत, मंदरपर्वत, हिमालयपर्वत, मेरुपर्वत आणि शिवभक्तांचीं हृदयें हीं होत, त्या ठिकाणीं इतर ठिकाणापेक्षां तो ज्यास्त राहतो.

अवतरणिका–नन्वपरिच्छिन्नः परमेश्वरः कथं परिच्छिन्नः सन् भक्तहृदयेषु राजत इत्यत्राह—

श्लोकः–सर्वात्माऽपि परिच्छिन्नो यथा देहेषु वर्तते ॥
तथा स्वकीयभक्तेषु शंकरो भासते सदा ॥ ३ ॥

व्याख्यानं—सर्वात्माऽपि परमेश्वरः, देवतिर्यङ्मनुष्यलक्षणसकलदेहेषु भिन्नांतःकरणविशिष्टेषु प्रतिबिंबगत्या यथा भासते तथा स्वकीयभक्तेषु सदा प्रकाशत इत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ शंकर हा परिपूर्ण असून सर्व जगाच्या अंतर्यामी राहतो तरी व परिछिन्न (तुकडे तुकडे) झाल्याप्रमाणें प्रत्येक प्राणिमात्रांच्या हृदयांत जसा राहतो तसाच नेहमीं आपल्या भक्तलोकांच्या मनांत राहून शोभतो.

अवतरणिका–अस्मिन्नर्थे प्रमाणगर्भितवचनमाह—

श्लोकः–नित्यं भाति त्वदीयेषु या ते रुद्र शिवा तनूः ॥
अघोरा पापकाशीति श्रुतिराह सनातनी ॥ ४ ॥

व्याख्यानं—भो रुद्र ते तव या तनूः शिवलिंगमूर्तिः, अघोरा सौम्या, अपापकाशी दोषरहिता, सा लिंगमूर्तिः त्वदीयेषु त्वत्संबंधिषु भक्तेषु नित्यं भाति इति सनातनी नित्या श्रुतिराहेत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ हे शंकरा, तुझें कल्याणकारक शांत आणि पातकांचा नाश करणारें स्वरूप (शरीर) तुझ्या भक्तांच्या मनांत नेहमीं राहतें असें अनादिकालापासून असणारा वेद सांगतो.

अवतरणिका–ननु शिवभक्तव्यतिरिक्तेषु न भासते किमित्यत्राह—

श्लोकः–विशुद्धेषु विरक्तेषु विवेकिषु महात्मसु ॥
शिवस्तिष्ठति सर्वात्मा शिवलांछनधारिषु ॥ ५ ॥

व्याख्यानं—विशुद्धेषु विरक्तेषु षट्स्थलज्ञानिषु चरमूर्तिष्वित्यर्थः, विवेकिषु महात्मसु शुकादियोगिष्वित्यर्थः शिवलांच्छनधारिषु भूतिरुद्राक्षमात्रधारिषु चेत्यर्थः, सर्वात्मा शिवः, नित्यं तिष्ठति प्रकाशत इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ जे लोक निष्पाप (शुद्ध आचरणानें वागणारे आहेत) वैराग्य पावलेले आहेत, विचारशील आहेत, मोठ्या मनाचे आहेत, शिवलांछन (भस्म

रुद्राक्ष) वगैरे धारण करणारे आहेत त्यांच्या मनांत सर्वांच्या अंतर्यामी राहणारा शिव ज्यास्त राहतो.

अवतरणिका–नन्वेवं चेत् साधारणत्वात् शिवभक्तेषु को विशेष इत्यत्राह—

श्लोकः–नित्यं संतोषयुक्तानां ज्ञाननिर्धूतकर्मणाम् ॥
माहेश्वराणामंतस्थो विभाति परमेश्वरः ॥ ६ ॥

व्याख्यानं—शिवज्ञानेन निर्धूतकल्मषवत्त्वात् शिवसुखानुभाविनां परमेश्वराणां, निर्मलदर्पणे मुखादेः स्फुटतया भासनमिवातिस्फुटतया तेषामंतस्थः सन् भातीत्यर्थः ॥ ६ ॥

अर्थ– ॥ ६ ॥ जे लोक नेहमीं आनंदांत निमग्न झालेले असतात, शिवज्ञानामुळें ज्यांचा कर्मांचा नाश झाला आहे अशा माहेश्वरांच्या (जंगमांच्या) चित्तामध्यें शंकर शोभतो.

अवतरणिका–अथ वक्ष्यमाणप्रसादिस्थलं सूचयति—

(वृ०)–अन्यत्र शंभोरतिमात्रशून्यनिजेष्टलिंगे वियतांतरात्मा ॥
शिवात्मकं विश्वमिदं विबुध्यन्माहेश्वरोऽसौ भवति प्रसादी॥७॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते सिद्धान्तशिखामणौ माहेश्वरस्य नवविधस्थलप्रसंगो नाम दशमपरिच्छेदः समाप्तः ॥

शंभोः शिवात् अन्यत्र देवतांतरे रतिमात्रशून्यः प्रीतिलेशेनापि रहितः सन् निजेष्टलिंगे वियतांतरात्मा नियमितांतःकरणवानसौ माहेश्वरः इदं विश्वं इदमित्यंगुलिनिर्देश्यत्वेन भासमानं विश्वं शिवात्मकमुक्तदृष्टांतैः शिवमयमिति बुध्यन्सन् प्रसादी भवतीत्यर्थः "शिव एको ध्येयः शिवंकरः, सर्वमन्यत्परित्यज्य" इत्यत्र श्रुतिः॥७॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां माहेश्वरस्य नवविधस्थलप्रसंगो नाम दशमपरिच्छेदः समाप्तः ॥

अर्थ–॥ ७ ॥ जो माहेश्वर (जंगम) शिवाखेरीज इतर देवांची मुळींच भक्ति करीत नाहीं, आपल्या लिंगाची पूजा मात्र एकाग्रमनानें करितो, सर्व त्रैलोक्य शिवस्वरूप असें मानतो त्या माहेश्वरास (जंगमास) प्रसादी असें ह्मणवें.

ह्याप्रमाणें श्रीवीरशैवधर्माचा निर्णय असलेल्या सिद्धान्तशिखामणि ग्रंथांतील माहेश्वराच्या (जंगमाच्या) नऊ प्रकाराच्या स्थलाचें (अधिकाराचें) वर्णन असलेला हा दहावा भाग संपला.

अथ एकादशपरिच्छेदः प्रारभ्यते

अथ प्रसादिस्थलं

॥ अगस्त्य उवाच ॥

श्लोकः–उक्तो माहेश्वरः साक्षाल्लिंगनिष्ठादिधर्मवान् ॥
कथमेष प्रसादीति कथ्यते गणनायक ॥ १ ॥

व्याख्यानं—स्पष्टं ॥ १ ॥

अर्थ–॥ १ ॥ प्रमथेश्वरा, रेणुकाचार्या इष्टलिंगावर दृढ विश्वास ठेवून सर्व प्रकारचे शिवधर्म पाळणाऱ्यास माहेश्वर (जंगम) ह्मणतात तें समजलें, आतां हा माहेश्वर प्रसादी अधिकारास कसा पोंचतो? आणि प्रसादी कशास ह्मणतात तें सांग.

रेणुक उवाच ॥

श्लोकः–लिंगनिष्ठादिभावेन ध्वस्तपापनिबंधनः ॥
मनःप्रसादयोगेन प्रसादीत्येष कथ्यते ॥ २ ॥

व्याख्यानं—उक्तलिंगनिष्ठादिस्थलपरिज्ञानतदाचरणतः ध्वस्तपापसमूह एष माहेश्वरः मनोनैर्मल्यसंबंधेन प्रसादीत्युच्यत इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ रेवणसिद्ध ह्मणतो—इष्टलिंगावर दृढनिश्चय ठेविला ह्मणजे आपाप त्याच्या पूर्वार्जित सर्व पातकांचा नाश होतो व शिवज्ञानाचा बोध होऊन त्याचें मन प्रसन्न होतें त्या माहेश्वरास प्रसादी ह्मणतात.

अवतरणिका–अथैतत्स्थलं कीदृशं कीदृग्विधमित्यत्राह—

श्लोकः–प्रसादिस्थलमित्येतदस्य माहात्म्यबोधकम् ॥
अंतरस्थलभेदेन सप्तधा परिकीर्तितम् ॥ ३ ॥

व्याख्यानं—एतत्प्रसादिस्थलमस्य भक्तमाहेश्वरस्थलोक्तसदाचारसमूहस्य महत्वबोधकं अवांतरस्थलभेदेन सप्तविधमिति परिकीर्तितमित्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ प्रसादिस्थलाचा अधिकार मोठा आहे, त्यांत कांहीं अंतरस्थलें (पोटभेद) आहेत त्यांवरून प्रसादिस्थल सात प्रकारचें मानलें आहे, ते सात प्रकार पुढें लिहिल्याप्रमाणें आहेत.

अवतरणिका–अथ तत्कथमित्यत्रोद्दिशति—

श्लोकः–प्रसादिस्थलमादौ तु गुरुमाहात्म्यकं ततः ॥
ततो लिंगप्रशंसा च ततो जंगमगौरवम् ॥ ४ ॥

ततो भक्तस्य माहात्म्यं ततः शरणकीर्तनम् ॥
शिवप्रसादमाहात्म्यमिति सप्तप्रकारकम् ॥ ५ ॥

व्याख्यानं—शरणकीर्तनं तन्महत्त्वकीर्तनमित्यर्थः एवं सप्तप्रकारकमित्युत्तरम्, ॥ ४ ॥ ५ ॥

अर्थ-॥ ४ ॥ १ प्रसादिस्थल २ गुरुमाहात्म्यस्थल ३ लिंगप्रशंसास्थल ४ जंगमगौरवस्थल. ॥ ५ ॥ ५ भक्तमहात्म्यस्थल ६ शरणकीर्तनस्थल ७ शिवप्रसादमाहात्म्यस्थल असे प्रसादिस्थलाचे सात भेद आहेत.

अवतरणिका-अथोद्दिष्टानां स्थलानां क्रमाल्लक्षणमुच्यत इत्यत्राह—

श्लोकः-क्रमाल्लक्षणमेतेषां कथयामि महामुने ॥

व्याख्यानं—स्पष्टं ॥

अर्थ-॥ अगस्त्यऋषे मी आतां तुला क्रमाक्रमानें प्रत्येक स्थलाचें लक्षण सांगतों.

अवतरणिका-अथ "चित्तस्य हि प्रसादेन हंति कर्म शुभाशुभम् ॥ प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमक्षयमश्नुत" इति मैत्रेयश्रुत्यनुसारेण शिवप्रसादजायमानमनःप्रसन्नतां द्वादशसूत्रैः प्रतिपादयति—

श्लोकः-नैर्मल्यं मनसो लिंगं प्रसाद इति कथ्यते ॥
शिवस्य लिंगरूपस्य प्रसादादेव सिद्ध्यति ॥ ६ ॥

व्याख्यानं—मनसः चित्तस्य नैर्मल्यं लिंगं निर्मलत्वचिह्नं प्रसाद इति कथ्यत इत्यर्थः। एष मनोनिर्मलत्वरूपप्रसादः लिंगरूपस्य शिवस्य प्रसादात्सिद्ध्यतीत्यर्थः॥६॥

अर्थ-॥ ६ ॥ मन प्रसन्न होणें (निर्मल होणें) (आनंदित असणें) हें प्रसादिस्थलाचें मुख्य लक्षण आहे. हा निर्मलत्वरूपप्रसाद शंकराच्या कृपेनें प्राप्त होतो.

अवतरणिका-ननु कोऽयं चित्तनैर्मल्यलक्षणप्रसादकारणीभूतशिवप्रसाद इत्यत्राह—

श्लोकः-शिवप्रसादं यद्द्रव्यं शिवाय विनिवेदितम् ॥
निर्माल्यं तत्तु शैवानां मनोनैर्मल्यकारणम् ॥ ७ ॥

व्याख्यानं—शिवाय विनिवेदितम् समर्पितं यत् द्रव्यं तत् शिवप्रसादः, तन्निर्माल्यं तु विशेषशैवानां वीरशैवानां मनोनैर्मल्यकारणं भवतीत्यर्थः ॥ ७ ॥

अर्थ—॥ ७ ॥ शिवाला जें द्रव्य समर्पण केलें त्यास शिवप्रसाद ह्मणतात तें निर्माल्य वीरशैवलोकांस मन निर्दोष होण्यास कारण आहे. (शिवनिर्माल्यानें मन निष्पाप होतें.)

अवतरणिका—अथैवंरूपशिवप्रसादस्वीकारवान् प्रसादीत्याह

श्लोकः—मनःप्रसादसिद्ध्यर्थं निर्मलज्ञानकारणम् ॥
शिवप्रसादं स्वीकुर्वन् प्रसादीत्येष कथ्यते ॥ ८ ॥

व्याख्यानं—ज्ञानकारणं शिवज्ञानकारणं शिवप्रसादं निर्माल्यं शिवलिंगप्रसादरूपशिवनिर्माल्यं मनःप्रसादसिद्ध्यर्थं चित्तनैर्मल्यसिद्ध्यर्थं स्वीकुर्वन् एष वीरमाहेश्वरः प्रसादीति कथ्यत इत्यर्थः ॥ ८ ॥

अर्थ—॥ ८ ॥ मन प्रसन्न होण्यासाठीं निर्मल शिवज्ञानाची प्राप्ति करून देणाऱ्या शिवप्रसादाचा जो स्वीकार करितो त्यास (वीरमाहेश्वरास) प्रसादी ह्मणावें.

अवतरणिका—तस्मात् "आहारशुद्ध्या तत्वशुद्धिः" इति छांदोग्यश्रुतेः शुद्धशिवनिर्माल्यभक्षणेन सकलतत्वशुद्धिद्वारा मनोनैर्मल्यं लभते भक्त इत्याह—

श्लोकः—अन्नशुद्ध्या हि सर्वेषां तत्वशुद्धिरुदाहृता ॥
विशुद्धमन्नजातं हि यच्छिवाय समर्पितम् ॥ ९ ॥
तदेवं सर्वकालं तु भुंजानो लिंगतत्परः ॥
मनःप्रसादमतुलं लभते ज्ञानकारणम् ॥ १० ॥

व्याख्यानं—अन्नशुद्ध्या सर्वेषां प्राणिनां तत्वशुद्धिः देहाक्षभुवनप्रपंचशुद्धिरिति शास्त्रज्ञैरुदाहृता यच्छिवाय समर्पितमन्नजातं शुद्धं तदन्नजातमेव लिंगतत्परः सन् सदाकालं भुंजानः प्रसादी अतुलं शिवज्ञानकारणं मनःप्रसादं मनोनैर्मल्यं लभत इत्यर्थः ॥ ९ ॥ १० ॥

अर्थ—॥ ९ ॥ शुद्ध अन्न भक्षण केलें ह्मणजे चांगली तत्वशुद्धि होते (शरीर व इंद्रियें यांस बळकटी येते) शिवास ज्या अन्नाचा नैवेद्य दाखविला तें अन्न तर निर्दोष असल्यामुळें चांगली बुद्धि होऊन मन शुद्ध होणें साहजिकच आहे. ह्मणून नेहमीं वीरमाहेश्वर शिवप्रसादच भक्षण करितो. ॥ १० ॥ तेंच शिवनिर्माल्य नेहमीं भक्षण करणाऱ्या व लिंगपूजा एकनिष्ठपणानें करणाऱ्या प्रसादीला ज्ञान होण्यासारखा अलौकिक मनः प्रसाद (आनंदीपणा) प्राप्त होतो.

अवतरणिका–तस्मादात्मभोगार्थं नियमितं सत् यद्यद्द्रव्यं प्राप्तं भवति तत्सर्वं "यद्यदात्महितं वस्तु शिवार्पितं इति" शिवरहस्यवचनानुसारेण शिवाय समर्प्य भुंजीयादित्याह—

श्लोकः–आत्मभोगाय नियतं यद्यद्द्रव्यं समाहितम् ॥
तत्तत्समर्प्य देवाय भुंजीतात्मविशुद्धये ॥ ११ ॥

व्याख्यानं—आत्मभोगाय नियमितं सत् समाहितं संपादितं तत्तत् शिवलिंगदेवाय समर्प्यात्मविशुद्धये चित्तशुद्ध्यर्थं भुंजीयादित्यर्थः ॥ ११ ॥

अर्थ–॥ ११ ॥ आपल्या स्वतः उपयोगाकरितां जें जें द्रव्य संपादन केलें असेल तें तें अगोदर शंकरास अर्पण करून मग आपण त्याचा उपभोग घ्यावा ह्मणजे मन निष्पाप होतें.

अवतरणिका–अथास्य महत्वं प्रतिपादयति—

श्लोकः–नित्यसिद्धेन देवेन भिषजा जन्मरोगिणाम् ॥
यद्यत्प्रसादितं भुक्त्वा तत्तज्जन्मरसायनम् ॥ १२ ॥

व्याख्यानं—जन्मरोगिणां भवरोगिणां भिषजा वैद्येन नित्यसिद्धेन शिवलिंगे निरंतरसिद्धेन देवेन परमेश्वरेण यत् द्रव्यं भुक्त्वा प्रसादितं प्रसादीकृतं, तत्तत् जन्मरसायनं संसारव्याधिरसायनमित्यर्थः ॥ १२ ॥

अर्थ–॥ १२ ॥ शंकर हा नित्यसिद्ध (जन्ममरण नसणारा) असा आहे, जन्म, मरणरूपी ज्यांना रोग झाला आहे त्यांचा तो रोग औषध देऊन (ज्ञान शिकवून) बरा करणारा उत्तम वैद्य आहे, त्याला ज्या ज्या अन्नाचा नैवेद्य दाखविला (त्यानें जें जं अन्न प्रसाद ह्मणून दिलें) तें तें लिंगपूजकानें भक्षण करणें ह्मणजे जन्ममरणरूप रोग दूर होण्यासाठीं रसायन खाण्यासारखें आहे.

अवतरणिका–अथ ऐहिकारोग्यादिकारणं चेत्याह—

श्लोकः–आरोग्यकारणं पुंसामंतःकरणशुद्धिदम् ॥
तापत्रयमहारोगसमुद्धरणभेषजम् ॥ १३ ॥
विद्यावैशद्यकरणं विनिपातविघातनम् ॥
द्वारं ज्ञानावतारस्य मोहोच्छेदस्य कारणम् ॥ १४ ॥
वैराग्यसंपदो मूलं महानंदप्रवर्धनम् ॥
दुर्लभं पापचित्तानां सुलभं शुद्धकर्मणाम् ॥ १५ ॥

आदृतं ब्रह्मविष्ण्वाद्यैर्वसिष्ठाद्यैश्च तापसैः ॥
शिवस्वीकृतमन्नाद्यं स्वीकार्यं सिद्धिकांक्षिभिः ॥ १६ ॥

व्याख्यानं—अत्र पुनस्तदित्यनुवर्तते तत्प्रसादद्रव्यं पुंसामारोग्यकारणं सत् अंतःकरणशुद्धिदम् आध्यात्मिकादितापत्रयलक्षणमहारोगोन्मूलनौषधम् विद्याविशेषसिद्धिकारणं विनिपातः कृत्रिमदोषः तस्य घातकं शिवज्ञानावतारस्य द्वारं, अज्ञानोच्छेदकारणम्, वैराग्यसंपदो मूलकारणं, नित्यानंदप्रकाशकं, पापिष्ठानां दुर्लभं, पुण्यात्मनां सुलभं, ब्रह्मादिदेवैर्वसिष्ठादिमुनिभिः प्रीतिविषयीकृतं, एवंरूपं शिवस्वीकृतमन्नाद्यं शिवलिंगस्वीकृतान्नादिप्रसादद्रव्यं सिद्धिकांक्षिभिः इहपरत्र भोगमोक्षलक्षणसिद्धिकांक्षिभिः प्रसादिभिः स्वीकार्यमित्यर्थः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

अर्थ—॥ १३ ॥ त्या प्रसादान्नाचें भक्षण केलें असतां भक्षण करणारांचें आरोग्य जास्त वाढतें, मन शुद्ध होतें आणि आध्यात्मिक आधिभौतिक व आधिदैविक हे तीन प्रकारचे ताप औषध घेतल्यानें जसे रोग बरे होतात तसेच प्रसादान्नामुळें हे ताप नाहींसे होतात. ॥ १४ ॥ शिवप्रसादान्नामुळें विद्येची शुद्धि होऊन वृद्धि होते, संकटांचें निरसन होतें. ज्ञानमार्ग खुला होतो. आणि अज्ञानाचा समूळ नाश होतो. ॥ १५ ॥ शिवप्रसादान्न वैराग्यरूपसंपत्ति वाढविण्यास मूल कारण आहे, अतिशय ब्रह्मानंद प्राप्त करून देणारें आहे, पातकी मनुष्यांना तो शिवप्रसाद मिळणें फार दुर्मिळ असून निर्दोष वर्तन असलेल्या पुण्यवान् मनुष्यांस तो सहज मिळतो. ॥ १६ ॥ ब्रह्मदेव विष्णु वगैरे देवांनीं शिवप्रसादाचा स्वीकार केला, तसेंच वसिष्ठ वगैरे मोठमोठ्या ऋषीश्वरांनीं देखील शिवप्रसादान्नाचा स्वीकार केला, ह्यासाठीं मोक्षप्राप्तीची इच्छा करणाऱ्या मनुष्यांनीं शिवनिर्माल्य (शिवास दाखविलेला नैवेद्य वगैरे अवश्य भक्षण करावा.

अवतरणिका–अथैतत्प्रसादस्वीकारेण सर्वपापक्षयश्च भवतीत्याह—

श्लोकः–पत्रं पुष्पं फलं तोयं यच्छिवाय निवेदितम् ॥
तत्तत्स्वीकारयोगेन सर्वपापक्षयो भवेत् ॥ १७ ॥

व्याख्यानं—यत् यत् द्रव्यमित्यर्थः शिष्टं स्पष्टं ॥ १७ ॥

अर्थ–॥ १७ ॥ पान, फूल, फळ, पाणी वगैरे कांहींही असो, शिवाला ह्मणून जें अर्पण केलें त्याचा त्याचा स्वीकार केल्यामुळें सर्वपातकांचा नाश होतो.

अवतरणिका–अथ शिवलिंगप्रसादवदेव श्रीगुरुशिवयोगिनोरपि प्रसादः स्वीकार्य इत्युक्त्वा प्रसादिस्थलं समापयति–

श्लोकः–यथा शिवप्रसादान्नं स्वीकार्यं लिंगतत्परैः ॥
तथा गुरोः प्रसादान्नं तथैव शिवयोगिनाम् ॥ १८ ॥

व्याख्यानं—लिंगनिष्ठैः प्रसादिभिर्यथा प्रसादान्नं स्वीकार्यं तथा श्रीगुरुशिवयोगिनां चान्नप्रसादोऽपि स्वीकार्यं इत्यर्थः ॥ १८ ॥

"इति प्रसादिस्थलम्"

अर्थ–॥ १८ ॥ लिंगपूजन करणाऱ्या प्रसादीनें जसें शिवप्रसादान्नाचें भक्षण करावें तसेंच गुरुप्रसादान्न व शिवयोग्याचें (जंगमाचें) प्रसादान्न भक्षण करावें.

"अथ गुरुमाहात्म्यस्थलम्"

अवतरणिका–अथ प्रसादनिष्ठेन ज्ञातव्यं गुरुमाहात्म्यस्थलं निरूपयति—

श्लोकः–गुरुरेवात्र सर्वेषां कारणं सिद्धिकर्मणाम् ॥
गुरुरूपो महादेवो यतः साक्षादुपस्थितः ॥ १ ॥

व्याख्यानं—अत्र लोके भोगमोक्षलक्षणसकलसिद्धिकर्मणां गुरुरेव कारणं "न गुरोरधिकं न गुरोरधिकं" इति शिवरहस्यवचनात् यतः परमेश्वर एव साक्षाद्गुरुरूपः सन् उपस्थितः तिष्ठतीत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ भोग मोक्ष वगैरे सर्वप्रकारच्या सिद्धि प्राप्त करून देण्यास ह्या लोकीं गुरु कारण आहे (गुरूच्या कृपेनें ह्या लोकीं सर्वप्रकारच्या सिद्धि प्राप्त होतात) कां तर, गुरु हा प्रत्यक्ष शंकरच असून तो गुरूचें रूप घेऊन आलेला आहे.

अवतरणिका–ननु निष्कलः शिवः किमर्थं सकलगुरुरूपेण प्रकाशत इत्यत्राह—

श्लोकः–निष्कलो हि महादेवो नित्यज्ञानमहोदधिः ॥
सकलो गुरुरूपेण सर्वानुग्राहको भवेत् ॥ २ ॥

व्याख्यानं—नित्यज्ञानार्णवपरमेश्वरः निष्कलोऽपि निरवयवोऽपि गुरुरूपेण सकलः सन् करचरणादिविशिष्टः सन् सर्वानुग्राहको भवेत् लोकानुग्रहार्थं भातीत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ महादेव हा निष्प्रपंच आहे, शाश्वत (चिरकाल) टिकणाऱ्या

ज्ञानाचा तो महासमुद्र आहे, तो सर्वान्तर्यामी असून सर्वांवर कृपा करणारा आहे, तो गुरूच्या रूपानें अवतरला आहे असें समजावें.

अवतरणिका–तस्माद्गुरुशिवयोर्भेदो नास्तीत्याह—

श्लोकः–यश्शिवस्स गुरुर्ज्ञेयो यो गुरुस्स शिवः स्मृतः ॥
न तयोरंतरं कुर्यात् ज्ञानावाप्तौ महामतिः ॥ ३ ॥

व्याख्यानं—गुरोर्मोक्षकारणीभूतज्ञानप्रदत्वेन शिवाभिन्नत्वात् अन्यथा ज्ञाना-नुदयप्रसंगात् तदर्थं सूक्ष्मदृक् तयोरंतरं भेदं न कुर्यादित्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ जो शिव आहे तोच गुरु आहे जो गुरु आहे तोच शिव आहे, जो बुद्धिमान् आणि पूर्णज्ञानी आहे तो गुरूमध्यें आणि शंकरामध्यें नि-राळेपणा आहे असें मुळींच मानीत नाहीं.

अवतरणिका–"यथाहं सर्वलोकानां गुरुरंबिकया सह" इत्या-गमोक्तेः शिवसदृशं श्रीगुरुं प्राकृतैस्सदृशमनुक्त्वा पूजयेदित्याह–

श्लोकः–हस्तपादादिसाम्येन नेतरैस्सदृशं वदेत् ॥
आचार्यं ज्ञानदं शुद्धं शिवरूपतया स्थितम् ॥ ४ ॥

व्याख्यानं—शुद्धं निर्मलांतःकरणम् शिवज्ञानप्रकाशकम् उमामहेश्वर-रूपेण स्थितम् श्रीगुरुं हस्तपादादिसाम्येन प्राकृतैस्सदृशं संतं न वदेत् ॥ ४ ॥

अर्थ–॥ ४ ॥ ह्या गुरूलाही इतर लोकांप्रमाणेंच हात पाय वगैरे आहेत, ह्मणून इतर लोकांत आणि गुरूंत अंतर काय आहे ? असें मुळींच ह्मणूं नये. आचार्य हा निष्पाप शिवज्ञानाची प्राप्ति करून देणारा असून प्रत्यक्ष शंकराच्या रूपानें अवतरलेला आहे.

अवतरणिका–तेन किं भवतीत्यत्राह—

श्लोकः–आचार्यस्यावमानेन श्रेयःप्राप्तिर्विहन्यते ॥
तस्मान्निश्रेयसप्राप्त्यै पूजयेत्तं समाहितः ॥ ५ ॥

व्याख्यानं—आचार्यस्यावमानेन प्राकृतजनसमोक्त्या भोगमोक्षलक्षणश्रेयः-प्राप्तिर्विहन्यते तस्मात् निःश्रेयसप्राप्त्यै भोगमोक्षावाप्त्यै समाहितः एकाग्र-चित्तः सन् तं श्रीगुरुं पूजयेदित्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ आचार्याचा अपमान केला तर आपलें कल्याण व्हावयाचें असलें तरी होत नाहीं, ह्यास्तव भोग व मोक्ष ह्यांची प्राप्ति व्हावी अशी इच्छा असल्यास भक्तानें एकनिष्ठपणानें गुरूची पूजा केली पाहिजे.

अवतरणिका-अथ "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इति श्वेताश्वतरश्रुत्यर्थं प्रकटयन् गुरुमहत्वस्थलं समापयति—

श्लोकः-गुरुभक्तिविहीनस्य शिवभक्तिर्न जायते ॥
ततः शिवे यथा भक्तिस्तथा भक्तिर्गुरावपि ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

"इति गुरुमहत्वस्थलम्"

अर्थ-॥ ६ ॥ ज्यानें गुरुभक्ति केली नाहीं, त्याचे हातून शिवभक्ति घडत नाहीं ह्यास्तव शिवाची जशी भक्ति करावयाची तशीच गुरूचीही भक्ति केली पाहिजे.

"अथ लिंगमाहात्म्यस्थलम्"

अवतरणिका-अथ गुरुकृपाप्रकाश्यलिंगमहत्वस्थलं निरूपयति—

श्लोकः-गुरुमाहात्म्ययोगेन निजज्ञानातिरेकतः ॥
लिंगस्यापि च माहात्म्यं सर्वोत्कृष्टं विभाव्यते ॥ १ ॥

व्याख्यानं—गुरुमाहात्म्यज्ञानयोगेन निजज्ञानाधिक्यात् लिंगस्य शिवलिंगस्य माहात्म्यमपि सर्वोत्कृष्टं सत् विभाव्यते विज्ञायत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ गुरूच्या माहात्म्यामुळें आणि आपलें स्वतःचें शिवज्ञान ज्यास्त वाढल्यामुळें इष्टलिंगाचें माहात्म्य देखील उत्तमतऱ्हेनें कळून येतें.

अवतरणिका-ननु लिंगज्ञानव्यतिरेकेण तन्माहात्म्यज्ञानासंभवात् । लिंगस्वरूपं केन ज्ञापितमित्यत्राह—

श्लोकः-शिवस्य बोधलिंगं यद्गुरुबोधितचेतसा ॥
तदेव लिंगं विज्ञेयं शांकरं सर्वकारणम् ॥ २ ॥

व्याख्यानं—शिवस्य यद्बोधलिंगं चिन्मयलिंगमस्ति तच्छांकरं लिंगं सर्वकारणं विष्णवादिसर्वविश्वकारणं सत् गुरुबोधितचेतसैव विज्ञेयं ज्ञातुं योग्यं गुरुणैव ज्ञापितमित्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ गुरूनें उपदेश केल्यामुळें मनास जें शिवाचें ज्ञान झालें तेंच बोधलिंग (चिन्मयलिंग) होय, व तेंच शंकराचें लिंग होय, आणि तें सर्वजगाच्या उत्पत्ति स्थिति लयालाही कारण आहे.

अवतरणिका-अथ तत्कीदृशमित्यत्राह—

श्लोकः-परं पवित्रममलं लिंगं ब्रह्म सनातनम् ॥
शिवाभिधानं चिन्मात्रं सदानंदं निरंकुशम् ॥ ३ ॥
कारणं सर्वलोकानां वेदानामपि कारणम् ॥
पूरणं सर्वतत्वस्य तारणं जन्मवारिधेः ॥ ४ ॥
ज्योतिर्मयमनिर्देश्यं योगिनामात्मनि स्थितम् ॥
कथं विज्ञायते लोके महागुरुदयां विना ॥ ५ ॥

व्याख्यानं—अत्र सर्वतत्वस्य पूरणमित्यनेन "शिखंड्यंडरसन्यायेन" स्वात्मैकरसेन परिपूर्णविश्वमयत्वमुक्तं योगिनां शिवयोगिभिः अनिर्देश्यं सत् आत्मनि निजस्वरूपे स्थितं ज्योतिर्मयं "स्थाणुवज्ज्वलति लिंगमदृश्यं" इति याज्ञवल्क्यश्रुतेः स्वातिरिक्तमानांतरागम्यत्वेन स्वयमेव भासमानं परशिवाख्यपरब्रह्ममहालिंगं "तज्ज्ञानं सद्गुरोर्ज्ञेयं नान्यथा शास्त्रकोटिभिः" इति शिवरहस्यवचनमप्यस्तीति लोके महागुरुदयां विना कथं केन प्रकारेण विज्ञायते केनापि प्रकारेण ज्ञातुमशक्यमित्यर्थः ॥ शिष्टं स्पष्टं ॥ ३ ॥ ४ ॥ ५ ॥

अर्थ-॥ ३ ॥ शिवलिंग हें श्रेष्ठ दैवत असून पवित्र आहे, निष्पाप असून ब्रह्मस्वरूप आहे, अनादि आणि चैतन्यस्वरूप आहे, त्याला शिव ह्मणतात. तें नेहमीं आनंदी असून त्यास कोठेंही प्रतिबंध होत नाहीं. ॥ ४ ॥ तें सर्व त्रैलोक्याच्या उत्पत्तीला संरक्षणाला आणि लयालाही कारण आहे. तें वेदांसही कारण आहे त्यापासून (त्या लिंगस्वरूपापासून चार वेद उत्पन्न झाले) ते सर्व तत्वांस पूर्ण करणारें आहे, व संसारसमुद्रांतून प्राणिमात्रांस तारणारें आहे. ॥ ५ ॥ तें लिंगस्वरूप तेजःपुंज आहे, तें अमुक तऱ्हेचें आहे ह्मणून सांगतां देखील येत नाहीं, योगीश्वरांच्या नेहमीं चित्तांत राहणारें आहे (योगीश्वर नेहमीं ह्या लिंगस्वरूपाचा विचार करितात.) ह्या लोकीं आपल्यावर प्रत्यक्ष सद्गुरूची कृपा असल्यावांचून आपणास त्या शिवस्वरूपाचें यथार्थज्ञान कसें होईल, (कधींही होणार नाहीं.)

अवतरणिका-नन्वस्मदादीनां गुरुदयाव्यतिरेकेण विज्ञातुमशक्यत्वेऽपि ब्रह्मादीनां सर्वज्ञत्वेन तदपेक्षा नास्तीति कथमुक्तार्थसिद्धिरित्यत्र "वराहो विष्णुर्निममज्ज भूमौ ब्रह्मोत्पपात दिवमाशु गृध्र" इति लिंगसूत्राभिप्रायेणोक्तार्थं स्थापयति—

श्लोकः–ब्रह्मणा विष्णुना पूर्वं यल्लिंगं ज्योतिरात्मकम् ॥
अपरिच्छेद्यमभवत्केन वा परिचोद्यते ॥ ६ ॥

व्याख्यानं—ज्योतिरात्मकं ज्योतिर्मयं यल्लिंगं ब्रह्मणा विष्णुना च पूर्वमपरिच्छेद्यं ज्ञातुमयोग्यमभवत् तन्महाशिवलिंगं केन वा परिचोद्यते केन विज्ञायत इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ शिवलिंग हें तेजःपुंज आहे, पूर्वी ब्रह्मदेव आणि विष्णु ह्यांस देखील त्या लिंगाचें यथार्थज्ञान झालें नाहीं मग त्याचें यथार्थज्ञान इतरांस कसें होईल?

अवतरणिका–ननु ब्रह्माद्यगम्यं लिंगं कीदृशमित्यत्राह—

श्लोकः–बहुनात्र किमुक्तेन लिंगं ब्रह्म सनातनम् ॥
योगिनो यत्र लीयंते मुक्तपाशनिबंधनाः ॥ ७ ॥

व्याख्यानं—अत्र बहुभाषणेन किं विश्वलयगमनकारणं नित्यं ब्रह्मैव लिंगं यत्र परब्रह्मात्मनि शिवलिंगे सनकादियोगिनः मुक्तपाशनिबंधनाः विसृष्टा विद्यादिपंचक्लेशपाशबंधाः संतः लीयंते तादात्म्यं भजंत इत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ फार सांगण्यांत हंशील नाहीं, लिंग हें ब्रह्मस्वरूप असून अनादि आहे, योगीश्वर सनक सनंदन वगैरे लोक त्यांचे सर्वप्रकारचे पाश तुटून ते ह्या लिंगस्वरूपांत लीन (तत्स्वरूप) होतात.

अवतरणिका–ननु ब्रह्मैव लिंगं चेत् किमस्य पीठमित्यत्राह–

श्लोकः–पीठिका परमा शक्तिर्लिंगं साक्षात्परः शिवः ॥
शिवशक्तिसमायोगं विश्वं लिंगं तदुच्यते ॥ ८ ॥

व्याख्यानं—"क्रियाशक्त्यात्मकं पीठं ज्ञानशक्त्यात्मनः प्रभोः" इति शिवागमवचनात् परमा शक्तिः सर्वोत्कृष्टा क्रियाशक्तिः पीठं साक्षात्परः शिवः, चिद्रूपपरमेश्वर एव लिंगं शिवशक्तिसमायोगं शिवशक्तिसंबंधवत्तल्लिंगं विश्वं, "न वज्रचक्रांकसरोरुहांकं लिंगांकितं पश्य जगद्भगांकं" "ज्ञानकर्मेंद्रियैर्विश्वं चित्क्रियालिंगरूपकं" इति पुराणोक्तेः सर्वजगद्रूपमित्युच्यत इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ लिंगाचें सिंहासन हें शिवाची श्रेष्ठ शक्ति आहे आणि लिंग हें प्रत्यक्ष श्रेष्ठ शंकर आहे शिव आणि शक्ति यांचा समागम (दोन्ही एकत्र) होणें हेंच विश्व (त्रैलोक्य) होय, अशा तऱ्हेचें लिंगाचें वास्तविक स्वरूप आहे.

अवतरणिका–अथैवंरूपं लिंगं ब्रह्मादयः संपूज्य महैश्वर्यं प्राप्तवंत इत्याह—

श्लोकः–ब्रह्मादयस्सुरास्सर्वे मुनयश्शौनकादयः ॥
शिवलिंगार्चनादेव स्वं स्वं पदमवाप्नुयुः ॥ ९ ॥

व्याख्यानं—अत्र "तव श्रियै मरुतोऽमर्जयंत रुद्र यत्ते जनिमं चारुचित्रं पदं यद्विष्णोरुपमं निधायि" इति ऋग्वेदश्रुतिः अयमर्थः भो रुद्र मरुतः ब्रह्मादयो देवाः श्रियै विष्णोः पदं स्थानं वैकुंठादिकं उपमं दृष्टांतं निधायि मनसि निधाय चारु मनोहरं चित्रं विचित्रं जनिमं आविर्भावस्थानं लिंगं अमर्जयंत अर्चितवंत इत्यर्थः वैकुंठादिस्थानं महैश्वर्यं च विष्णुः शिवलिंगपूजामहिम्ना लब्धवानिति दृष्टांतीकृत्य ब्रह्मादयो देवास्सर्वेऽपि शिवलिंगं श्रियै पूजितवंत इति यावत् ॥ ९ ॥

अर्थ–॥ ९ ॥ ब्रह्मदेव विष्णु वगैरे सर्व देव शौनक वगैरे सर्व ऋषीश्वर शिवलिंगाची पूजा केल्यामुळेंच आपापल्या अधिकाराचा उपभोग घेऊं लागले.

अवतरणिका–ननु शिवस्यापि विश्वाधिकत्वादिमहैश्वर्यं कस्यचिदुपासनया समागतं किमित्यत्राह—

श्लोकः–विश्वाधिपत्वमीशस्य लिंगमूर्तेः स्वभावजम् ॥
अनन्यदेवसादृश्यं श्रुतिराह सनातनी ॥ १० ॥

व्याख्यानं—"विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं जनयामास पूर्वं न तत्समश्चाप्यधिकश्च दृश्यत" इति श्वेताश्वतरश्रुतेः लिंगमूर्तेः शिवलिंगमूर्तेः ईशस्य परमेश्वरस्य अनन्यदेवसादृश्यं विश्वाधिपत्वं चराचरप्रपंचनियामकत्वं स्वभावजं स्वतःसिद्धमिति सनातनी श्रुतिराहेत्यर्थः ॥ १० ॥

"इति लिंगमहत्वस्थलम्"

अर्थ–॥ १० ॥ लिंगस्वरूपी शंकराचें सर्व त्रैलोक्याचें स्वामित्व स्वाभाविक आहे, दुसऱ्या देवांच्यानें शंकराची बरोबरी खचित करवणार नाहीं, असें अनादि कालापासून चालत आलेला वेद सांगतो.

"अथ जंगममाहात्म्यस्थलम्"

अवतरणिका–अथ गुरुलिंगमहत्वात्संवेद्य जंगमस्थलं प्रकाशयति—

श्लोकः–गुरुशिष्यसमारूढलिंगमाहात्म्यसंपदः ॥
सर्वं चिद्रूपविज्ञानाज्जंगमाधिक्यमुच्यते ॥ १ ॥

व्याख्यानं—"आचार्यः पूर्वरूपमंतेवास्युत्तररूपं विद्यासंधिः" इति श्रुतेः

गुरुशिष्यमध्यगतशिवलिंगमहत्वसंपदः सर्वं विश्वप्रपंचं चिद्रूपविज्ञानात् चित्क्रियारूपत्वेन विज्ञानात् जंगमाधिक्यमुच्यते, गुरुशिष्ययोरिष्टप्राणभावेषु तादात्म्यभावनया समारूढलिंगमहत्वसंपत्त्या सर्वं विश्वं शिवशक्त्यात्मकमिति विज्ञानमेव जंगमाधिक्यमित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ गुरूनें शिष्यास शिकविलेल्या लिंगमाहात्म्याच्या संपत्तीपेक्षां चैतन्यस्वरूपाचें ज्ञान असल्यामुळें सर्वांपेक्षां जंगमस्थलाची योग्यता मोठी आहे.

अवतरणिका-अथ ते केषु जंगमा इत्यत्राह—

श्लोकः-जानंत्यतिशयाद्ये तु शिवं विश्वप्रकाशकम् ॥
स्वस्वरूपतया ते तु जंगमा इति कीर्तिताः ॥ २ ॥

व्याख्यानं—"तस्य भासा सर्वमिदं विभाति" इति श्रुतेः ये विश्वप्रकाशकं स्वकीयचित्क्रियाशक्तिभ्यां प्रपंचप्रकाशं शिवं अतिशयेन सर्वासर्वशब्दार्थयोर्मायाकार्यकोटिप्रविष्टत्वेनाऽसनातनत्वात् एतज्जीवनभूतज्ञत्वकर्तृत्वयोस्सनातनत्वात् अन्यथा स्वविषयकज्ञानशून्यत्वेन स्फटिकादिप्रकाशवज्जडत्वप्रसंगात् तयोर्जीवेश्वरसाधारणीभूतास्तद्रूपात्मतत्वनिजस्वभावत्वात् स्वयं तदनतिरिक्त इति दृढतरनिश्चयेन स्वस्वरूपतया जानंति ते जंगमा इत्यर्थः. ॥ २ ॥

अर्थ-॥ २ ॥ जे लोक त्रैलोक्यांचा प्रकाश करणाऱ्या शिवास आपल्या अनुभवज्ञानावरून यथार्थरीतीनें जाणतात त्यांस जंगम ह्मणतात.

अवतरणिका-अथ शिवयोगित्वेन प्रसिद्धजंगममहत्वं पंचभिस्सूत्रैः प्रतिपादयति—

श्लोकः-ये पश्यंति जगज्जालं चिद्रूपं शिवयोगतः ॥
निर्धूतमलसंस्पर्शास्ते स्मृताश्शिवयोगिनः ॥ ३ ॥

व्याख्यानं—ये जंगमा देवाः विश्वं शिवयोगतः विश्वस्य शिवसंबंधाभावे चिद्वाह्यत्वेन संकल्पतापत्तेः शिवसंबंधोंऽगीकरणीय एव स च संयोगरूपो न भवति तस्य क्रियापूर्वत्वेन भिन्नदेशस्थितयोरेवोपपद्यत इति ब्रह्मबाह्यदेशाभावेन तादात्म्यरूप एवेत्युपपादितत्वात् चिद्रूपं चित्क्रियास्वरूपमिति पश्यंति जानंति ते निर्धूतमलसंस्पर्शाः निर्गताणवादिमलसंबंधिनः शिवयोगिन इति स्मृता इत्यर्थः॥३॥

अर्थ-॥ ३ ॥ जे त्रैलोक्याच्या पसाऱ्यास शिवयोगसाधनानें चित्स्वरूप आहे असें मानतात, ज्यांचा पापाचा सर्व संबंध नाहींसा झालेला आहे (जे पातकी नाहींत) त्यांस शिवयोगी असें ह्मणावें.

श्लोकः–घोरसंसारतिमिरपरिध्वंसनकारणम् ॥
येषामस्ति शिवज्ञानं ते मताश्शिवयोगिनः ॥ ४ ॥

व्याख्यानं—भयंकरसंसारांधकारनिवारकं शिवाधिक्यज्ञानं येषामस्ति ते शिवयोगिन इति मताः स्मृता इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवज्ञान हें भयंकर संसाररूप अंधकाराचा नाश करणारें आहे, तें शिवज्ञान ज्या लोकांस आहे त्या लोकांस शिवयोगी ह्मणतात.

अवतरणिका–अथ ते कीदृशाः कथं तिष्ठंतीत्यत्राह—

श्लोकः–जितकामा जितक्रोधा मोहग्रंथिविभेदिनः ॥
समलोष्टाश्मकनकास्साधवश्शिवयोगिनः ॥ ५ ॥
समाः शत्रौ च मित्रे च साक्षात्कृतशिवात्मकाः ॥
निस्पृहा निरहंकारा वर्तंते शिवयोगिनः ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ५ ॥ ६ ॥

अर्थ–॥ ५ ॥ ज्यांस मदनाची पीडा होत नाहीं, ज्यांस क्रोधाची पीडा होत नाहीं, ज्यांची मोहाची गांठ सुटलेली आहे (ज्यांस अज्ञानपणा नाहीं) ज्यांस मातीचें ढेंकूळ आणि सोनें सारखेंच आहे, त्या सज्जनांस शिवयोगी असें ह्मणावें. ॥ ६ ॥ शिवयोगी लोकांस शत्रु आणि मित्र हे दोन्हीही सारखेच वाटतात, त्यांस प्रत्यक्ष शिवस्वरूपाचें ज्ञान झालेलें असतें, ते निस्पृह असतात, त्यांस अभिमान मुळींच नसतो. ते सर्वांशीं प्रेमभावानें आणि अगदीं साध्या स्वभावानें वागतात.

अवतरणिका–एवमुक्तलक्षणज्ञानसंपन्नाः साक्षाच्छिवा एवेत्याह—

श्लोकः–दुर्लभं हि शिवज्ञानं दुर्लभं शिवचिंतनम् ॥
येषामेतद्द्वयं चास्ति ते हि साक्षाच्छिवात्मकाः ॥ ७ ॥

व्याख्यानं—शिवज्ञानं शिवाधिक्यज्ञानं शिवचिंतनम् उक्तयुक्तिभिः स्वयमेव शिव इति मननं च दुर्लभं एतद्द्वयं येषामस्ति ते साक्षाच्छिवरूपा इत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ शिवज्ञान दुर्लभ असून नेहमीं शिवचिंतन करणें हें ही काम कठिण आहे, त्या दोन्ही गोष्टी ज्यांच्या हातून नेहमीं घडतात ते शिवयोगी प्रत्यक्ष शंकरस्वरूपच होत.

अवतरणिका–अथ पुनस्तेषां महत्वं श्लोकद्वयेनाह—

श्लोकः–पादाग्ररेणवो यत्र पतंति शिवयोगिनाम् ॥
तदेव सदनं पुण्यं पावनं गृहमेधिनाम् ॥ ८ ॥
सर्वसिद्धिकरं पुंसां दर्शनं शिवयोगिनाम् ॥
स्पर्शनं पापशमनं पूजनं मुक्तिसाधनम् ॥ ९ ॥

व्याख्यानं—शिवयोगिनाम् जंगमदेवानामित्यर्थः गृहमेधिनाम् गृहस्थानामित्यर्थः पुण्यं पुण्यक्षेत्रमित्यर्थः पावनं पवित्रं शिष्टं स्पष्टं ॥ ८ ॥ ९ ॥

अर्थ–॥ ८ ॥ शिवयोगी लोकांच्या चरणाची धूलि जेथें पडते तेंच गृहस्थाश्रमी लोकांचें घर पवित्र आणि दुसऱ्यास पवित्र करणारें आहे असें समजावें. ॥ ९ ॥ शिवयोगी लोकांचें दर्शन झालें ह्मणजे मनुष्यास सर्वप्रकारच्या सिद्धि प्राप्त होतात, शिवयोगीलोकांचा स्पर्श झाला असतां पातक नाश होतें आणि शिवयोग्याचें पूजन केल्यानें मोक्ष प्राप्ति होते.

अवतरणिका–अथैव तादृशशिवयोगिनां संपर्कात्सर्वेप्सितार्थसिद्धिरित्याह—

श्लोकः–महतां शिवतात्पर्यवेदिनामनुमोदिनाम् ॥
किंवा फलं न सिद्ध्येत संपर्काच्छिवयोगिनाम् ॥ १० ॥

व्याख्यानं—शिवरहस्याभिप्रायवेदिनाम् शिवसुखानुमोदिनाम् महतां सत्पुरुषाणाम् शिवयोगिनाम् जंगमदेवानां संपर्कात्किं वा फलं न सिद्ध्येत सर्वं सिद्ध्येदित्यर्थः ॥ १० ॥

"इति जंगममहत्वस्थलम्"

अर्थ–॥ १० ॥ शिवयोगी लोक श्रेष्ठ असतात, शिवरहस्य जाणणारे असतात, ते नेहमीं आनंदी असतात, त्या शिवयोगी लोकांची सेवा केली तर अमुक एक फलप्राप्ति होणार नाहीं असें काय आहे? सर्वप्रकारची फलप्राप्ति होईल.

"अथ भक्तमाहात्म्यस्थलम्"

अवतरणिका–अथ गुरुलिंगजंगममहत्वलंपटस्य भक्तस्य महत्वं द्वादशसूत्रैः प्रतिपादयति—

श्लोकः–गुरोर्लिंगस्य माहात्म्यकथनाच्छिवयोगिनाम् ॥
सिद्धं भक्तस्य माहात्म्यं तथाप्येष प्रशस्यते ॥ १ ॥

व्याख्यानं—गुरुलिंगजंगमेष्वेवंविधमाहात्म्यज्ञानपूर्वकं भक्तेः क्रियमाणत्वेन भक्तमाहात्म्यं सिद्धमिति तथैवायं शास्त्रे प्रशस्यते उत्कर्षेण भण्यत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ गुरूचें माहात्म्य, लिंगाचें माहात्म्य, जंगमाचें माहात्म्य सांगितलें त्यावरून भक्ताचें माहात्म्य उघड दिसतच आहे तरीपण तें आतां सांगतों.

अवतरणिका-अथ के भक्ता इत्यत्र "यद्धि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोति" इति श्रुत्यर्थानुसारेण भक्तस्वरूपमाह—

श्लोकः-ये भजंति महादेवं परमात्मानमव्ययम् ॥
कर्मणा मनसा वाचा ते भक्ता इति कीर्तिताः ॥ २ ॥

व्याख्यानं—हस्ताभ्यामर्चनारूपकायिकक्रियया शिवमूर्तिध्यानरूपमानसक्रियया स्तुतिरूपवाचिकक्रियया च ये परमात्मानं लिंगरूपिणं महादेवं भजंति ते भक्ता इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ महादेव हा परमेश्वर आहे, त्याचा कधींही नाश होत नाहीं त्या महादेवाला जे लोक कायावाचामनेंकरून भजतात त्यांस भक्त ह्मणावें,

अवतरणिका-शिवभक्तेः जातिभेदोऽस्ति किमित्यत्राह—

श्लोकः-दुर्लभा हि शिवे भक्तिस्संसारभयतारिणी ॥
सा यत्र वर्तते साक्षात्स भक्तः परिगीयते ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ-॥ ३ ॥ संसाराची भीति नाहींशी करणारी शिवाची भक्ति दुर्लभ आहे, सर्वांस ती शिवभक्ति घडत नाहीं. ती भक्ति ज्याच्या आंगांत (मनांत) असते त्यास भक्त ह्मणावें.

अवतरणिका-तस्माज्जननमरणपरिपीडितानां जनानां शिवभक्तिव्यतिरेकेण केनापि सत्कर्मणा प्रयोजनं नास्तीत्याह—

श्लोकः-किं वेदैः किं ततः शास्त्रैः किं यज्ञैः किं तपोव्रतैः ॥
नास्ति चेच्छांकरी भक्तिर्देहिनां जन्मरोगिणाम् ॥ ४ ॥

व्याख्यानं—शास्त्रैः वेदार्थानुगैः शिवागमसूत्रपुराणादिभिरित्यर्थः शिष्टं स्पष्टं ॥ ४ ॥

अर्थ-॥ ४ ॥ वेद शिकून काय करावयाचें आहे? शास्त्र शिकून काय करावयाचें आहे? यज्ञ करून काय करावयाचें आहे? तपश्चर्या व व्रतें करून

तरी काय करावयाचें आहे? जर जन्ममरणरूपी रोग लागलेल्या मनुष्यांस शिवभक्ति चांगली घडत नसेल तर, वर सांगितलेल्या गोष्टींचा कांहीं उपयोग नाहीं.

अवतरणिका–अथ शिवभक्तिव्यतिरेकेण विधीयमानं सत्कर्म विफलं विपरीतफलदं चेति दृष्टांतपूर्वकमाह—

श्लोकः–शिवभक्तिविहीनस्य सुकृतं चापि निष्फलं ॥
विपरीतफलं च स्याद्दक्षस्यापि महाध्वरे ॥ ५ ॥

व्याख्यानं—स्यात् अभवदित्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ जो मनुष्य शिवभक्ति करीत नसेल त्यानें सत्कर्म केलें तरी त्याचा उपयोग नाहीं, तें व्यर्थ जातें. दक्षप्रजापतीनें प्रत्यक्ष यज्ञ केला तरी शिवभक्ति नसल्यामुळें त्याचा परिणाम वाईट झाला.

अवतरणिका–अथ शिवभक्त्या दुष्कर्मापि सत्कर्म भवेदिति दृष्टान्तपूर्वकमाह—

श्लोकः–अत्यंतपापकर्माऽपि शिवभक्त्या विशुद्ध्यति ॥
चंडो यथा पुरा भक्त्या पितृहाऽपि शिवोऽभवत् ॥ ६ ॥

व्याख्यानं—शिवः शिवगणाधीश इत्यर्थः शिष्टं स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ मनुष्य अतिशय पातकी असला तरी जर तो शिवभक्ति करील तर लागलाच पातकांतून मुक्त होऊन शुद्ध होतो. ह्याला प्रत्यक्ष उदाहरण हें कीं, चंडानें पूर्वी आपल्या प्रत्यक्ष बापाचा जीव घेतला होता तरी शिवभक्ति केल्यामुळें शंकराचें सायुज्य पावला.

अवतरणिका–नन्वेवं चेत् शिवभक्तानां पुण्यपापसंबंधोऽस्ति वा नवेत्यत्राह—

श्लोकः–सुकृतं दुष्कृतं चापि शिवभक्तस्य नास्ति हि ॥
शिवभक्तिविहीनानां कर्मपाशनिबंधनम् ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

अर्थ–॥ ७ ॥ शिवाची भक्ति करणाराला पुण्य नाहीं, पाप नाहीं. शिवभक्ति न करणारांला मात्र त्यांच्या त्यांच्या कर्माप्रमाणें सुखदुःखें भोगावीं लागतात.

अवतरणिका–तत्कथमित्यत्र दृष्टांतपूर्वकं सूत्रद्वयेनाह—

श्लोकः–शिवाश्रितानां जंतूनां कर्मणा नास्ति संगमः ॥
वाजिनां दिननाथस्य कथं तिमिरजं भयम् ॥ ८ ॥

व्याख्यानं—दिननाथस्य रवेर्वाजिनामश्वानां यथांधकारप्रयुक्तभीर्नास्ति तथा शिवभक्तानां कर्मणा पुण्यपापमयेन कर्मणा संगमः संबंधो नास्तीत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ जसें सूर्याचे रथास जुंपलेल्या घोड्यांस अंधाराचें भय नाहीं. तसेंच शिवभक्तांस पुण्यपाप वगैरे कर्मांचा संबंध नाहीं.

श्लोकः–निरोद्धुं न क्षमं कर्म शिवभक्तान्विशृंखलान् ॥
कथं मत्तगजान् रुंधेच्छृंखला बिसतंतुजा ॥ ९ ॥

व्याख्यानं—शिवदीक्षयाऽऽणवादिमलत्रयस्य निवृत्तत्वेन विशृंखलान् शिवभक्तान् कर्म निरोद्धुं न क्षमं न समर्थं तत्र दृष्टांतः मृणालतंतुनिर्मिता शृंखला यथा मत्तगजं न रुंधेत तथेत्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ एखाद्या उन्मत्त हत्तीला कमळाच्या देंठांनीं बांधूं ह्मटलें तर तें जसें होऊं शकत नाहीं तसेंच शिवाची भक्ति करणारे शिवभक्त हे स्वतंत्र आणि सशक्त आहेत ह्मणून त्यांस कर्माच्यानें पीडा करवत नाहीं.

अवतरणिका–तस्माच्छिवभक्त एव पूज्य इत्याह—

श्लोकः–ब्राह्मणः क्षत्रियो वाऽपि वैश्यो वा शूद्र एव वा ॥
अंत्यजो वा शिवे भक्तः शिववन्मान्य एव सः ॥ १० ॥

व्याख्यानं—स्पष्टं ॥ १० ॥

अर्थ– ॥ १० ॥ ब्राह्मण असो, क्षत्रिय असो, वैश्य असो शूद्र असो, किंवा चांडाळ असो, जो शिवाची भक्ति करितो तो शिवासारखाच मान्य आहे.

अवतरणिका–ननु शूद्रादीनां ब्राह्मणाद्यपेक्षया निकृष्टत्वात् कथं तेषां तत्समानत्वमित्यत्राह—

श्लोकः–शिवभक्तिसमावेशे क जातिपरिकल्पना ॥
इंधनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते ॥ ११ ॥

व्याख्यानं—स्पष्टम् ॥ ११ ॥

अर्थ–॥ ११ ॥ ज्याचे आंगीं शिवभक्ति परिपूर्णपणानें भरलेली आहे त्याचे जातीबद्दल विचार करण्याचें कांहींएक कारण राहिलें नाहीं, लांकडें विस्तवांत

जळून त्यांचे कोळसे झाले म्हणजे त्यांत निराळेपणा अमुक राहिलेला म्हणून काय सांगावा? सांगतांच येत नाहीं.

अवतरणिका–तस्माच्छिवभक्ता एव गणेश्वरा इत्युक्त्वा भक्तमाहात्म्यं समापयति—

श्लोकः–शुद्धा नियमसंयुक्ताः शिवार्पितफलागमाः ॥
अर्चयंति शिवं लोके विज्ञेयास्ते गणेश्वराः ॥ १२ ॥

व्याख्यानं—ये शुद्धाः दीक्षया परिपूताः नियमसंपन्नाः शिवव्रतिनः शिवार्पितफलागमाः तदर्पितपुण्यपापफलागमाः संतः लोके शिवलिंगमर्चयंति ते "नाशिवस्य शिवोपास्तिः" "नारुद्रो रुद्रमर्चयेत्" इत्यादिवचनैः गणेश्वरा इति रुद्रा इति विज्ञेया इत्यर्थः ॥ १२ ॥

"इति भक्तमाहात्म्यस्थलम्"

अर्थ–॥ १२ ॥ जे दीक्षेमुळें पवित्र झाले असतात, नेहमीं शिवव्रतें व नियम वगैरे पाळितात. जीं जीं कांहीं कर्मे करितात, त्यांचीं फळें ते शिवास अर्पण करितात, व नेहमीं ते शिवाचें पूजन करितात त्यांस प्रमथपति (रुद्र) आहेत असें जाणावें.

"अथ शरणमहत्वस्थलम्"

अवतरणिका–अथ गुरुलिंगादिमहत्वं ज्ञात्वा शिव एक एव रक्षक इति प्रपद्यमानस्य शरणस्य महत्वं प्रतिपादयति—

श्लोकः–गुरुलिंगादिमाहात्म्यबोधान्वेषणसंगतः ॥
सर्वात्मना शिवापत्तिः शरणस्थानमुच्यते ॥ १ ॥

व्याख्यानं—गुरुलिंगशिवयोगिशिवभक्तमहत्वज्ञानान्वेषणसंबंधात् सर्वात्मना नानाप्रकारेणापि शिवापत्तिः शिव एक एव रक्षक इति प्रपन्नता शरणस्थानमित्युच्यत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ गुरु, लिंग, वगैरेचें माहात्म्य सांगितलें त्याच क्रमानें आतां शरणस्थान सांगतों. सर्वप्रकारानें शिवच रक्षक आहे म्हणून त्यास अनन्यभावानें शरण जाणें त्यास शरणस्थान असें म्हणतात.

अवतरणिका–अथ तदेव विशदयति—

श्लोकः–ब्रह्मादिविबुधान्सर्वान्मत्वा प्राकृतवैभवान् ॥
प्रपद्यते शिवं यत्तु शरणं तदुदाहृतम् ॥ २ ॥

व्याख्यानं—"शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य" इति श्रुतेः प्राकृतवैभवान् प्रकृतिजन्यसंपत्तिमतो ब्रह्मविष्ण्वादिदेवान् मुक्त्वा त्यक्त्वा शिवं यत्प्रपद्यते प्रपन्नत्वेनाश्रयते तत् शरणं शरणस्थलमित्युदाहृतं कथितमित्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ ब्रह्मदेव, विष्णुवगैरे सर्व देवांचे ऐश्वर्य इतर सामान्यमनुष्यांप्रमाणेंच कधीं तरी नाश पावणारें आहे असें समजून त्या देवतांविषयीं उदासीन राहून (त्यांना सोडून) आपलें मन शिवाकडेच निश्चलपणानें लावितो त्यास शरणस्थल ह्मणावें.

अवतरणिका—अथ शरणागतस्य स्वरूपं विशदयति—

श्लोकः—शरण्यस्सर्वभूतानां शंकरश्शशिशेखरः ॥
सर्वात्मना प्रपन्नस्तं शरणागत उच्यते ॥ ३ ॥

व्याख्यानं—शशिशेखरः शंकरः परमेश्वरः सर्वभूतानां सकलप्राणिनां शरण्यः रक्षणे समर्थः इति तं सर्वात्मना सर्वप्रकारेण प्रपन्नः रक्षेति प्रपन्नः शरणागत इत्युच्यत इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ चंद्र मस्तकावर धारण करणारा शंकर हा सर्व (प्राण्यांचें) जगाचें रक्षण करणारा आहे, त्या शंकरास जो अनन्यभावानें शरण जातो त्यास शरणागत ह्मणावें.

अवतरणिका—अथ शरणार्थिस्वरूपं कथयति—

श्लोकः—विमुक्तभोगलालस्यो देवतांतरनिस्पृहः ॥
शिवमभ्यर्थयन्मोक्षं शरणार्थीति गीयते ॥ ४ ॥

व्याख्यानं—विमुक्तभोगलंपटत्ववान् ब्रह्मविष्ण्वादिपदव्यां विरक्तः सन् शिवं प्रति मोक्षमभ्यर्थयन् शरणार्थीति गीयते कथ्यत इत्यर्थः ॥ ४ ॥

अर्थ—॥ ४ ॥ ज्या मनुष्याची विषयसुखाची आवड कमी झाली आहे, शिवाखेरीज इतर देवांची (ब्रह्मदेव विष्णु वगैरेंची) जो भक्ति करीत नाहीं, मोक्षप्राप्ति व्हावी ह्मणून जो नेहमीं शिवाचीच भक्ति करितो व शिवालाच मोक्ष मागतो. त्यास शरणार्थी असें ह्मणावें.

अवतरणिका—एवं शिवं प्रपन्नानां किमपि सत्कर्म मास्त्वित्याह—

श्लोकः—ये प्रपन्ना महादेवं मनोवाक्कायकर्मभिः ॥
तेषां तु कर्मजातेन किं वा देवादितर्पणैः ॥ ५ ॥

व्याख्यानं—ये महादेवं शिवं मनोवाक्कायकर्मभिः ध्यानस्तुतिपूजाकर्मभिः रक्षेति प्रपन्नानां तेषां कर्मजातेन यज्ञादिकर्मसमूहेन देवप्रभृतितर्पणेन च किं वा किमपि प्रयोजनं नास्तीत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ जे लोक कायावाचामनानें शंकरास शरण गेले त्यांस यज्ञ याग जप तप करण्याचें तरी काय काम आहे ? आणि इतर देवतांची भक्ति करण्याचें तरी काय काम आहे ?

अवतरणिका–कुत इत्यत्र तदर्थं सूत्रद्वयेन प्रतिपादयति—

श्लोकः–सर्वेषामपि यज्ञानां क्षयः स्वर्गः फलायते ॥
अक्षयं फलमाप्नोति प्रपन्नः परमेश्वरम् ॥ ६ ॥

व्याख्यानं—अक्षयं फलं मोक्षमित्यर्थः शिष्टं स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ कोणते का यज्ञ असेनात, त्यांचें फळ ह्मटलें तर स्वर्गप्राप्ति होणें हेंच आहे, त्या स्वर्गास देखील नाश आहेच शंकरास शरण येणारास असें फळ मिळतें कीं, त्या फळाचा नाश ह्मणून होतच नाहीं. (शिवभजनानें मोक्ष प्राप्त होतो.)

अवतरणिका–पापिनां कथमित्यत्राह—

श्लोकः–प्रपन्नपारिजातस्य भवस्य परमात्मनः ॥
प्रपत्त्या किं न जायेत पापिनामपि देहिनाम् ॥ ७ ॥

व्याख्यानं—शरणागतकल्पद्रुमस्य परमात्मनः शिवस्य प्रपत्त्या रक्षकत्वेन प्रपत्त्या पापिनां प्राणिनामपि किं न जायेत सर्वं भवेदित्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ शंकर हा परमेश्वर असून शरण आलेल्या भक्तांस कल्पवृक्षासारखा सर्वतऱ्हेचे त्यांचे मनोरथ परिपूर्ण करणारा आहे, मनुष्य जरी अतिशय पातकी असला तरी तो शिवभक्ति करूं लागल्यावर त्यास काय एक प्राप्त होणार नाहीं? सर्वकांहीं मिळेल.

अवतरणिका–तस्मात् शिवप्रपन्ना एव श्रेष्ठा इत्याह—

श्लोकः–प्रपन्नानां महादेवं परिपक्वांतरात्मनाम् ॥
जन्मैव जन्म नान्येषां वृथा जननसंगिनाम् ॥ ८ ॥

व्याख्यानं—महादेवं प्रपद्य परिपक्वांतःकरणानां पुंसां जन्मैव जन्मफलं वृथा जननभाजामप्रपन्नानां जन्म न जन्मैव न वृथेत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ महादेवास शरण येऊन त्याच्या भक्तीनें ज्यांचीं मनें नेहमीं

सुप्रसन्न झालीं त्यांच्या जन्मासच जन्म असें ह्मणावें. दुसरे लोक व्यर्थ अनेक वेळ जन्मास येतात व अनेकवेळ मरतात त्यांच्या जन्माचा कांहींएक उपयोग नाहीं.

अवतरणिका-अथ तदेव विशदयति—

श्लोकः-दुर्लभं मानुषं प्राप्य जननं ज्ञानसाधनम् ॥
ये न जानंति देवेशं तेषामात्मा निरर्थकः ॥ ९ ॥

व्याख्यानं—दुर्लभं मानुषं जननं जन्म प्राप्य ज्ञानसाधनं आत्मज्ञानप्रदं देवेशं, परशिवम् ये न जानंति तेषां आत्मा जीवः निरर्थकः अप्रयोजक इत्यर्थः ॥९॥

अर्थ-॥ ९ ॥ मनुष्यजन्म दुर्मिळ असून ज्ञानप्राप्ति होण्यास उपयोगी पडण्यासारखा आहे इतर जन्मांत ज्ञानप्राप्ति होत नाहीं असा मनुष्यजन्म मिळाला असूनही जे लोक शंकरास जाणत नाहींत त्यांचा जन्म व्यर्थ आहे.

अवतरणिका-अथ "कुलं पवित्रं जननी कृतार्था" इति सूतसंहितानुसारेण शरणमहत्वं प्रकाश्य तत्स्थलं समापयति—

श्लोकः-तत्कुलं हि सदा शुद्धं सफलं तस्य जीवितम् ॥
यस्य चित्तं शिवे साक्षाद्विलीनमबहिर्मुखम् ॥ १० ॥

व्याख्यानं—यस्य चित्तं सदा साक्षाच्छिवलिंगे अबहिर्मुखं बहिर्मुखं यथा न भवति तथा विलीनं विशेषेण लयं गतं तत्कुलं शुद्धं तस्य जीवितं जीवनं सफलमित्यर्थः ॥ १० ॥

"इति शरणमहत्वस्थलम्"

अर्थ-॥ १० ॥ ज्याचें मन विषयसुखांत न गुंततां प्रत्यक्ष शिवस्वरूपांतच लीन होऊन जातें, त्याचा वंश धन्य आहे व निष्पाप आहे त्यांच्या जन्माचें सार्थक झालें.

"अथ प्रसादमहत्वस्थलम्"

अवतरणिका-अथ पूर्वोक्तगुरुलिंगादिमहत्वानुभवस्थितेः शिवप्रसादलभ्यत्वात् तत्प्रसादमहत्वं कथयति—

श्लोकः-गुरुलिंगादिमाहात्म्यविशेषानुभवस्थितिः ॥
यस्माच्छिवप्रसादात्स्यात्तदस्य महिमोच्यते ॥ १ ॥

व्याख्यानं—गुरुलिंगजंगमशिवभक्तशिवशरणमहत्वविशेषानुभवस्थितिः य-

स्मात् कारणात् शिवप्रसादाख्यात् तस्मात्कारणात् अस्य शिवप्रसादस्य महिमा महत्वं उच्यते कथ्यत इत्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ गुरु, लिंग, जंगम ह्यांच्या माहात्म्याच्या विशेष अनुभवाची स्थिति ज्या शिवप्रसादावरून प्राप्त होते त्या शिवप्रसादाचा महिमा सांगतों.

अवतरणिका—ननु शिवप्रसादः कथं गुरुलिंगादिमहत्वविशेषानुभवस्थितिहेतुरित्यत्राह—

श्लोकः—सदा लिंगैकनिष्ठानां गुरुपूजानुषंगिणाम् ॥
प्रपन्नानां विशुद्धानां प्रसीदति महेश्वरः ॥ २ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥

अर्थ—॥ २ ॥ जे लोक (भक्त) शिवलिंगावर नेहमीं विश्वास ठेवितात, नेहमीं गुरुपूजा मनोभावानें करितात, जे शरण येतात व ज्यांचें आचरण शुद्ध आहे त्यांवर शंकर कृपा करितो.

अवतरणिका—स च शिवप्रसादः कीदृशस्तेन किं भवतीत्यत्राह—

श्लोकः—प्रसादोऽपि महेशस्य दुर्लभः परिकीर्त्यते ॥
घोरसंसारसंतापनिवृत्तिर्येन जायते ॥ ३ ॥

व्याख्यानं—इतरेषामलिंगिनां दुर्लभः तेन शिवप्रसादेन भयंकरसांसारिकतापत्रयनिवृत्तिर्जायत इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ शंकराचा प्रसाद होणें फार दुर्मिळ आहे असें ह्मटलें आहे आणि तो शिवप्रसाद झाला ह्मणजे भयंकर अशा संसारांतील तापांचें निवारण होतें.

अवतरणिका—ननु तमेवं वेदानुवचनेन "ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा नाशकेन" इति श्रुतेः यज्ञादीनां शिवज्ञानसाधनत्वश्रवणात् तेनैव सांसारिकदुःखनिवृत्तेः किं महेश्वरप्रसादेनेत्यत्राह—

श्लोकः—यज्ञास्तपांसि मंत्राणां जपश्चिता प्रबोधनम् ॥
प्रसादार्थं महेशस्य कीर्तितानि न संशयः ॥ ४ ॥

व्याख्यानं—अत्र चिंता ध्यानं प्रबोधनं शिवाधिक्यज्ञानं शिष्टं स्पष्टं ॥ ४ ॥

अर्थ—॥ ४ ॥ शंकराचा प्रसाद होण्यासाठींच यज्ञ करावे लागतात, तप

करावें लागतें, मंत्रांचा जप करावा लागतो, ध्यान धरावें लागून शिवज्ञान करून घ्यावें लागतें इतक्या सर्व गोष्टी शिवप्रसादाकरितां कराव्या लागतात ह्यांत शंका नाहीं.

अवतरणिका–ननु मोक्षस्य भक्तिमूलत्वात्किं प्रसादेनेत्यत्राह–

श्लोकः–प्रसादमूला सर्वेषां भक्तिरव्यभिचारिणी ॥
शिवप्रसादहीनस्य भक्तिश्चापि न सिद्ध्यति ॥ ५ ॥

व्याख्यानं—सर्वेषां समस्तजनानां अव्यभिचारिणी अनन्यगामिनी भक्तिः प्रसादमूला शिवप्रसादशून्यस्य भक्तिरेव न सिद्ध्यतीर्थः तस्मात् ॥ ५ ॥

अर्थ–॥ ५ ॥ सर्व प्राणिमात्र शिवाची जी निश्चल भक्ति करितात ती निश्चल घडण्यास शिवप्रसाद मूळ आहे. शिवप्रसाद नसणाऱ्या मनुष्याकडून निश्चल शिवभक्ति घडावयाची नाहीं. व त्या भक्तीचा उपयोगही व्हावयाचा नाहीं.

गर्भस्थो जायमानो वा जातो वा ब्राह्मणोऽथवा ॥
अंत्यजो वापि मुच्येत प्रसादे सति शांकरे ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ शंकराचा प्रसाद झाला तर गर्भांत राहणारा प्राणी असो, उपजत असो किंवा जन्मलेला असो, ब्राह्मण असो किंवा चांडाळ असो तत्काळ मुक्त होतो.

अवतरणिका–अथ ब्रह्मादयोऽपि शिवप्रसादेनैव नित्यसिद्धा इत्याह—

श्लोकः–ब्रह्माद्या विबुधाः सर्वे स्वस्वस्थाननिवासिनः ॥
नित्यसिद्धा भवंत्येव प्रसादात्पारमेश्वरात् ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

अर्थ–॥ ७ ॥ आपापल्या अधिकारावर राहणारे ब्रह्मदेव वगैरे देव परमेश्वराच्या (शिवाच्या) प्रसादानेंच नित्य सिद्ध (त्यांस सर्व सिद्धि नेहमीं अनुकूल आहेत) असे होतात.

अवतरणिका–ननु सर्वशिवात्मकज्ञानेनैव सांसारिकदुःखनिवृत्तेः किं प्रसादेनेत्यत्र "भोक्ता भोग्यं प्रेरयिता भोगोपकरणानि च ॥ सर्वं शिवमयं भाति प्रसादात्पारमेश्वरात्" इति सूतसंहितावचनानुसारेणाह—

श्लोकः-प्रसादे शांभवे सिद्धे परमानंदकारणे ॥
सर्वं शिवमयं विश्वं दृश्यते नात्र संशयः ॥ ८ ॥

व्याख्यानं—स्पष्टं ॥ ८ ॥

अर्थ-॥ ८ ॥ अतिशय आनंद देणारा शिवप्रसाद झाला असतां सर्व त्रैलोक्य शिवस्वरूप आहे असें दिसूं लागतें, ह्यांत कांहीं संशय नाहीं.

अवतरणिका-अथ शिवप्रसादमहत्वं पुनः सूत्रद्वयेन कथयति—

श्लोकः-संसारचक्रनिर्वाहनिमित्तं कर्म केवलम् ॥
प्रसादेन विना शंभोर्न कस्यापि निवर्तते ॥ ९ ॥

व्याख्यानं—संसारचक्रनिर्वाहकारणं कर्मैव तत् यज्ञादिना न नश्यति तस्यापि कर्मरूपत्वेन पुनः परिपोषकत्वात् तस्मात्कस्यापि शिवप्रसादेन विना कर्म नश्यतीति भावः ॥ ९ ॥

अर्थ-॥ ९ ॥ संसारचक्राचे फेऱ्यांत पाडण्यास कर्म कारण आहे तें प्राणिमात्रांचें कर्म शंकराचा प्रसाद झाल्यावांचून दुसऱ्या कोणत्याही साधनानें दूर होत नाहीं. (शंकराच्या प्रसादानें मात्र कर्म दूर होतें.)

बहुनात्र किमुक्तेन नास्ति नास्ति जगत्रये ॥
समानमधिकं चापि प्रसादस्य महेशितुः ॥ १० ॥

व्याख्यानं—स्पष्टं ॥ १० ॥

अर्थ-॥ १० ॥ फार सांगण्यांत अर्थ नाहीं. शंकराच्या प्रसादासारखें किंवा प्रसादापेक्षां ज्यास्त असें ह्या जगांत कोणतेंही दैवत कोणतेंही व्रत वगैरे कांहीं नाहीं. सर्वजगांत शिवप्रसाद श्रेष्ठ आहे.

अवतरणिका-एवंरूपप्रसादसिद्धः प्रसाद्येव प्राणलिंगीत्याह-

वृत्तम्-शिवप्रसादे सति योगभाजि सर्वं शिवैकात्मतया विभाति ॥
स्वकर्ममुक्तश्शिवभावितात्मा स प्राणलिंगीति निगद्यतेऽसौ ॥११॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण प्रणीते सिद्धान्तशिखामणौ प्रसादिनः सप्तविधस्थलप्रसंगो नामैकादशीयपरिच्छेदः समाप्तः ॥

व्याख्यानं—योगभाजिस्वरूपहानिवृद्धिव्यतिरेकेण सजातीयसमरसशिवयोगवति शिवप्रसादे सति सिद्धे सति सर्वविश्वं कृत्स्नं जगत् शिवैकात्मतया शिवाभेदेन विभाति तस्मात् शिवभावितात्मा शिवाभेदेन भावितस्वरूपवान् सोऽसौ प्रसादी स्वकर्ममुक्तः कर्मणोऽपि शिवमयत्वेन स्वस्वरूपतया प्रतिबंधकत्वात् स्वकर्मपाशविनिर्मुक्तः सन् प्राणलिंगीति निगद्यते कथ्यत इत्यर्थः ॥ ११ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां प्रसादिनः सप्तविधप्रसंगो नामैकादशीयः परिच्छेदः समाप्तः ॥

अर्थ–॥ ११ ॥ शिवप्रसाद झाल्यानंतर शिवयोगसमाधि लाविली असतां सर्व त्रैलोक्य शिवस्वरूप दिसूं लागतें. आपल्या कर्माचा नाश करणाऱ्या व नेहमीं शिवचिंतन करणाऱ्या मनुष्यास प्राणलिंगी असें ह्मणतात.

ह्याप्रमाणें श्रीवीरशैवधर्माचा निर्णय असणाऱ्या सिद्धान्तशिखामणिग्रंथांतील प्रसाद्याच्या सात प्रकाराच्या स्थलांचें वर्णन असलेला हा अकरावा परिच्छेद संपला.

॥ श्रीशिवाय नमः ॥



पंचाचार्यपंचमोत्पत्तिक्रमवर्णन.

वीरशैवलिंगिब्राह्मणांना आपलें सूत्र, गोत्र, शाखा, प्रवर वगैरे समजणें अवश्यक आहे. ह्मणून, *सुप्रबोधागमांत श्रीपरमेश्वराची पांच मुखें सद्योजात, वामदेव, अघोर, तत्पुरुष व ईशान यांपासून रेवणाराध्य, मरुळाराध्य, एकोरामाराध्य, पंडिताराध्य, आणि विश्वाराध्य हे पांचजण आचार्य अनुक्रमें उत्पन्न झाले. त्यांची जन्मभूमि सिंहासनाधिपत्यस्थानें, त्यांचीं गोत्रें, त्यांचीं महासूत्रें, प्रवर, शाखा, कलशांचे धातु, त्यांचीं तत्वें, बीजमंत्र (बीजाक्षर), व प्रत्येक महासूत्राचीं उपसूत्रें सांगितलीं आहेत. त्याचप्रमाणें पंचवक्र गणाधीश्वराचीं पांच मुखें सद्योजात, वामदेव, अघोर, तत्पुरुष, ईशान यापासून अनुक्रमें मखारि, कालारि; पुरारि, स्मरारि, वेदारि हे मुख्य पंचम उत्पन्न झाले. त्यांचे गुरु, त्यांचीं गोत्रें, सूत्रें, प्रवर, शाखा वगैरे क्रमवार माहिती सांगितली आहे ती ज्याची त्यास समजावी यासाठीं पुढील पृष्ठावर दिली आहे.

---

*पाशुपत तंत्र वगैरे ग्रंथांत ह्मटलें आहे कीं, सद्योजातमुखापासून मरुळाराध्य, वामदेव मुखापासून एकोरामाराध्य, अघोरमुखापासून रेवणाराध्य, तत्पुरुषमुखापासून पंडिताराध्य, आणि ईशानमुखापासून विश्वाराध्य, उत्पन्न झाले. परंतु आह्मांस तर सुप्रबोधागमावरून, पंचतत्वावरून व पंचप्रणवावरून (बीजाक्षर मंत्रावरून) असें दिसतें कीं, सद्योजातमुखापासून रेवणाराध्य व वामदेवमुखापासून मरुळाराध्य, अघोरमुखापासून एकोरामाराध्य, तत्पुरुषमुखापासून पंडिताराध्य आणि ईशानमुखापासून विश्वाराध्य उत्पन्न झाले हेंच खरें आहे.

परमेश्वराचीं पांचमुखें.	सद्योजात.	वामदेव.	अघोर.	तत्पुरुष.	ईशान.
पंचाचार्यांचीं नांवें.	रेवणाराध्य.	मरुळाराध्य.	एकोरामाराध्य.	पंडिताराध्य.	विश्वाराध्य.
त्यांची जन्मभूमि.	कोल्लिपाकी क्षेत्रांत सोमेश लिंगापासून जन्म.	वटक्षेत्रांत सिद्धेश लिंगापासून जन्म.	धातुकुंड क्षेत्रांत श्रीमल्लिकार्जुन लिंगापासूनजन्म.	द्राक्षाराम क्षेत्रांत रामनाथ लिंगापासून जन्म.	काशी क्षेत्रांत विश्वेश्वर लिंगापासून जन्म
सिंहासनाधिपत्यस्थानें.	रंभापुरी (बाळी हळ्ळी)	उज्जयनीपुरी	श्रीशैलपर्वत.	हिमवत्केदार.	कोल्लिपाकी (काशी)
त्यांचीं गोत्रें.	वीर.	नंदि.	वृषभ.	भृंगी.	स्कन्द
त्यांचें सूत्र.	पडविडि.	वृष्टि.	मुक्तागुच्छ.	लंबन.	पंचवर्ण
त्यांचे प्रवर.	वीरशैव.	वीरशैव.	वीरशैव.	वीरशैव.	वीरशैव
त्यांच्याशाखा	ऋग्वेद	यजुर्वेद.	सामवेद.	अथर्वणवेद.	अजपवेद
कलशांचे धातु.	सोनें.	रुपें.	तांबें.	लोखंड.	शिसें
त्यांचें तत्व.	पृथ्वी.	आप्	तेज.	वायु.	आकाश
त्यांचेबीजमंत्र(बीजाक्षर)	नकार.	मकार.	शिकार.	वाकार.	यकार
महासूत्रांचीं उपसूत्रें. १	पुराण	लोहकंथा	गोणीकंथा	त्रिपुटी	पंचवर्ण
२	पच्छकंथा	स्वर्णकंथा	दंती	रज्जु	कंबाल
३	षडंग	शृंगी	जठर	कंथा	वृषभ
४	सुरगि	मसणी	त्रिगुण	भस्मी	दशवक्त्र
५	महिषी	कुठार	केशकंथा	शिखरी	जरत्कंथा
६	दिगंबर	मैत्री	ललाट	रौप्यक	पंचमुख
७	वेणी	कठार	व्याघ्रकंथा	चंद्रगुंड	गुहाग्र
८	भित्ति	चामरी	लोचन	मृतकंथा	गोचर
९	मोरट	कवाट	भगिनी	काष्टक	गगन
१०	नाटी	कुक्षकंथा	जालकंथा	पवन	मुसली
११	शौरी	ज्वलत्कंथा	नटन	रामगिरि	लगुड
१२	मुसडी	सिंही	बदडि	खड्गी	शिथिली

पंचवक्त्र गणाधीश्वराचीं पांच मुखें.	सद्योजात	वामदेव	अघोर	तत्पुरुष	ईशान
मुख्य पंचमांचीं नांवें.	मखारि	कालारि	पुरारि	स्मरारि	वेदारि
पंचमांचे गुरु.	रेवणाराध्य	मरुळाराध्य	एकोरामा०	पंडिताराध्य	विश्वाराध्य
पंचमांचीं गोत्रें	वीर	नंदि	वृषभ	भृंगि	स्कंद
पंचमांचीं सूत्रें	पडिविडि	वृष्टि	मुक्तागिच्छ	लंबन	पंचवर्ण
पंचमांचे प्रवर	वीरशैव	वीरशैव	वीरशैव	वीरशैव	वीरशैव
पंच शाखा.	ऋग्वेद	यजुर्वेद	सामवेद	अथर्वणवेद	अजपवेद
पंचमांचे कलशांचे धातु	सोनें	रुपें	तांबें	लोखंड	शिसें
पंचमांचीं तत्वें	पृथ्वी	आप्	तेज	वायु	आकाश
त्यांचे बीजमंत्र (बीजाक्षर)	नकार	मकार	शिकार	वाकार	यकार
पंचमांचे उपपंचम १	शतांग	केशराक्ष	अग्नियुक्त	सहस्रशीर्ष	पश्चादक्
२	प्रमुख	मृगारि	हारीत	पीतांग	विश्वपुष्ट
३	शर्कर	नाकेश	जाबाल	नगमाल	गोमुख
४	वृषभ	वृषण	निर्जर	निराशन	गिरिवक्त्र
५	सहस्राक्ष	शिलांग	निशित	यमद्युति	सुवर्णनखर
६	धर्म	शृंगशीर्ष	शशांक	सप्तांग	अजांघ्रि
७	विषम	नीलांबर	ललाटाक्ष	लतांग	दशानन
८	मोचक	कुहासन	कराक्षक	मृत्युनाशन	विषानन
९	वृकभेदी	शतबाहु	पादास्य	अतनु	उग्रदेह
१०	कुंजरारि	बहुजिव्ह	विकटांग	घोटवक्त्र	शतपद
११	शेष	नागदंत	शिलाद	नीरोग	सहस्रस्कंद
१२	शिखिहरित्	षणावपु	हरिन्मुख	भव	त्रिमुखस्कंद

* पंचमांच्या गुरूंचे जें सूत्र, गोत्र वगैरे आहे तेंच सूत्र, गोत्र वगैरे त्या पंचमांपासून उत्पन्न झालेल्या उपपंचमांचें आहे असें समजावें.